श्रीमज्जयतीर्थश्रीचरणानां षट्शतमानोत्सवाङ्गतया प्रकाशितायाः

ग्रन्थमालायाः द्वितीयं पुष्पम्

श्रीमत्कविकुलतिलक-

श्रीमद्वादिराजतीर्थश्रीमत्पूज्यचरणविरचिता

युक्तिमल्लिका

शुद्धिसौरभम्

श्रीसत्यप्रमोदतीर्थश्रीचरणविरचितया

विवृत्या

समलंकृतम्

सम्पादक :- केशव श्रीनिवासाचार्य कट्टि

प्रकाशक :- सत्यध्यान रामाचार्य कट्टि

जयतीर्थविद्यापीठ, बेंगलूर-४

१९८९

श्रीमज्जयतीर्थश्रीचरणानां षट्शतमानोत्सवाङ्गतया प्रकाशितायाः ग्रन्थमालायाः

द्वितीयं पुष्पम्

श्रीमत्कविकुलतिलक-

श्रीमद्वादिराजतीर्थश्रीमत्पूज्यचरणविरचिता

युक्तिमल्लिका

शुद्धिसौरभम्

श्रीसत्यप्रमोदतीर्थश्रीचरणविरचितया

विवृत्या

समलंकृतम्

सम्पादक :– केशव श्रीनिवासाचार्य कट्टि

प्रकाशक :– सत्यध्यान रामाचार्य कट्टि

जयतीर्थविद्यापीठ, बेंगलूर–४

१९८९

प्राप्तिस्थानम्

सत्यध्यान रा. कट्टि
16, उत्तरादिमठ मार्गः
शंकरपुरम्, बेंगळूर-४

Available at -

Satyadhyana R. Katti,
16, Uttaradi Mutt Road,
Shankarpuram, BANGALORE-4

सर्वेऽधिकाराः स्वायत्तीकृताः

मूल्यम् २० रूप्यकाणि

मुद्रकः धनंजय बा. वरखेडकर
सुधामुद्रणमन्दिरम्, उत्तरादिमठीयावारः
शंकरपुरम्, बेंगळूर-५६०००४

॥ श्रीदिग्विजयरामोविजयते ॥

अनुग्रहाशंसनम्

अस्माकं प्रियशिष्येण कट्टीत्युपाह्वयेन श्रीनिवासाचार्यतनूजेन केशवेन, स्वकुमारस्य दिवङ्गतस्य रवूत्तमस्य स्मरणार्थं ग्रन्थोऽयं मुद्राप्य प्रकाशितः ।


तेन ग्रन्थस्यास्याध्येतारोऽध्यापकाश्च तं कुमारं सानुग्रहं स्मरिष्यन्ति इति नात्र वक्तव्यमस्ति ।

संप्रार्थयामहे अस्मदुपास्यं श्री भारतीरमणहृन्मण्टपसमधिष्ठितं श्रीजानकीजानिं श्रीमूलरामचन्द्रं यत्कुमारमेनं तत्कुटुम्बं च ज्ञानभक्तिवैराग्यवितरणेन समनुगृह्णीयादिति ।

श्रीमदुत्तरादिमठाधीशाः

श्री १००८ श्री सत्यप्रमोदतीर्थश्रीचरणाः ।

श्री १००८ श्रीमद्वादिराजतीर्थश्रीमत्पूज्यचरणाः




कामधेनुर्यथापूर्वं सर्वाभीष्टफलप्रदा ।
तथा कलौ वादिराजश्रीपादोऽभीष्टदः सताम् ॥

श्री १००८ श्री सत्याभिज्ञतीर्थश्रीपादाः



सत्यप्रज्ञतीर्थोद्भवमच्युताङ्घ्रिश्रितं प्रपन्नालिभवार्तिशोषम् ।
शुद्धं विनिद्रं सदभिज्ञपादपद्मं भजे ज्ञानसुधासमृद्धम् ॥

श्री १००८ श्री सत्यप्रमोदतीर्थश्रीपादाः



श्रीसत्याभिज्ञतीर्थाङ्घ्रिसेवासंप्राप्तवैभवान् ।
श्रीसत्यप्रमोदतीर्थार्यान्गुरून्वन्दे निरन्तरम् ॥

॥ श्री दिग्विजयरामो विजयतेष ॥

प्रास्ताविकं किञ्चित्

श्रीभगवत्पादैः विष्णुतत्त्वनिर्णये मङ्गलपद्ये निर्दोषाशेषसद्गुणमित्येवं नारायणस्य विशेषणेन निर्दोषत्वं भगवल्लक्षणं प्रत्यज्ञायि । शुद्धिसौरभेण तदेव लक्षणं पटीयसीभिर्युक्तिभिः समर्थ्यते । प्रतिषेधः सर्वत्र प्रसक्तिपूर्वक इति स्थितिः । अतो भगवति दोषाणामशेषाणां प्रतिषेधार्थं लोकतः कुसमयैः श्रुतितात्पर्यापरिज्ञानेन वा प्रसक्तिर्यथायथं सौरभे प्रदर्श्यते ।

अयमत्र विषयनिरूपणक्रमः । आदौ रामकृष्णपरशुरामाद्यवतार-रूपेष्वपि लोकतः स्थूलदृश्भिरारोपिताः जन्ममृतिदुःखक्षुत्पिपासामुखा दोषा भागवतादिस्पष्टोक्तिभिः तदुपदर्शिताभिश्च युक्तिभिः परिह्रियन्ते । तदनु मायावादप्रसञ्जितो ब्रह्मण्यज्ञानारोपः सर्वथाऽसंभवदुक्तिक इति प्रदर्श्यते । तत एव च मुकुन्दस्य शबलब्रह्मता मायिभिः प्रजल्पिता पराक्रियते । मुकुन्दस्यैव नित्यमुक्तता परब्रह्मता च 'गुणस्य मायामूलत्वान्न मे मोक्षो न बन्धनम्' इति भागवतश्लोकं सुबहुमुखं व्याख्याय समर्थ्यते । अन्ते च पुरुषसूक्तप्रतिपाद्यो मुकुन्द एव न त्वेव परपरिकल्पितस्तदन्यो विराट्पुरुष इति सविस्तरं समर्थ्यते ।

तदेवं सर्वत्र दोषाणां आरोपरूपप्रसक्तिप्रदर्शनमुखेनैव प्रतिषेधेन दोषारोपपूर्वकप्रमितिविषयाभाववत्त्वमेव निर्दोषत्वमिति तल्लक्षणस्वरूपमवधार्यते ।

'निर्दोषत्वं गुणोद्रेकं ज्ञात्वा मुक्तिर्न चान्यथा' इति भगवत्पादीयं वचनं मुमुक्षुभिरवश्यमेव निर्दोषत्वं ज्ञेयमित्यनुशास्ति । तच्च पूर्वोक्तदिशा यथावत्तया ज्ञातमेव निःश्रेयससाधनतां समश्नुते ।

शुद्धिसौरभसमर्थितां श्रीहयग्रीवस्य निर्दोषतालक्षणां शुद्धिं निश्चित्य समुपास्य च सज्जनाः स्वयं स्वयोग्यशुद्धिमन्तो भूत्वा स्वभावसुखाविर्भावभाजो भवेयुरिति अस्मदुपास्यं श्रीमूलरामं संप्रार्थयामः ।

श्रीमदुत्तरादिमठाधीशाः

श्री १००८ श्रीमत्सत्यप्रमोदतीर्थ श्रीचरणाः

श्रीमद् युक्तिमल्लिकायां शुद्धिसौरभे विषयसंग्रहः

|| श्रीः ||

श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मक-
लक्ष्मीहयग्रीवाय नमः ||

युक्तिमल्लिकायाम्

शुद्धिसौरभम्

महत्सु गुणसारेषु दोषान्वेषणधीर्मुधा ||
अनन्तगुणहृद्योऽपि निरवद्यो न किं हरिः || १ ||

|| श्रीदिग्विजयरामो विजयते ||

|| श्री गुरुभ्यो नमः ||

अनन्तगुणसंपूर्णं सर्वदोषविवर्जितम् ।
मूलरामं सदा वन्दे चतुराननपूजितम् || १ ||

अनुव्याख्याऽमृताऽम्भोधिर्यदास्यान्निःसृतोऽमरान् ।
नरान् करोति तं वन्दे पूर्णबोधं जगद्गुरुम् || २ ||

यत्कृपालेशमात्रेण पुरुषार्थचतुष्टयम् ।
लभन्ते मानुषा नूनं ताञ्जयादिगुरून्भजे || ३ ||

हयग्रीवपदाम्भोजभृङ्गराजायितान्तरान् ।
वादिराजगुरून्वन्दे ज्ञानभक्त्यादिसिद्धये || ४ ||

प्रणम्य सदभिज्ञार्यपादोपान्तरजःकणान् ।
शुद्धिसौरभसर्वस्वं विवृणोमि यथामति || ५ ||

पूर्वसौरभे श्रुतीनां प्रामाण्यं समर्थ्य तद्बलेन नारायणाख्यस्य परब्रह्मणो गुणपूर्णत्वं प्रतिपादितम् । तदेव निर्दोषत्वसमर्थनेनोपपादयितुं शुद्धिसौरभ-सर्वस्वमिति पूर्वेणास्योपपाद्योपपादकभावलक्षणसङ्गतिः स्वस्मिन्नेकवाक्यता च । तत्रादौ 'यदधीना गुणाश्चैव दोषा अपि हि सर्वशः । गुणास्तस्य कथं न स्युः स्युर्दोषाश्च कथं पुनः' इत्यनुव्याख्यानोक्तं प्रतिजानीते **महत्स्विति** । मूलरूपेऽवताररूपेषु च । **अन्वेषणधीः** विप्रतिपन्नः दोषवान् चेतनत्वात् चैत्रवत् इत्यादिकुयुक्त्या साधनप्रयासः । **मृषा** निरर्थकः । **गुणसारेषु** गुणेषु सारः स्वातन्त्र्यं तद्वत्सु । हेतुगर्भविशेषणमिदम् । तदनेन परकीययुक्तेः कालात्ययापदिष्टत्वं स्वातन्त्र्याभावोपाधिदुष्टत्वं चाभिप्रैति । तदेव व्यनक्ति **अनन्तेति** । अपिः समुच्चये । उभयरूपोऽपि हरिः । **किं न** प्रमाणसिद्ध इति शेषः । 'गुणाः श्रुताः सुविरुद्धाश्च' इत्यादिश्रुतिभिरिति भावः । हरिरित्यनेन प्रेप्सावत्त्वेन अनन्तान्गुणान्स्वस्मिन्नाहरति जिहासावत्त्वेना-शेषान्यवद्यानि स्वस्मात्परिहरति चेति युक्तिद्वयं सूचयति ॥ १ ॥

योऽसौ लघीयसो दोषो नासौ दोषो गरीयसः ।
अपि संहृत्य निखिलमपवादी किमच्युतः ॥ २ ॥

लघीयसः नियम्यस्य । **गरीयसः** गुणदोषनियामकस्य । **अपवादी** हिंसादोषभाक् । अच्युत इत्यनेन 'अच्युतो यो गुणैर्नित्यमेवाखिलैः प्रच्युतोऽ-शेषदोषैः सदा पूर्तित' इति भगवत्पादोक्तयुक्तिं संगृह्णाति ॥ २ ॥

यद्भावि तद्भवत्येव यदभावि न तद्भवेत् ।
कल्पान्ते तल्पकल्पं यत्पत्रमासीन्न पादपः ॥ ३ ॥

'नैषा तर्केण मतिरापनेया' इति श्रुत्युक्तं, भगवद्विषयिण्या मतेस्तर्का-गोचरत्वं साधयति **यदिति** । **यत्** शास्त्रैकगम्यं प्रमेयम् । **भावि** श्रुति-प्रमितम् । **तत् भवत्येव** । न दुस्तर्कबलेनापलापमर्हति । **यत् अभावि**

श्रुतिप्रमितं न भवति **न तद्भवेत्** दुस्तर्कबलेन न साधनार्हम्। उभयत्र दृष्टान्तः **कल्पान्त इति**। अयमाशयः। कल्पान्ते प्रलये श्रीहरेः पादपरहिते लक्ष्म्यात्मके वटपत्रे शयनं श्रुतिप्रमितम्। तत्र, विमतं, पत्रं न भवितुमर्हति, पादपरहितत्वात् व्यतिरेकेण चूतपत्रवत् इति पत्रस्यैवापलापो न दुर्युक्तिबलेन साधनार्हः। एवं विमतं पादपोपेतम् पत्रत्वात् इति अविद्यमानपादपसाधनं वा कुयुक्त्या न संभवि। किन्तु युक्त्योरेव श्रुत्या बाध इति भावः॥ ३॥

कृतिर्न कारणे यस्य तस्य कार्यं कुतो भवेत्।
लये सतः प्रागभावाभावान्न हि हरेर्भवः ॥ ४ ॥

हरिः, कार्यो न भवति, कारणगोचरकृत्यभावात् इति वक्तुं व्यतिरेकव्याप्तिमाह **कृतिरिति**। **यस्य** कुलालादेः। **कारणे** विषयसप्तमी। उपादानादिगोचरा। **कार्यं** घटादिकम्। यत्कार्यं तदुपादानादिगोचरकृतिजन्यमिति यावत्। न चासिद्धिरित्याह **प्रागभावेति**। एतच्च कारणसामान्योपलक्षणम्। प्रागभावस्यैवाभावे पूर्ववृत्तित्वघटितकारणत्ववत्सद्भावस्य असंभवादिति भावः। हरिः कारणसामान्यशून्यः प्रागभावाभावात्। गगनवत्। हरिः प्रागभावाभाववान् प्रलये सत्त्वात् तद्वदेवेति च प्रयोगावभिप्रेतौ ॥ ४ ॥

नाभिजन्मा विधिस्तस्य क्रोधाज्जातस्त्रिलोचनः।
नारायणो मूरूलपी जात कस्माद्विचार्यताम्ः ॥ ५ ॥

प्रलये स्वरूपेण सतोऽपि सृष्टौ जीवानामिव देहसम्बन्धरूपा जनिः स्यादिति मन्दाशङ्कां परिहरति **नाभीति**। देहसंबन्धार्थं देहोत्पत्तिर्वाच्या। असता संबन्धायोगात्। न च जनकं विना देहोत्पत्तिः सम्भाविनी।

जनको भवन् विधिर्वा स्यात् त्रिलोचनो वा । अन्येषामनन्तरभाविनामनाशङ्क्यत्वात् । न च तावुभावपि जनकौ संभवतः । हरेरेव सम्भूतत्वात् । 'यस्य प्रसादजो ब्रह्मा रुद्रश्च क्रोधसंभव' इति भारतोक्तेः । एको ह नारायण आसीन्न ब्रह्मा न च शङ्करः' इति श्रुतेश्च । तथा च प्रयोगः । नारायणः जनिरहितः जनकरहितत्वात् । न चावताररूपेष्वसिद्धिः । 'पूर्णात्पूर्णमुदच्यते' इति श्रुतेः तेषामपि मूलरूपेणात्यन्ताभेदादित्याशयः ॥ ५ ॥

अतोऽभूद्देहलीदीपः प्रलये सत्त्वमीशितुः ।
कल्पान्ते यल्लयं रुन्धे कल्पादौ जन्म च प्रभोः ॥ ६ ॥

अतः प्रागभावशून्यत्वात् प्रध्वंसशून्यत्वाच्च । **देहलीदीपः** उभयत्र अन्धकारनिवर्तको यथा, तथा भगवतो जन्ममरणसद्भावविषयकोभयमोहनिवर्तकः । **ईशितुः** स्वयं जगतः सृष्टिसंहारयोः समर्थस्य । **रुन्धे** अत्यन्ताभावप्रतियोगिनं स्थापयति ॥ ६ ॥

पूर्णप्रवृत्तिरन्यार्था न वै पूर्त्यर्थमात्मनः ।
तटाकोत्सिक्ततोयैः किं तटाकस्यैव पूरणम् ॥ ७ ॥

'सोऽयं विहार इह मे तनुभृत्स्वभावसंभूतये भवति भूतिकृदेव भूत्याः' इति भगवत्पादोक्तिमनुरुध्य परमात्मनः सृष्ट्यादौ प्रवृत्तिः परप्रयोजनार्थैवेति लौकिकदृष्टान्तोक्त्या निरूपयति **पूर्णेति** । **पूर्णस्य** आनन्दोद्रेकवतः । **प्रवृत्तिः** सृष्ट्यादिविषयिणी । वै इत्यनेन 'आप्तकामस्य का स्पृहा' इति प्रमाणप्रसिद्धिं द्योतयति । न चैवं स्पृहासामान्यनिषेधे प्रवृत्त्यनुपपत्तिः । स्वप्रयोजनस्यैव निषेधेन परप्रयोजनार्थतायाः अङ्गीकारात् । तदुक्तं अनुव्याख्याने 'आत्मप्रयोजनार्थाय स्पृहां श्रुतिरवारयदि'ति । एतदाह **अन्यार्थेति** । तदुक्तं सुधायां 'दृश्यन्ते हि कृपालवः स्वप्रयोजनमनुद्दिश्य परप्रयोजनार्थमेव प्रवर्तमाना' इति । 'सदा प्रवृत्तिरीशस्य स्वभावादेव

केवलं' इति अनुव्याख्यानोक्तिमनुरुध्याह **'तटाकेति'** । तदुक्तं तत्रैव सुधायां 'यथा लोके ज्वलनपवनादीनां तथेशस्यापि सदा सृष्ट्यादौ केवलं प्रयोजनेन विना स्वभावादेव प्रवृत्तिः प्रमिता' इति । अत्र पवनादीत्यादिपदेन उदकादीनां तिर्यग्गमनादिप्रवृत्तेः संग्रहः ॥ स्वभावमात्रतः प्रवृत्तौ तटाकोदकदृष्टान्तः । उदकस्य जडस्य प्रयोजनोद्देशिताया: अप्रसङ्गात् ॥ ७ ॥

सुखस्यानन्तरं दुःखं भ्रमो न प्रमया सह ।
न हि पूर्णसुखज्ञानो दुःखभ्रान्त्यवकाशवान् ॥ ८ ॥

'प्रच्युतोऽशेषदोषैः सदा पूर्तितः' इति भगवत्पादोक्तिं गुणपूर्णत्वनिर्दोषत्वयोः प्रयोज्यप्रयोजकभावोपपादनेन समर्थयते **सुखस्येति । सुखस्य** नित्यपूर्णसुखस्य । **अनन्तरं दुःखं** दुःखात्यन्ताभावसामानाधिकरण्यमिति यावत् । एवं यत्र नित्यपूर्णप्रमा तत्र भ्रमात्यन्ताभाव इत्यपि व्याख्येयम् । व्याप्तिमुक्त्वाऽनुमानप्रयोगमाह **नेति** । परमात्मा नित्यनिर्दुःखः नित्यपूर्णसुखत्वात्; नित्यं भ्रमरहितः नित्यपूर्णप्रमावत्त्वात् व्यतिरेकेण जीववत् । एतदुपलक्षणम् । नित्यनिर्दोषः नित्यपूर्णगुणत्वात् इति तात्पर्यं ध्येयम् ॥ ८ ॥

प्राग्जन्मार्जितदुष्कर्म दुःखमूलं ध्रुवं नृणाम् ।
न कर्मणा वर्धते यो नो कनीयान्कुतोऽस्य तत् ॥ ९ ॥

'न मां कर्माणि लिम्पन्ति' इति गीतोक्तं असङ्गत्वमाह **प्रागिति** । प्राग्जन्मेत्युपलक्षणम् । 'अत्युत्कटैः पुण्यपापैरिहैव फलमश्नुते' इति स्मृतेः एतज्जन्मापि ग्राह्यम् । नृणामित्यनेन अपरोक्षज्ञानिनां व्यावृत्तिः । ज्ञानेन तेषां सञ्चितदुष्कर्मणां नाशश्रवणात् । नित्यापरोक्षीकृतात्मस्वरूपस्य भगवतो लेपाभावः किमु वक्तव्य इत्याह **न कर्मणेति । तत्** लेपप्रयुक्तं दुःखादिकम् । 'असङ्गो ह्ययं पुरुष' इति श्रुते ॥ ९ ॥

क्षुत्पिपासादि मर्त्यानामप्यामुक्तेर्न सर्वदा ।
बृहच्छरीरः किं भुंक्ते ब्रह्माण्डं यस्य रोमसु ॥ १० ॥

परमात्मनः क्षुधादिराहित्यं कैमुत्येन साधयति **क्षुदिति** । आदिपदेन जन्ममृत्युजरादिकं ग्राह्यम् । **सर्वदा** मुक्तेरनन्तरम् । मर्त्यानामपि यदनुग्रहेण तत्परिहारः तस्य नित्यमुक्तस्य भगवतस्तदभावः किमु वक्तव्य इति भावः । तदुक्तं भगवत्पादैः 'नित्यतीर्णाशनायादिरेक एव हरिः स्वतः ॥ अशनायादिकानन्ये तत्प्रसादात्तरन्ति हि' इति ॥ **किं भुंक्ते** भोगेन न तस्य स्वप्रयोजनम् इत्यर्थः । 'अनश्नन्नन्योऽभिचाकशीति' इति श्रुतेः 'निरन्नोऽपि बलेन भूयान्' इति स्मृतेश्च । तथा च, 'किमि'त्यनेन भोगस्य बलहेतुत्वमेव प्रतिक्षिप्यते न भोगमात्रम् । तस्य 'अत्ति च भूतानि' इति श्रुत्या 'स्रष्टा पाता तथैवात्ता निखिलस्यैक एव तु' इति स्मृत्या च प्रमितेः । बृहच्छरीर इति हेतुगर्भं विशेषणम् । तेन 'परो मात्रया तन्वा वृधान' इति श्रुत्युक्तमात्रापरत्वरूपपरिपूर्णत्वसूचनेन भोगजन्यफलाभावे हेतुरुक्तो भवति । बृहच्छरीरत्वमेव स्फोरयति **ब्रह्माण्डमित्यादिना** । रोमस्वित्यनन्तरं उपजीवनेन समाश्रितमिति शेषः । एवं च स्वयं जगदुपजीव्यस्य अन्नमयस्य कुत एवाशनायाऽऽदिकमिति युक्तिरुक्ता ध्येया ॥ १० ॥

महान्हि रक्षकोऽल्पस्य महान्तं स न रक्षति ।
उद्धार महीमेतामादौ वराहस्तं दधार कः ॥ ११ ॥

विष्णुः जगद्धारको तदपेक्षया महत्त्वात् पितृवत् । जगत् , न विष्णोर्धारकं तदपेक्षया अल्पत्वात् अर्भकवत् इति युक्ती अभिप्रेत्य उभयत्र व्याप्ती आह **महानित्यादिना** । 'एष सेतुर्विधरणः' 'एको दाधार भुवनानि विश्वा' इति श्रुत्यनुगृहीतवान्न कश्चित्क्षुद्रोपद्रवः । हेतूक्तं महत्त्वं वराहावतारचरित्रेणाभिनीय दर्शयति **उद्धारेति** । न च द्वितीयहेतोर्गरुडादौ व्यभिचारः । साध्ये स्वातन्त्र्येणेति विशेषणस्य विवक्षितत्वात् । विशेषितसाध्यस्य च

गरुडादौ सद्भावात् । 'भर्ता सन् भ्रियमाणो बिभर्ति' इति श्रुतेः गरुडस्यापि विष्णुनैव स्वातन्त्र्येण धृतत्वात् । यथोक्तं सुमध्वविजये 'ननु स प्राणपतिर्बभार तं च' इति । तदेतदभिप्रेत्योक्तं 'तं दधार क' इति ॥ ११ ॥

महान्तो हि कथां कर्तुं सञ्चरन्ति तथा तथा ।
अनन्तासनतः पुत्राऽऽनेता नीताबलः किल ॥ १२ ॥

तथा तथा इति श्रवणेन यथा यथेत्यध्याहार्यम् । यथा सतां स्मृतिकीर्तनप्रणतिभिर्विमुक्तिर्भवेत्तथा **सञ्चरन्ति** चरित्रं कुर्वन्ति । तत्र दृष्टान्तः **अनन्तासनतः पुत्राऽऽनेतेति** । अनेन कृष्णावतारेऽनन्तासनाद्ब्राह्मणपुत्राऽऽनयनेनार्जुनादीनां तत्त्वज्ञानोत्पत्तिर्जातेति कथां ज्ञापयति । तदुक्तं भागवते 'यत्किञ्चित्पौरुषं पुंसां मेने कृष्णानुकम्पितमि'ति । एवं यथा असुराणां मोहो भवेत्तथा सञ्चरन्ति । तत्र निदर्शनं **नीताबलः किलेति** । नीता अपहृता अबला सीता यस्य सः श्रीरामचन्द्रः । किलेत्युपहासे । तदुक्तं भागवते 'मर्त्यावतारस्त्विह मर्त्यशिक्षणं रक्षोवधायैव न केवलं विभोः । कुतोऽन्यथा स्यू रमतः स्व आत्मन् सीताकृतानि व्यसनानीश्वरस्ये'ति । अनेकावतारकथानिदर्शनेन सर्वेऽप्यवतारा निर्दोषा इति ज्ञापयति । तथा च यत्र क्वचिदज्ञानादिप्रदर्शनं मोहार्थमेवेति भावः ॥ १२ ॥

मूलं यो वेत्ति कस्तस्य पत्रं संदर्शयेत्तरोः ।
यस्सर्वगो न सोऽयोगी तस्य दुःखप्रथा वृथा ॥ १३ ॥

धर्मिग्राहकप्रमाणसिद्धोऽर्थो न युक्त्याभासप्रदर्शनेन प्रच्यावनार्ह इत्यत्र लौकिकमाभाणकं वक्ति **मूलमिति** । प्रकृतोपयोगमाह **य इति** । अयं भावः । परमात्मा श्रुतिभिः सिध्यन् 'एको देवः सर्वभूतेषु गूढः सर्वव्यापी'ति सर्वव्याप्तत्वेनैव 'निरनिष्टो निरवद्य' इति निर्दुःखत्वेनैव च

संसिद्धः । तत्र, रामः दुःखी सीतावियोगवत्त्वात् इति कुयुक्त्या **तस्य दुःखप्रथा** दुःखसाधनप्रयासः **वृथा** बाधितः । **यः सर्वगः** सर्वव्यापी **सः न अयोगी,** वियोगवान् न भवतीति वियोगवत्त्वहेतुश्चासिद्धः । अतो धर्मिग्राहकमानविरुद्धोऽयं हेत्वाभास इति ॥ १३ ॥

सीताकृतानि व्यसनानीश्वरस्य कुतोऽस्य हि ।
स्त्रीकृतं कश्मलं रामो नाश्नुवीतेति च स्फुटम् ।
श्रीमद्भागवते प्रोक्तं निरवद्यस्ततः प्रभुः ॥ १४ ॥

सीताकृतानि सीतावियोगकृतानि । मध्यमपदलोपी समासः । **अस्य** 'अतोऽशेषगुणोन्नद्धं निर्दोषं यावदेव हि । तावदेवेश्वरो नाम' इति प्रमाणेन निर्दोषत्वेन प्रमितस्य । **ईश्वरस्य** सुखदुःखनियमनसमर्थस्य । स्त्रीकृतमित्युत्तरार्धेन 'न स्त्रीकृतं कश्मलमश्नुवीत' इति श्लोकं संगृह्णाति । राम इत्यनेन 'रमतः स्व आत्मन्' इति भागवतश्लोकोक्तं स्वस्मिन्नेव रमत इति राम इति निर्वचनं सूचयति । सर्वव्यापितया दुःखकारणवियोगेन रहितस्य स्वयं दुःखनियामकस्य च कुतो दुःखसंभव इति हृदयम् । **ततः** उक्तप्रमाणेभ्यः ॥ १४ ॥

यत्पञ्चमशिरश्छेदो बबाधेऽपि कपालिनम् ।
तद्वधेऽप्यनघो योऽन्ते स किं रक्षोवधेऽघवान् ॥ १५ ॥

यदिति । **यस्य** कार्यब्रह्मणश्चतुर्मुखस्य । **पञ्चमशिरसः** अवयवमात्रस्य । **छेदः** छेदमात्रं न तु अवयविन एव हत्येति हृदयम् । **कपालिनं** रुद्रम् । **बबाधे** पापसम्पर्केण पीडयामास । तत एव तत्पापापनोदाय **कपालिनं** कपालभृतं अकरोदिति आवृत्त्या योज्यम् । 'शितिकण्ठः कपालभृत्' इत्यमरः । **तद्वधे** तस्य चतुर्मुखब्रह्मणो **वधेऽपि** संहारेऽपि नत्ववयवमात्रच्छेदे इति हृदयम् । **यः** श्रीरामचन्द्रः । **अनघः** पापलेपरहितः 'असङ्गो ह्ययं

पुरुष' इति श्रुतेः । सः श्रीरामचन्द्रः । **रक्षोवधे रक्षसः** राक्षसस्य । विश्रवसो जातत्वमात्रेण उपचारतो ब्राह्मणेतिव्यवहारविषयस्य रावणस्य । **वधे** संहारे । **अघवान् किं** नैव लेपवानिति भावः । अयमाशयः । ब्राह्मणवर्णस्य मुख्याभिमानिनश्चतुर्मुखस्य हननेऽपि यो न दोषभाक् तस्य रामस्य ब्राह्मणाभासरावणहननेन कुत एव दोषः । 'ब्राह्मणो न हन्तव्य' इति निषेधो रुद्रादिसंसारिजीवजातमेव स्पृशति न मुक्तं, न त्वेव नित्यमुक्तं परमात्मानमिति ॥ १५ ॥

शक्तोऽपि राजा भृत्यस्य हस्तं संगृह्य गच्छति ।
स्वर्नीतगर्दभश्वादेर्लङ्का शङ्काऽऽस्पदं किल ॥ १७ ॥

सेतुनिर्माणमपि रामेण न स्वप्रयोजनार्थं किन्तु तद्दर्शनेन रुद्रादीनां ब्रह्महत्यापापापनोदार्थमेव । 'सेतुं दृष्ट्वा समुद्रस्य ब्रह्महत्यां व्यपोहति' इति स्मृतेः । 'लोकवत्तु लीलाकैवल्यमि'ति सूत्रानुसारेण स्वस्य तु लीलामात्रमेवेत्याह **शक्तोऽपीति** । तदुक्तं तद्भाष्ये 'पूर्णानन्दस्य तस्येह प्रयोजनमतिः कुतः' इति । ससैन्यस्य सेतुं विना लङ्कां प्रति गमनेऽशक्तस्वशङ्कां धिक्करोति **स्वरिति** । अत्र **स्वःपदं** मोक्षपरं न प्रसिद्धस्वर्गपरम् । 'यन्न दुःखेन संभिन्नं' इत्यादिनिर्वचनात् । 'समायात समायात ये ये मोक्षपदेच्छवः' इत्यभियुक्तोक्तेः । आदिपदेन तत्काले मोक्षसाधनसम्पूर्तिमतां ग्रहणम् । तथा च संसारसमुद्रतरणे स्वयं सेतुभूतस्य क्षुद्रसमुद्रतरणेऽसामर्थ्यशङ्काऽपहसनीयेत्याह **किलेति** ॥ १६ ॥

स्वयं भीरुर्गभीरस्य स्वभावं भावयेत्स्ववत् ।
नखभिन्नाब्जजाण्डस्य चिन्ता हन्तासुरात्किल ॥ १७ ॥

भीरुः स्वयं । स्वभावत एव चिन्ताऽऽकुल आसुरस्वभावः । 'चिन्तामपरिमेयान्तां प्रलयान्तां समाश्रिताः' इति गीतायामासुरस्वभावोक्तेः ।

गभीरस्य अगाधमहिम्नः सर्वोत्तमस्य रामस्य। **स्ववत्** स्वात्मदृष्टान्तेन **स्वभावं भावयेत्** तस्मिन् स्वगतं चिन्तादोषं आरोपयेदिति यावत्। नख-भिन्नाब्जजाण्डस्येत्यनेन 'वामपादाङ्गुष्ठनखनिर्भिन्नोर्ध्वाण्डकटाहे'त्यादिभागवतोक्ति तत एव 'अथापि यत्पादनखावसृष्टं जगद्विरिञ्चोपहृतार्हणाम्भः। सेशं पुनाति' इति तत्रैवोक्तं मुकुन्दाभिधस्य हरेः सर्वोत्तमत्वं च ध्वनयति। अयमाशयः। ब्रह्मणो वरादेव हि रावणस्य बलम्। स ब्रह्मैव यस्य त्रिविक्रमावतारे पादप्रक्षालनेन पूजकः तादृशस्य समाधिकरहितस्य रामचन्द्रस्य कुतो रावणवधे चिन्तेति ॥ १७ ॥

कुक्षौ यस्याखिला लोका लक्ष्यन्ते, स्म शिशोः किल।
जननं मरणं चास्य न युक्तं युक्तिविन्मते ॥ १८ ॥

एवमेव कृष्णावतारोऽपि निर्दोष एवेति समर्थयति **कुक्षाविति**। **लक्ष्यते स्म** मात्रा यशोदयेति शेषः। 'सा तत्र ददृशे विश्वं जगत् स्थास्नु च खं दिशः' इति भागवते प्रसिद्धिमाह **किलेति**। **न युक्तं** युक्तिविरुद्धम्। कृष्णो, न यशोदाजठरस्थः, तदपेक्षयाऽधिकपरिमाणवत्त्वात्। यो यदवधिकातिशयोपेतपरिमाणवान् नासौ तत्स्थः। यथा मेरुर्न सर्षपस्थः। कृष्णो न यशोदासमुद्भवः तत्पूर्वभावित्वात्। न चासिद्धिः। कृष्णः यशोदाऽपेक्षया पूर्वभावी तत्पूर्वभाविजगदाश्रयत्वात्। हेतुश्च यशोदाऽध्यक्षसिद्ध इति। एवं सर्वलयेऽप्यलीनस्य मरणाभावोऽपि युक्तियुक्त इति भावः ॥ १८ ॥

न हि कल्पान्तसमयो यस्स्वर्गारोहणक्षणः।
न च कल्पादिकालोऽसौ यत्रावातरदच्युतः ॥ १९ ॥

उभयत्र विपक्षे बाधके आह **न हीति** । **न चेति** च । यदि कुक्षिस्थाखिललोकस्य कृष्णस्य स्वर्गारोहणक्षण एव मरणं तदा तदैव कल्पान्तकालीनः लोकप्रलयः स्यात् । तर्कस्य विपर्ययपर्यवसानं **न हीति** । एवं यदि प्रादुर्भावक्षण एव जननं तदा तदैव कल्पादिकालीना लोकसृष्टिः प्रसज्येत । तत्र विपर्ययपर्यवसानं **न चेति** । अतो जननमरणाभावसाधकयुक्त्योर्नाप्रयोजकता ॥ १९ ॥

यद्विप्रांघ्न्यङ्कनं वैकुंठस्थमूर्तेर्हि वक्षसि ।
तदेव देवकीगर्भजातस्य किल वक्षसि ॥ २० ॥
अतस्तदेव हि भवेदिदं रूपं न चापरम् ।
न चेत्कुप्यन्ति योधानां कलाकुशलमन्त्रिणः ॥ २१ ॥

किञ्च वैकुण्ठस्थस्य भगवन्मूर्तेर्जन्ममरणे नैव स्त इति तावत् प्रमितम् । श्रीकृष्णावतारश्च तदभिन्न इति कथं तस्य ते स्तामिति वक्तुं तयोरभेदं स्थापयति द्वाभ्याम् **यदिति** । श्रीकृष्णदेहः विष्णवभिन्नः इत्यत्र तद्वृत्त्यसाधारणस्वरूपलक्षणं श्रीवत्सं अत्र पश्यतो वसुदेवस्य प्रत्यभिज्ञैव प्रमाणमित्याह **विप्रांघ्न्यङ्कनमिति** । श्रीवत्सचिह्नमित्यर्थः । तस्यागन्तुकत्वशङ्कां वारयति **गर्भजातस्येति** । प्रादुर्भूतमात्रस्येत्यर्थः । हीत्यनेन 'श्रीवत्सलक्ष्मं गलशोभिकौस्तुभमि'ति भागवतोक्तिं प्रत्यभिज्ञायां प्रमाणयति । न चेयं प्रत्यभिज्ञा भ्रान्तिः । बाधकाभावात् । एवमेव भ्रान्तित्वाङ्गीकारेऽतिप्रसङ्गमाह **न चेदिति** । **कला** व्रणोपशमानन्तरमनुवर्तमानं नीलिमादिचिह्नम् । तद्दर्शनेन कुशलमन्त्रिणः सोऽयं योध इति प्रत्यभिजानन्ति । **कुप्यन्ति** स्वप्रत्यभिज्ञाया भ्रान्तित्वं न सहन्ते । अयं पुनर्विशेषः । तत्र कलायां कालतः किञ्चिदन्यथाभावेन सोऽयमिति निरवधारणा प्रत्यभिज्ञा । अत्र पुनः सर्वात्मनैकप्रकारत्वेन श्रीवत्सस्य सावधारणा सेति । तदिदमाह **'तदेवे'**ति **'तदेव ही'**ति च एवकारद्वयेन ॥ २१ ॥

प्रदर्श्यातप्ततपसामवितृप्तदृशां नृणाम् ।
आदायान्तरधाद्यस्तु स्वबिम्बं लोकलोचनम् ॥ २२ ॥

अतप्ततपसां ततोऽप्यधिककालं स्वरूपदर्शनाय पर्याप्तं तपोऽननुष्ठितवताम् । नृणामित्यनेन सुराणां विषये नान्तर्धानमिति द्योत्यते । तदुक्तं 'रूपेणैकेनास भूमावि'ति । आदायेति विशेषबलेन । देहदेहिनोरभेदात् ॥ **स्वबिम्बं** स्वदेहम् ॥ २२ ॥

इति भागवते प्रोक्तामुद्धवोक्तिं न विस्मर ।
विस्तरोऽस्य प्रमेयस्य कृष्णकाव्ये प्रदृश्यताम् ॥ २३ ॥

कृष्णकाव्ये रुक्मिणीशविजये । तथा च तस्य मरणवार्ता भ्रान्तिमूलैवेति भावः ॥ २३ ॥

ये पार्थरथसूतस्य विश्वरूपे रणात्पुरा ।
विलग्ना दशनाग्रेषु चूर्णीभूताश्च सर्वशः ।
दृष्टास्तच्छरवेगेन च्छेदो वेधः कथं प्रभोः ॥ २४ ॥

'छेदभेदादिकं तथा । प्रदर्शयति मोहाय दैत्यादीनां हरिः स्वयमि'ति महाभारततात्पर्यनिर्णयोक्तं समर्थयते 'ये' इत्यादिना 'श्रुतिस्तु' इत्यन्तैः एकोनविंशतिश्लोकैः ॥ ननु भीष्मेण 'मम निशितशरैर्विभिद्यमानत्वचि विलसत्कवचेऽस्तु कृष्ण आत्मा' इति कृष्णस्य त्वक्छेदस्य कथितत्वेन कथं छेदो नेत्युच्यत इति शङ्कामादौ परिहरति **ये इति** । ये भीष्मादयः सर्वशः कौरवभटा रणात्पुरा पार्थरथसूतस्य कृष्णस्य दन्ताग्रेषु चूर्णीभूता विश्वरूपे पार्थेन दृष्टाः तेषां शरवेगेन तस्य प्रभोः छेदो वेधः कथमित्यन्वयः । ननु 'मम निशितशरैर्विभिद्यमानत्वचि' इति भागवतस्थभीष्मवाक्येन कृष्णत्वचि छेदः प्रत्यक्षतो दृष्ट इत्यवगम्यते । न चानुमानागमाभ्यां प्रत्यक्षबाधः

संभवति । 'क्व च प्रत्यक्षतः प्राप्तमनुमाऽऽगमबाधितमि'ति सिद्धान्तात् । अतः 'प्रदर्शयति मोहाये'ति कथं प्रत्यक्षदृष्टस्य मोहत्वोक्तिः । भीष्मादयः न त्वक्छेदनसमर्थाः, रणात्पुरैव मृतप्रायत्वात् इति खल्वनुमानेनैव प्रत्यक्षबाधो वक्तव्य इति चेन्मैवम् । अभिप्रायानवगमात् । नात्र प्रत्यक्षस्य केवलेन अनुमानेन बाधोक्तिः अभिप्रेता । किं नाम बलवत्प्रत्यक्षान्तरेण अनुगृहीतेनैव । तदेतदुक्तं **पार्थेन दृष्टा** इति । पार्थदृष्टिस्तु 'दिव्यं ददामि ते चक्षुः' इत्युक्तेर्बलवती । 'भासस्तवोग्राः प्रतपन्ति विष्णो' 'निरनिष्टो निरवद्य' इति धर्मिग्राहकप्रमाणानुगुणा । पूर्वं प्रत्यक्षं तु तत्प्रतिकूलत्वाद्दुर्बलम् । अतः दुर्बलस्याज्ञप्रत्यक्षस्य प्रबलेन ज्ञानिप्रत्यक्षेणैव बाधोक्तिरिति न कोऽपि सिद्धान्तविरोधः ॥ २४ ॥

पिशाचाविष्टदेहेऽपि प्रायश्छेदो न दृश्यते ।
मन्त्रेण कुण्ठिता धारा न च्छिनत्ति नरान्हि यत् ।
हरेश्छेदश्श्रुतिप्रोक्तसार्वज्ञच्छेद एव तत् ॥ २५ ॥

प्राय इत्यनेन कदाचित्स्तम्भकशक्त्यभिभवे छेदो भवत्यपीति कथनेन तच्छक्तेः परमात्माधीनता द्योत्यते । **सार्वज्ञेति** । कदाचिन्मन्त्रविशेषाभिज्ञेन रक्षितस्य वा पिशाचेनाविष्टस्य वा देहस्यापि न छेदो यदा तदा किमु वक्तव्यं स्वयं नित्यसर्वज्ञस्येति भावः । प्रसक्तस्यापि छेदस्य स्तम्भकशक्त्या पिशाचेन वारणम् । कृष्णस्य तु आकाशवच्छेदानर्हतया तत्प्रसक्तिरेव नेत्ययं विशेषः 'स च्छेद्यः केन वा वदे'त्यग्रे वक्ष्यते ॥ २५ ॥

ब्रह्माण्डखर्परच्छेदे यन्नखाग्रच्छिदापि न ।
को युक्तिमांस्तस्य विष्णोश्छेदं संभावयेच्छरैः ॥ २६ ॥

रोमच्छेदो जगच्छेदो यद्रोम्णि निखिलं जगत् ।
नियन्ता योऽखिलच्छत्तुः स च्छेद्यः केन वा वद ॥ २७ ॥

छेदस्यासंभावितत्वं युक्तिभिरुपपाद्य छेदानर्हत्वमेव स्थापयति द्वाभ्यां **ब्रह्माण्डेत्यादिना** ॥ २६ ॥ २७ ॥

स्वाहारस्य हि विच्छेदे दक्षं पशुपतेरपि ।
अच्छेद्यमकरोद्यस्तु तस्य च्छेदं करोति कः ॥ २८ ॥

न केवलं अच्छेद्यत्वरूपप्रवृत्तिनिमित्तधर्माश्रयत्वेन अच्छेद्यपदवाच्यः किं तु दक्षप्रह्लादादिगताच्छेद्यत्वं प्रति स्वातन्त्र्येणापि इत्याह षड्भिः **स्वाहारेत्यादिभिः** । तदुक्तं 'स्वातन्त्र्यं तद्गतत्वं च शब्दवृत्तेर्हि कारण-मि'ति । 'अच्छेद्यमकरोद्यस्तु' इत्यनेन स्वातन्त्र्यमुक्तं भवति ॥ २८ ॥

आक्रम्योरसि दक्षस्य शितधारेण हेतिना ।
छिन्दन्नपि तदुद्धर्तुं नाशक्नोत्त्र्यम्बकस्तदा ॥ २९ ॥
शस्त्रैरस्त्रान्वितैरेनमनिर्भिन्नत्वचं हरः ।
विस्मयं परमापन्नो दध्यौ पशुपतिश्चिरम् ॥ ३० ॥

अन्वयव्यतिरेकाभ्यां च स्वातन्त्र्यनिश्चयः इति वक्तुं व्यतिरेकमाह **नाशक्नोदिति** । **तदा** परमात्मन इच्छाऽभावे ॥ २९ ॥ ३० ॥

दृष्ट्वा संज्ञपने योगं पशूनां स पतिर्मखे ।
यजमानपशोस्तस्य कायात्तेनाहरच्छिरः ॥ ३१ ॥

अन्वयमाह **दृष्ट्वेति** । **तेन** भगवदिच्छानुगृहीतेनोपायेन ॥ ३१ ॥

इति भागवते प्रोक्तमतश्चित्रं किमच्युते ॥ ३२ ॥

अन्वयव्यतिरेकयोरागमिकत्वमाह **इतीति** । तथा च छेदस्य भगवदिच्छानुसारितोक्त्या छेदं प्रति स्वातन्त्र्यं समर्थितं ज्ञेयम् ॥ ३२ ॥

यत्कृपालेशतस्त्रातं प्रह्लादं किल रक्षसाम् ।
चिच्छिदुर्नास्त्रशस्त्राणि कश्चिन्ध्यात्तं महाप्रभुम् ॥ ३३ ॥

व्यतिरेके दृष्टान्तान्तरमाह **यदिति** ॥ ३३ ॥

सन्ध्यर्थं हस्तिनपुरीं प्रविष्टं किल कौरवाः ।
न बद्धमपि यं शेकुः कश्चिन्ध्यात्तं महाप्रभुम् ॥ ३४ ॥

यं अन्तर्बहिर्व्याप्तं विश्वरूपम् ॥ पाशाद्बहिर्विद्यमानस्य पाशेन यथा न बन्धस्तथा शस्त्राणामन्तर्विद्यमानस्य न तैश्छेदोऽपीत्याह **क इति** ॥ ३४ ॥

अतोऽज्ञजनमोहाय नटवद्दर्शयेत्परम् ।
सुधादृष्ट्यामृताशेषस्वसैन्योज्जीवनैकदः ॥ ३५ ॥

'प्रदर्शयति मोहाये'ति भगवत्पादीयोक्तिसमर्थनमुपसंहरति **अत इति** । सर्वावतारेष्वेवमेवेति ज्ञापयितुं रामावतारे महिमानमाह **सुधेति** । ॥ ३५ ॥

नटो नाट्यकृते नारी नार्येवाज्ञस्य किं दृशा ॥ ३६ ॥

धर्मिग्राहकप्रमाणबाधादज्ञदृष्टिभ्रम एवेति दृष्टान्तपुरस्सरमाह **नट इति** ॥ ३६ ॥

गंधस्य ज्ञापने चक्षुर्घ्राणानुसरणं चरेत् ।
उपनीतो यतो गन्धश्चक्षुषापि प्रकाश्यते ॥ ३७ ॥

अतीन्द्रियार्थविषये श्रुतिरेव प्रत्यक्षस्योपजीव्येति निरूपयितुं **यन्मानं यद्विषयीकरणयोग्यं** तत्तद्विषये तदितरमानोपजीव्यं यथा **गन्धविषयीकरणयोग्यं घ्राणं सुरभिश्चन्दन**खण्ड इति प्रत्यक्षजनने चक्षुष उपजीव्यमिति **दृष्टान्त**माचष्टे **गन्धस्येति** ॥ ३७ ॥

श्रौतार्थज्ञापने मानान्युपजीवन्ति यच्छ्रुतिम् ।
अतश्श्रुत्येकगम्येऽर्थे श्रुतिरेव बलीयसी ॥ ३८ ॥

तत्त्वमस्यादिश्रुतेः यः सर्वज्ञ इत्यादिश्रुतिरप्युपजीव्येत्याशयेन मानानीत्युक्तम् । न केवलं प्रत्यक्षानुमाने इति भावः । यथोक्तं 'सार्वज्ञादिगुणं जीवाद्भिन्नं ज्ञापयति श्रुतिः ॥ ईशं तामुपजीव्यैव वर्तते ह्यैक्यवादिनी'ति ॥ ३८ ॥

तद्विरुद्धं तु यन्मानमुपजीव्यविरोधतः ।
न स्वार्थसाधकं तस्मादज्ञदृङ्नेशदोषदृक् ॥ ३९ ॥

दोषदृक् दोषे दर्शनरूपं प्रमाणम् ॥ ३९ ॥

नहि मन्ददृशां दृष्ट्या रत्नस्यानर्घतागता ।
किन्तु मन्दैव दृग्रत्नपरीक्षाशास्त्रतो भवेत् ॥ ४० ॥

'अनर्घं रत्नं' इति ज्ञाने अनर्घत्वांशे रत्नशास्त्रमुपजीव्यम् । प्रत्यक्षं तु रत्नस्वरूपमात्रं गोचरयति । विमतं रत्नं, न अनर्घं, शिलात्वात् इत्यनुमानं तु प्रतियोगिग्राहकत्वेन साध्यं प्रत्युपजीव्यं यद्रत्नपरीक्षाशास्त्रं तेन बाधितत्वान्नानर्घत्वबाधनस्येष्टे इत्याह **न हीति** । प्रत्युत उपजीव्यशास्त्रविरोधेनानुमानमेव बाध्यत इत्याह **किं त्विति** ॥ ४० ॥

श्रुतिस्तु निरनिष्टोऽसौ निरवद्य इति प्रभुम् ।
स्पष्टमाचष्ट तत्कष्टं द्रष्टुमीष्टे क ईशितुः ॥ ४१ ॥

तत्कष्टं तस्य धर्मिग्राहकश्रुत्या छेदाद्यवद्यदूरत्वेन सिद्धस्य परमात्मनः **कष्टं** छेदादिकं अवद्यम् । **द्रष्टुं** साधयितुम् । **ईशितुः** गुणदोषनियामकस्य । हेतुगर्भं विशेषणम् । दोषगन्धेनापि अस्पृष्टस्य ॥ ४१ ॥

न कर्मणा वर्धते यो नो कनीयान्परः प्रभुः ।
न भूत्यै नांहसो हत्यै तस्य यात्रा शिवार्चनम् ॥ ४२ ॥

तस्य कृष्णस्य, **यात्रा** कैलासं प्रतीति शेषः । **भूत्यै** पुत्रावाप्तिलक्षणैश्वर्याय । **तस्य** रामस्य **शिवार्चनं** सेतौ लिङ्गस्थापनम् । **अंहसः** रावणवधनिमित्तेन शङ्क्यमानपापस्य । उभयत्र हेतुः **परः प्रभुरिति । परः** सर्वोत्तमः **प्रभुः** पुण्यपापनियामकः । तत्र श्रुतिं प्रमाणयति । **न कर्मणेति । कनीयान्** ह्रासवान् । परिपूर्णस्य परस्य न वृद्धिह्रासंभव इत्याशयः ॥ ४२ ॥

न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन ।
नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि ॥ ४३ ॥

न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा ।
इति गीतावचनतस्समाधत्स्व मनस्सदा ॥ ४४ ॥

कर्तव्यं इष्टसाधनम् । लिङाद्यर्थस्तु इष्टसाधनत्वमेवेत्युक्तेः । **वर्त एवेति** अयोगव्यवच्छेदः । लोकसंग्रहायेति भावः ॥ ४३ ॥ ४४ ॥

ईजे च भगवान्रामो यत्रास्पृष्टोऽपि कर्मणा ।
लोकस्य संग्रहायेशो यथाऽन्योऽघापनुत्तये ।
इति भागवतोक्त्या च स्वस्थचित्तस्सदा भव ॥ ४५ ॥

ईशस्य प्रवृत्तिः परप्रयोजनार्थैवेत्यत्र भागवतं प्रमाणयति **ईजे इति** ॥ ४५ ॥

अथापि भगवद्दोषं वृथा यो मनुते नरः ।
तं दोषेषुः शिलाक्षिप्तदारुप्रोतशरोपमः ।
श्रुत्याकृष्टगुणोत्सृष्टैर्धानुष्कमनुधावति ॥ ४६ ॥

तस्मात्स्वमूलरूपे च स्वावतारेषु च प्रभुः ।
अवद्यगन्धविधुर इति सर्वं मनोरमम् ॥ ४७ ॥

अथापि निर्दोषतायाः सकलप्रमाणप्रमितत्वेऽपि । **वृथा** दुराग्रहमात्रेण । **श्रुतिः** वेदः । इषुपक्षे कर्णः । **आकृष्टाः** साधिताः । अन्यत्र स्पष्टम् । **गुणाः** आनन्दादयः अन्यत्र ज्या । **उत्सृष्टिः** अपलापः । अन्यत्र मोचनम् । **अनुधावति** अविलम्बेन तमसि पातयति । अन्यत्र परावृत्य विध्यति । यथोक्तं 'असन्नेव स भवति असद्ब्रह्मेति वेद चेदि'ति ॥ ४६ ॥ ४७ ॥

इदं रूप्यं रूप्यताऽत्रेत्येवं वा भ्रमविग्रहः ।
अन्योन्यधर्मानध्यस्य चान्योन्यात्मकता तथा ॥ ४८ ॥

इति भाष्यकृतो भाषा तेन भ्रान्तिर्द्विरूपिणी ।
तादात्म्यारोपरूपा वा धर्मारोपात्मिकाऽपि वा ॥ ४९ ॥

श्रीविष्णोः पराभिमतं मायाशबलत्वं निराकृत्य परब्रह्मत्वं सौरभशेषेण समर्थयिष्यन् मायिमतेऽज्ञानासंभवं तावदुपपादयति **इदमित्यादिना** । मायावादिना स्वाभिलषिताज्ञानसिद्धौ 'अहमज्ञ' इति प्रत्यक्षमुदाहृतम् । प्रत्यक्षं चारोपरूपमेवेति तन्मतम् । तत्र विकल्पः किमयं अज्ञानस्यैवारोपः उत प्राक् सिद्धस्याज्ञानस्य संबन्धमात्रारोपः । तत्राद्यं निराकर्तुं भ्रमस्वरूपं द्विविधमेवेत्येतत्परसंमत्यैव निर्धारयति द्वाभ्यां **इदमिति** । 'इदं रूप्यं' इति तादात्म्यारोपः । अत्र रूप्यत्वं इति संसर्गारोपः । **द्विरूपिणीति** । तृतीयः प्रकारो नास्ति इति भावः ॥ ४८ ॥ ४९ ॥

नाज्ञानमहमित्यस्ति नाज्ञानत्वं मयीत्यपि ।
भ्रमो ब्रह्मणि तेन स्यात्कथमज्ञानकल्पना ॥ ५० ॥

यावद्विशेषाभावादारोपसामान्याभाव इत्याह **नेति** ॥ ५० ॥

अज्ञोऽहमिति तु ज्ञानं सिद्धाज्ञानस्य वेदनम् ।
उक्ताकारद्वयायोगात्सिद्धिश्च भ्रमरूपिणी ॥ ५१ ॥

नास्त्येवेति कुतोऽज्ञानं कल्पितं स्यादियं तु धीः ।
नाज्ञानकल्पनारूपा ततोऽज्ञानमकल्पितम् ॥ ५२ ॥

उक्तरीत्या प्रतिभासानुपपत्तावपि अज्ञानसिद्धिः किं न स्यादित्यतस्तस्य प्रातिभासिकत्वोपगमान्नैवमित्याह **सिद्धिश्चेति** । नास्त्येवेत्यनेनान्वयः । इयं अज्ञोऽहमिति पूर्वोक्ता । **नेति** । किं तु प्राक्सिद्धाज्ञानस्य वेदनमिति भावः । **ततः** अन्यतराऽऽकारोपेतत्वरूपव्यापकाभावात् ॥ ५१ ॥ ५२ ॥

नाज्ञानमन्यधर्मोऽयं ब्रह्माज्ञानैकवादिनः ॥ ५३ ॥

एवं अज्ञानस्वरूपस्यैवारोप इति कल्पं निरस्य, प्राक्सिद्धस्य अज्ञानस्य संबन्धमात्रारोपः इति द्वितीयकल्पं प्रतिषेधति **नेति** । प्रत्यक् चैतन्ये तत्संबन्धारोपनिर्वाहायाज्ञानस्य प्राक्सिद्धिमभिलषता तस्याश्रयान्तरं वक्तव्यम् । निराश्रयस्य तस्यानवस्थानात् । न च तन्मते तदस्ति । चैतन्यातिरिक्तस्य जीवजडात्मकस्य सर्वस्याज्ञानकार्यत्वेन तदुत्तरकालीनत्वाङ्गीकारात् । चरमभाविनश्च पूर्वसिद्धं प्रत्याश्रयत्वानुपपत्तेः । यथोक्तं विवरणे 'आश्रयत्वविषयत्वभागिनी निर्विशेषचितिरेव केवला ॥ पूर्वसिद्धतमसो हि पश्चिमो नाश्रयो भवति' इति । तदाह **ब्रह्मेति** । तथा च प्राक्सिद्धेर्दुर्घटत्वेन नाज्ञानसंबन्धारोपोऽपि इति भावः ॥ ५३ ॥

अतद्वति च तद्वत्त्वज्ञानं चेत्स्यादयं भ्रमः ।
अज्ञानवच्च ते ब्रह्म तद्वत्ताधीः कथं भ्रमः ॥ ५४ ॥

किञ्च ब्रह्मणि अज्ञानरूपधर्मिणः संबन्धारोपे प्रमाणं वक्तव्यम् । अहमज्ञ इति धीरिति चेत् भ्रान्तोऽसि । इयं धीः संबन्धवत्येव ब्रह्मणि संबन्धं विषयीकुर्वन्ती प्रमैव । तया च संबन्धसत्यत्वमेव सिध्यति न पुनस्तस्यारोपितता । अस्या धियो भ्रमत्वं तदा स्यात् यदि अज्ञानसंबन्धरहिते जडे तत्संबन्धं सा विषयीकुर्यात् । नैतदस्तीति कुतस्तस्या भ्रमत्वं कुतश्च तद्बलेन अज्ञानसंबन्धारोपसिद्धिरित्याह **अतद्वतीति** ॥ ५४ ॥

अज्ञानारोपतस्तत्र तद्योगस्याप्यभाववाक् ।
अज्ञानारोपमूलैव स च सर्वत्र दुर्लभः ॥ ५५ ॥

विमतः अज्ञानसंबन्धः आरोपितः आरोपिताज्ञानप्रतियोगिकत्वात् इति प्रयुज्यत इति चेत् पूर्वोक्तं मा विस्मार्षीरित्याह **अज्ञानारोपत** इति । स्यादेवं प्रयोगो यदि अज्ञानारोप एव प्राक् सिद्धो भवेत् । स चाधिष्ठानानुपपत्त्या दूषित इत्याह **स इति** । **दुर्लभः** दुरुपपादः । **सर्वत्र** ब्रह्मणि अन्यत्र च । प्रतियोग्यारोपे यत्प्रधानं तदाश्रयत्वेन ब्रह्मणः, अज्ञानोत्तरकालीनत्वेन चान्यस्येति कस्याप्यधिष्ठानत्वानुपपत्तेरिति भावः । तथा च हेतोर्विशेषणासिद्धिरिति हृदयम् ॥ ५५ ॥

अन्योन्यधर्माध्यासोऽस्ति तत्राध्यासस्तवापि न ।
अतो नाज्ञानसंसर्गारोपोऽप्ययमभूत्तव ॥ ५६ ॥

अन्योन्यधर्मेति । एतदुपलक्षणम् । अन्योन्यतादात्म्येत्यपि ग्राह्यम् । **तव** मते इति शेषः । न केवलं स्वभावाज्ञानवादे इत्यपेरर्थः । **अतः** त्वन्मतविरोधात् । **अयं** अहं अज्ञः इत्यनुभवः । देहगतकृशत्वादिधर्मसंसर्गारोपवत् अज्ञानत्वसंसर्गारोप एव त्वया वक्तव्यः । अज्ञानसंसर्गारोपवचने कथं नापसिद्धान्त इति भावः ॥ ५६ ॥

तत्रैव सन्निकृष्टस्य सन्निकर्षे कथं भ्रमः ।
घटवद्भूमिघटयोस्संयोगो यदकल्पितः ॥ ५७ ॥

तत्रैव धर्मिण्येव । **सन्निकृष्टस्य** संसर्गवतः, विद्यमानस्य इति यावत् । **सन्निकर्षे** प्रकारतयाऽवभासे । **भ्रमः** भ्रमत्वम् । न हि विशेष्यवृत्तिधर्मप्रकारकत्वे ज्ञानस्य भ्रमत्वं इत्येतद्दृष्टान्तोक्त्याऽभिनीय दर्शयति **घटवदिति** ॥ ५७ ॥

दोषाभावाच्च नाज्ञानभ्रान्तिर्युक्ता मते तव ।
तमोऽन्यभ्रमदोषोऽपि न हि दोषः स्वदर्शने ॥ ५८ ॥

तमोऽन्तरं च तमसः प्रमायै स्याद्भ्रमाय न ।
तेनाज्ञानान्तरं चाज्ञानस्योपोद्बलकं भवेत् ॥ ५९ ॥

अज्ञानज्ञानं, न भ्रमः, दोषाजन्यत्वात् साक्षिवत् व्यतिरेकेण रूप्यभ्रमवत् इति प्रयोगमभिप्रेत्याह **दोषेति** । न चासिद्धिः दोषस्य दुर्निरूपत्वात् । तथाहि, दोषो भवन्नज्ञानं वा तदन्यो वा । न द्वितीयः सर्वमज्ञानातिरिक्तं अज्ञानकार्यमिति तव मतेऽन्यस्यासंभवादित्याह **दोषाभावादिति तवेति च** । आद्येऽपि तदेवाज्ञानं स्वयं स्वभ्रान्तौ दोषः अज्ञानान्तरं वा । नाद्यः अनुभवविरोधादित्यत्र दृष्टान्तमाह **तम इति** । आत्माश्रयापत्तेरिति भावः । द्वितीये च तत्सत्यं मिथ्या वा । आद्ये तज्ज्ञानस्य प्रमात्वं स्यान्न भ्रमत्वमित्याह **तमोऽन्तरमिति** । तथा चाज्ञानमात्रमारोपितमिति वादो दत्तजलाञ्जलिः । **उपोद्बलकं** सत्यत्वस्थापकम् ॥ ५८ ॥ ५९ ॥

प्रमाया एव हेतुस्स्यात्तद्भूयस्त्वे क्व तद्भ्रमः ।
अतद्वति हि तद्धीत्वे भ्रमः स्यान्न तु तद्वति ॥ ६० ॥

भूयस्त्वे प्रतिभासमानं एकं तमः अज्ञानं वा । दोषविधया तत्प्रतिभासे कारणीभूतं अपरं तमः अज्ञानं इत्येवं भूयस्त्वे । **अतद्वतीति** । उपपादितं चैतदधस्तात् ॥ ६० ॥

अनाद्यज्ञानवादे च तस्याज्ञानं न किञ्चन ॥ ६१ ॥

किं च परेणाज्ञानस्यानादित्वमङ्गीकृतम् । यथोक्तं 'अविद्या तच्चितो-र्योगः षडस्माकमनादयः' इति । अज्ञानस्य प्रातिभासिकत्वं च । तेनाज्ञान-ज्ञानमप्यनाद्येवेति तस्य जन्यत्वमेव नेत्याह **अनादीति** । **तस्य** अज्ञानज्ञानस्य । **किञ्चन** कारणीभूतम् । जन्यत्वस्यैवाभावात् ॥ ६१ ॥

किं च प्रातीतिकाज्ञानं कथं स्वभ्रमकारणम् ।
भ्रमात्पूर्वो हि दोषस्स्याद्दोषजश्च भ्रमो भवेत् ॥ ६२ ॥
दोषे धीस्स्याद्भ्रमाकारा भ्रमे सत्येव तच्च सत् ।
प्रातीतिकं भवेद्दोष इत्यन्योन्याश्रयो ध्रुवः ॥ ६३ ॥

प्रतीतिरेवाज्ञानमिति परमते नाज्ञानस्य प्रतीतिकारणत्वं निर्वहतीत्याह द्वाभ्यां **किं चेति** ॥ ६२ ॥ ६३ ॥

किं चाज्ञानाध्यासरूपी साक्ष्यनादिर्मते तव ।
जन्मैवास्य न युक्तं तद्दोषजत्वं तु दूरतः ॥ ६४ ॥

अध्यासेति । प्रतिभासेत्यर्थः । तदुक्तं सुधायां जिज्ञासानये 'न खलु साक्ष्यवभासादन्याऽज्ञानसत्ता तवास्ति' इति । स च साक्षी अनादिरङ्गी-कृतः 'जीव ईशो विशुद्धचिदि'ति तद्वचनात् । तस्य च जन्यत्वं व्याहतम् । दोषजन्यत्वं तु गर्भस्रावेणैव निरस्तमिति भावः ॥ ६४ ॥

अमानत्वस्वतस्त्वं स्याद्दोषाजन्यो भ्रमोऽपि चेत् ।
अतः प्रमीयमाणत्वात्त्वय्यज्ञानमकल्पितम् ॥ ६५ ॥

उक्तानुमानेऽप्रयोजकतामाशङ्कते **दोषेति** । विपक्षे बाधकोक्त्या परिहरति **अमानत्वेति** ॥ मथितमाह **अत इति** । **प्रमीयमाणत्वात्** अहमज्ञ इत्यबाधितप्रत्यक्षसिद्धत्वात् । **त्वयि** त्वदुपलक्षितजीवेषु । त्वयी- त्यावर्तते । विषयसप्तमी । जीवगतपारतन्त्र्यादिधर्मविषये । एवं **त्वयि** त्वदन्तर्यामिपरमात्मविषये च । यद्वा **त्वयि** मायावादिनि । **अज्ञानं** अज्ञानारोप- विषयकमिथ्याज्ञानं **अक्लृप्तं** स्वभावः इति यावत् । तदुक्तं सुधायां 'स्वयमेव भवत्यस्तीति स्वभावः नाज्ञानकल्पित इति यावदि'ति ॥ ६५ ॥

तत्त्वज्ञानायोग्यताख्यदोषोऽस्त्यासुरसाक्षिषु ।
तन्मूलत्वं च तज्ज्ञाने विशेषाद्धटते मम ॥ ६६ ॥

ननु न सर्वत्राप्रमाया दोषजन्यत्वमिति नियमः । आसुरसाक्षिणां तमोयोग्यानां स्वरूपज्ञानं तावन्नियमेनायथार्थमङ्गीकृतम् । तदुक्तं पद्धतौ 'अन्येषां अयथार्थमेवे'ति । न च तद्दोषजन्यम् । स्वरूपत्वेनानादित्वात् । तथाऽज्ञानारोपः अनादिरपि दोषाजन्यः किं न स्यादिति शङ्कां तेषां स्वरूप- ज्ञानेऽपि दोषसद्भावोक्त्या परिहरति **दोष इति** । कोऽसौ दोष इत्यत आह **तत्त्वज्ञानायोग्यताख्येति** । उपलक्षणम् । विपरीतज्ञानयोग्यतेत्यपि ग्राह्यम् । ननु दोषसद्भावेऽपि न तज्जन्यत्वं तेषामयथार्थज्ञानस्य संभवति । तस्य तत्स्वरूपत्वेनानादित्वादित्यत आह **तन्मूलत्वमिति** । तद्व्यक्तत्वरूपं तत्प्रयोज्यत्वमित्यर्थः । तथा च अनादेः कथं जन्यत्वमिति चोद्यानवकाशः । न च प्रयोज्यत्वेऽपि चोद्यं सममेव । तद्व्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वरूपतद- धीनत्वस्य अनादिष्वप्यविकलत्वात् । अन्यथा परमते अनादेर्जीवब्रह्मविभागस्य अनाद्यज्ञानाधीनत्वोपगमस्यानुपपत्तेः । ननु च योग्यता अयथार्थज्ञानं चेति द्वयमपि स्वरूपमेव । कथं तयोर्व्यंग्यव्यंजकभावोऽपि । तस्य भेदेनैव निर्वाह्यत्वादिति चेत् सत्यम् । यत्राभेदो न प्रमित आलोकघटादिषु तत्रैव-

मेतत् । प्रमिते त्वभेदे भेदकार्यव्यवहाराणां तत्प्रतिनिधिना विशेषेण निर्वाहान्नानुपपत्तिरित्याह **विशेषादिति** । तदुक्तं भगवत्पादैः 'भेदहीने त्वपर्यायशब्दान्तरनियामकः । विशेषो नाम कथित' इति । विशेषलक्षणं चोक्तं तत्रैव सुधायां 'भेदहीनेऽप्यनुपचरितभेदव्यवहारनिमित्तं विशेष इति' । अयं च निर्वाहो विशेषाङ्गीकारिणो मन्मत एव घटत इत्याह **ममेति** ॥ ६६ ॥

निर्विशेषचितो दोषः कस्स्याज्जन्म च किं तव ।
अज्ञानारोपवादस्तदज्ञानादेव केवलम् ॥ ६७ ॥

तव मते तु निर्विशेषचितोऽज्ञानसाधकत्वं दुर्घटमेवेत्याह **निर्विशेषेति** । अज्ञानावभासस्य निर्विशेषचित्स्वरूपत्वोररीकारादिति भावः । उपसंहरति **अज्ञानेति** । **अज्ञानात्** आरोपस्वरूपस्य तद्धेतुदोषादिविवेकस्य चेति शेषः ॥ ६७ ॥

अज्ञानारोपमूलस्ते शास्त्रविस्तृतपादपः
मूलस्य दुर्बलत्वे तु सोऽपि वाताहतः पतेत् ॥ ६८ ॥

'अज्ञानासंभवादेव तन्मतमखिलमपाकृतमि'ति मायावादखण्डनोक्तं पञ्चभिर्विवृण्वन्नाह **अज्ञानेति** । **मूलेति** अनुबन्धचतुष्टयसाधकाभिमतेत्यर्थः । **विस्तृतेति** शब्दत एव विस्तरोपेतेति यावत् । तदुक्तं 'प्राच्यं शास्त्रं यत्सपादं तु लक्षमि'ति । अर्थतस्तु न तथेत्याह **मूलस्येति** । साधकतयोपन्यस्तमानाभासजालस्य **दुर्बलत्वे** सावकाशत्वादिना स्वाभिमतसाधनाक्षमत्वे । **वाताहतः** वाय्वंशमध्वोक्तिदूषितः **पतेत्** अनारम्भणीयतामापद्यते । अपिः गर्हणार्थः । निर्मूलो विस्तरो गर्हणीय एवेति भावः । अत एवोक्तं 'वाक्येनैकेनाक्षिपद्धर्षतीर्थ' इति ॥ ६८ ॥

सत्याज्ञानभवं विश्वमसत्यं केन हेतुना ।
आम्रस्य बीजतः किं स्याद्विषवृक्षस्य संभवः ॥ ६९ ॥

विश्वं असत्यं असत्याज्ञानोपादानकत्वादिति खलु हेतुः पराभिमतः । स त्वसिद्धः । आरोपनिराकरणेन अज्ञानसत्यतायाः समर्थितत्वादित्याह **सत्येति** । उपादानस्य सत्यत्वेऽपि उपादेयं असत्यं किं न स्यादिति संशयं बाधकशंसनेन हिंसयति **आम्रस्येति** । बीजस्य सत्यत्वे वृक्षस्य तदुत्पन्नस्य सत्यत्वं नियतमित्यत्रैव तात्पर्यम् । बीजस्याम्रेतिविशेषणं सत्यतावादस्यामृतफलहेतुत्वं, वृक्षस्य विषेतिविशेषणं च मिथ्यावादस्य अनर्थहेतुत्वं ध्वनयितुमेवेत्यवधेयम् । वस्तुतस्तूत्पत्तिमात्रेणैव विश्वसत्यत्वसिद्धिरिति हृदयम् । उत्पन्नं च मिथ्येति च व्याघातः । न खलु यत्प्रागभावप्रतियोगि तत्त्रैकालिकनिषेधप्रतियोगीति संभवति । तदुक्तं 'न निरोधो न चोत्पत्तिः' इति गौडपादकारिकाव्याख्याऽवसरे मायिभाष्यकारेणैव 'सतो हि घटादेरुत्पत्तिर्विनाशो वा दृष्टः । नासतः शशविषाणादेरि'त्यादि ॥ ६९ ॥

सत्याज्ञानागतो भेदो ज्ञानबाध्यः कथं तव ।
सत्याज्ञाननिवृत्तेश्चायोगान्मोक्षः कथं तव ॥ ७० ॥

'षडस्माकं अनादयः' इति वचनेन मायिभिः ब्रह्मवदज्ञानस्य भेदस्य च उभयोरनादित्वमङ्गीकृतम् । तत एव तद्वदेव तयोः सत्यत्वं च सेत्स्यति । अनादित्वाद्भेदस्य नाज्ञानोपादानकत्वं संभवति । कथंचिदज्ञानागतत्वाङ्गीकारेऽपि उक्तरीत्योभयोरपि सत्यत्वाज्ज्ञानबाध्यत्वं सुदूरपराहतमित्याह **सत्येति** । किं च आस्तां बाधवार्ता निवृत्तिरप्यज्ञानस्य त्वन्मतेऽसंभाविनीत्याह **सत्येति** । यदि सत्यस्य निवृत्तिस्तर्हि आत्मनोऽपि निवृत्तिः स्यादिति प्रसङ्गमभिदधता त्वया सत्यस्य कस्यापि निवृत्त्यनङ्गीकारादिति भावः । माऽस्तु अज्ञाननिवृत्तिः का मे क्षतिरित्यत आह **मोक्षः कथं तवेति**

'अविद्याऽस्तमयो मोक्षः' इति त्वत्पक्ष शास्त्रस्य प्रयोजनं व्याहन्यते इत्याशयः ॥ ७० ॥

अज्ञानासंभवे क्व स्यात्प्रतिकर्मव्यवस्थितिः ।
ऐक्यस्यावरणाभावाच्छास्त्रवेद्यं च किं भवेत् ॥ ७१ ॥

अज्ञानस्य सत्यत्वं परं प्रति प्रसाध्य तदनिवृत्त्युक्त्या दोषोऽभिहितः । इदानीं परमतेऽज्ञानासंभव एवेत्याह **अज्ञानासंभव** इति ॥ तथा हि । अज्ञानं सत्यं तेनाद्वैतभङ्गभीरुणा नाङ्गीकृतम् । न च अनिर्वचनीये किञ्चिन्मानम् । अतः परिशेषादसत्त्वमेवापततीति भावः । किं तत इत्यत आह **क्वेति** । अयमाशयः । अज्ञानावरणाभावे अनावृतब्रह्मचैतन्यस्य सर्वान्प्रत्यविशिष्टत्वात्तत्रारोपितं घटादिकं सर्वं सर्वदा सर्वेषां प्रकाशेतेति अतिप्रसङ्गेऽभिहिते यत्सन्निकृष्टकरणजन्यवृत्तिर्यदाकारा यदा च भवति वृत्त्युपारूढचैतन्येन चाज्ञाननिवृत्तिः स एवं तं प्रत्येव कदाचित्प्रकाशते न सर्वदेत्यतिप्रसङ्गः परिहर्तव्यः । इयं च प्रतिकर्मव्यवस्थितिः अज्ञानसद्भाव एव संभवति नान्यथा । उक्तरीत्याऽज्ञानासंभवेऽतिप्रसङ्गो दुष्परिहर एवेति । किञ्च त्वन्मते शास्त्रस्य ऐक्यमेव विषयः । तच्च ब्रह्मस्वरूपम् । अज्ञानाभावे स्वप्रकाशतया नित्यसिद्धत्वान्न ब्रह्मण ऐक्यस्य वा शास्त्रविषयत्वं सङ्घाघटीतीत्याह **ऐक्यस्येति** ॥ ७१ ॥

अज्ञानासंभवाद्ब्रह्मभ्रान्त्या सर्वं न कल्पितम् ।
अज्ञानासंभवादेव शास्त्रं सर्वं गतं तव ॥ ७२ ॥

अपि चार्थज्ञानात्मकस्य भ्रमस्य परेणाज्ञानोपादानकत्वमुररीकृतम् । अज्ञानासंभवे भ्रान्तिस्तदात्मकं सर्वं च न संभवतीत्याह **अज्ञानेति** । तथा च अज्ञस्य अधिकारिणः, अज्ञातस्य विषयस्य, अज्ञाननिवृत्तेः प्रयोजनस्य चायोगात्तत एव च तत्सबन्धस्याप्यनुपपत्तेपः अनुबन्धचतुष्टयविरहात्सर्वं तच्छास्त्रं अनुपादेयमेवेत्याह **अज्ञानासंभवादेवेति** ॥ ७२ ॥

किं चाज्ञानस्य विज्ञानमहमित्येव देहिनाम् ।
आशा ब्रह्माश्रिताज्ञाने पश्य किं केन सङ्गतम् ।। ७३ ।।

आरोपासंभवात्परमतेऽज्ञानं निराकृत्य, आश्रयासंभवादपि तन्निराकरोति **किञ्चेत्यादिभिः** । तथा हि । अज्ञानं खल्वाश्रयसद्भावेन व्याप्तम् । आश्रयश्च ब्रह्म वा जीवो वा वक्तव्यः । तत्र न तावद्ब्रह्माश्रयः संभवति । प्रमाणाभावात् । न च वाच्यं अहमज्ञः इति प्रत्यक्षमेव तत्र प्रमाणमिति । यतः अत्राहमर्थो जीव एव । 'अहमित्येव यो वेद्यो स जीव इति कीर्तितः । स दुःखी स सुखी चैव स पात्रं बन्धमोक्षयोरि'ति तत्वनिर्णयोदाहृतपरमश्रुतेः । तथा च जीवाश्रिताज्ञानसाधकस्यैतस्य प्रत्यक्षस्य ब्रह्माश्रिताज्ञानसाधनायोपन्यासोऽसङ्गत एवेत्याह **किमिति** ।। ७३ ।।

ऐक्यात्तदेव चेद्ब्राह्ममन्योन्याश्रयता तदा । ।। ७४ ।।
ऐक्यसिद्धौ भवेदज्ञं ब्रह्म तस्याज्ञतावशात् ।
जीवभावे भवेदैक्यं ततोऽन्योन्याश्रयो न किम् ।। ७५ ।।

ननु ब्रह्मैवाज्ञानवशाज्जीवभावमापद्यते । अतस्तयोरैक्यान्नासङ्गतिरिति चेदज्ञानसिद्ध्युत्तरकालीनैषा कल्पना । अन्यथाऽन्योन्याश्रयापत्तेरित्याह **ऐक्यादिति** ।। ७४ ।। ७५ ।।

तान्यहं वेद सर्वाणीत्युक्त्या कृष्णस्य सर्वदा ।
अस्ति सर्वज्ञताध्यक्षं न त्वज्ञानापरोक्षधीः ।
मनसा ध्यातमेवार्थं वदेद्वाचा किलाखिलः ।। ७६ ।।

किञ्चेश्वरस्य सर्वज्ञत्वं तत्प्रत्यक्षेणैव सिद्धम् । अतो न तत्राज्ञानं शक्यकल्पनं इत्याह **तान्यहमिति** । वेद इति क्रियासातत्ये लट् तेन सर्वदेत्युपपन्नम् । ननु परचित्तवृत्तेरप्रत्यक्षत्वात्कथमस्माकं तत्प्रत्यक्षसिद्धिरित्यत

आह **उक्त्येति** । वचनलिङ्गकानुमानेनेत्यर्थः । ईश्वरः सार्वज्ञप्रत्यक्षवान् तद्व्यवहर्तृत्वात् इति प्रयोगो ज्ञेयः । न चाप्रयोजकतेत्याह **मनसेति** । यद्यपि व्यवहारेण व्यवहर्तव्यज्ञानमात्रं सिध्यति । न तु तस्य प्रत्यक्षात्मकत्वमपि । तथाऽपीश्वरज्ञानस्य स्वरूपेन्द्रियैरभिव्यज्यमानत्वस्य प्रमितत्वेन प्रत्यक्षात्मकत्वमेव सिद्ध्यति । यद्यपि ईश्वरस्य मुक्तानां च प्रमा शब्दादिभिरप्यभिव्यज्यते । अन्यथा तान् प्रति शब्दव्यवहारवैकल्यं स्यात् । तथाऽपि न तेषां स्वातन्त्र्येणाभिव्यञ्जकता । किन्तु स्वरूपज्ञानाभिव्यञ्जकस्वरूपेन्द्रियसहकारितैव । अत्र विस्तरोऽभिनवताण्डवे 'स्वमते प्रत्यक्षप्रमानिरूपण' भङ्गे । तदेतदभिप्रेत्योक्तं **अध्यक्षमिति** ॥ ७६ ॥

अतस्सर्वज्ञताध्यक्षहर्यक्षस्य गुहामिमाम् ।
अज्ञानाध्यक्षहरिणी जैवी नैव विवक्षति ॥ ७७ ॥

'अज्ञताऽखिलसंवेत्तुर्घटते न कुतश्चने'ति भगवत्पादोक्तिमनुरुध्योपसंहरति **अत इति** । **सर्वज्ञताऽध्यक्षस्य** स्वप्रत्यक्षसिद्धसार्वज्ञाश्रयस्य ब्रह्मणः इति यावत् । **हर्यक्षस्य** नृसिंहस्य भगवतः । **गुहां** स्वरूपम् । **अज्ञताऽध्यक्षहरिणी** जीवप्रत्यक्षसिद्धा हरिणीवर्त्मांचे जीवे स्थिताऽज्ञता इति यावत् । **न विवक्षति** न सम्बध्नाति । तदुक्तं न्यायामृते 'सर्वं हि यो विजानाति तस्य कुत्रापि नाज्ञता ॥ न हि यो यद्विजानीते स तत्राज्ञानवान्भवेत्' इति ॥ ७७ ॥

प्रत्यक्षमेषयोर्युद्धे तच्चैक्यं जम्बुकायते ।
तस्माद्ब्रह्माश्रिताज्ञानप्रत्यक्षं मरणेऽपि न ॥ ७८ ॥

प्रत्यक्षे मेषाविव तयोः । **युद्धे** सहानवस्थानलक्षणविरोधे । एकाश्रयैकविषयकज्ञानाज्ञानयोर्विरोधादित्याशयः । **तत्** विरुद्धधर्मत्यागेन त्वयाऽऽशास्यमानम् । अयं आशयः । ब्रह्मणः प्रत्यक्षं तत्सार्वज्ञं गोचरयति ।

जीवस्य प्रत्यक्षं तु जीवस्यैवाज्ञानं आलम्बते । ततश्चैतयोर्भिन्नविषयकत्वात् विरोध एव नास्ति । त्वया तु मायिना अविद्यमानमेव सर्वज्ञताऽज्ञतयोरेकाधिकरणत्वं प्रकल्प्य ततः विशिष्टैक्ये विरोधशङ्कामुत्थाप्य भागत्यागलक्षणया उभे प्रत्यक्षे अप्रमाणीकृत्य चिदैक्यं आशास्यते । यथा जम्बुकः सुहृदोर्मेषयोर्मिथो युद्धमुत्पाद्य तन्मरणे सति तद्रुधिरपानमाशास्ते तद्वत् । वस्तुतः भृत्यः अज्ञो जीवः स्वामिना सर्वज्ञेन ब्रह्मणा ऐक्यचिन्तनलक्षणं विरोधं नैव विदधाति । येन भागत्यागलक्षणावसरः । किं नाम 'द्वा सुपर्णा सयुजा सखायौ' इति श्रुतिसिद्धसख्येनैव तमनुवर्तते । सुहृदोर्मेषयोर्युद्धस्यैवाभावे कुहकगोमायोर्यथा न दुराशापूर्तिस्तथा मायिगोमायोस्तवापि न ऐक्यदुर्मनोरथसिद्धिरिति ॥ **मरणेऽपि नेति** । तवेति शेषः । विरुद्धधर्मयोर्यावद्धर्मिभाविनोस्तत्तत्स्वरूपत्वेन कस्यामप्यवस्थायां न संभवति । तदुक्तं भगवत्पादैः 'घटते न कुतश्चने'ति ॥ ७८ ॥

प्रत्यक्षेणाज्ञतासिद्धौ ब्रह्मणो ज्ञानरूपिणः ।
अविद्यादुर्घटत्वेन घटना स्यात्कथञ्चन ॥ ७९ ॥

ननु, यदुक्तं 'अखिलसंवेत्तुरज्ञता न घटते' इति तदयुक्तम् । अविद्यावशादेव दुर्घटस्यापि घटनोपपत्तेः । 'अन्योन्याश्रयादीनां चाविद्याया भूषणत्वोपगमात् । तदुक्तं अविद्याया अविद्यात्वमिदमेवात्र लक्षणम् । यद्विचारासहिष्णुत्वं अन्यथा वस्तु सा भवेदि'ति । अनवस्थाऽऽदिदूषणानां तत्स्वरूपोपपादकत्वेन तदपलापकत्वायोगादिति । मैवम् । स्यादप्येतदेवं यदि अविद्यास्वरूपमेव सिद्धं भवेत् । तदेव न संभवति आश्रयानुपपत्तेरित्युच्यमानत्वात् । स्वरूपस्यैवासिद्धौ दुर्घटघटनास्वभावकल्पनमनवसरदुःस्थमित्याह **प्रत्यक्षेणेत्यादिना** ॥ ७९ ॥

तदसिद्धौ श्रौतसार्वज्ञस्यैवानुभवे सति ।
उपयन्तुरभावात्ते कुमारीभूषणं वृथा ॥ ८० ॥

अज्ञोऽहमिति नैवं प्रत्यक्षं न ब्रह्मणि अज्ञतामाधातुमलं व्यधिकरणत्वादिति समर्थितम् । किं तत इत्यत आह **श्रौतेति** । उपलक्षणं स्मार्तेत्यपि ग्राह्यम् । अनुभव एवेति संबन्धः । तेनाज्ञानानुभवव्यवच्छेदः । **उपयन्तुः** वोढुः । अविद्यापक्षे आश्रयस्य । **अभावादिति** । आश्रयो भवन् जडो वा जीवो वा ब्रह्म वा भवेत् । नाद्यौ त्वयाऽनङ्गीकारात् । न तृतीयः दूषितत्वात् । तथा च यावद्विशेषाभावात्सामान्याभावः इति भावः । अभावादित्यनुवर्तते । अविद्याया इति शेषः । ततश्चाश्रयस्याभावाद्धेतोरविद्याया अप्यभावादसंभवात् । कुमार्याः आश्रयरूपभर्तृरहिताया अविद्याया **भूषणं** अनवस्थित्यादिदूषणानां भूषणत्वमङ्गीकृत्योपपादनप्रयासः **वृथा** त्वत्समीहितैक्यसिद्धये नावकल्पते । ते इत्यनेन स्वमते तु जीवाश्रितं अज्ञानमित्यङ्गीकारान्न कोऽपि दोष इति ध्वनयति । तदुक्तं 'स्वभावाज्ञानवादस्य निर्दोषत्वान्न तद्भवेदि'ति ॥ ८० ॥

मायां व्युदस्य चिच्छक्त्येत्युक्तिश्वश्रूः क्षणे क्षणे ।
उदूढामपि तां कन्यां हन्यादेवेति मे मतिः ॥ ८१ ॥

स्यादेतत् । अज्ञानं चिदाश्रितमित्यङ्गीक्रियते । स्वरूपज्ञानस्य चितोऽज्ञानाविरोधित्वान्नानुपपत्तिरिति । नैवम् यतः त्वदङ्गीकार एव प्रमाणविरुद्धत्वादनुपपन्न इत्याह **मायामिति** । इदं च भागवतवचनम् । 'कैवल्ये स्थित आत्मनी'ति वाक्यशेषः । अत्र च वाक्ये केवलस्य वृत्त्यसहकृतस्यैव स्वरूपज्ञानस्य चिच्छक्त्या मायाशब्दिताज्ञानव्युदासो वर्ण्यते । अतः स्वत एवाज्ञानविरोधिन्याः चितो न अज्ञानाश्रयत्वं इति । इयं चोक्तिरुपलक्षणम् । 'न यस्य मायागुणचित्तवृत्तिभिर्निरीक्षतो ह्यण्वपि दृष्टिरज्यते' इत्याद्युक्तयोऽपि ग्राह्याः । **श्वश्रूः** 'जनितोत विष्णोरि'त्यस्य सन्न्यायरत्नावलीव्याख्यानोक्तरीत्या परमात्मनः सार्व-

स्वरूपस्य प्रादुर्भावयितृत्वात् जनित्री । **क्षणे क्षणे** प्रतिपदम् । उद्दाम- पीत्यपिपदेन उद्वाहशब्दितं संबन्धं गर्हयति । एवेत्येतत्कन्यामित्यनेनापि संबध्यते । कन्यामेव न कदापि उद्दाम् । उपयन्तुराश्रयस्याभावादि- त्युक्तम् । **हन्यात्** आश्रयाभावोपपादनमुखेन तत्सत्तां निराकुर्यात् ॥ ८१ ॥

स्वानर्हालंकृतिं तस्यास्सहेत कथमैश्वरीम् ।
नापि जीवस्य योग्येयमन्योन्याश्रयदोषतः ॥ ८२ ॥

स्वेति स्वस्याः अविद्यायाः । **अनर्हां** अङ्गीकर्तुं अशक्याम् । **अलंकृतिं** प्रमितस्य सर्वस्य घटनायां शक्तिम् । **तस्याः** दुर्घटैकस्वभावत्वेन पराभ्युपगतायाः । कस्य तर्हि साऽर्हा इत्यत आह **ऐश्वरीमिति** । यद्वा **स्वस्याः** केवलायाः ईश्वरशक्त्यननुगृहीतायाः श्रुतेरपि । **अनर्हां** घटयितु- मशक्याम् । **अलंकृतिं** अणुत्वमहत्त्वादीनां ईश्वरनिष्ठानां समावेशोपपादन- शक्तिम् । कस्य तर्हि सा शक्तिरत आह **ऐश्वरीमिति** । तदुक्तं गुण- सौरभे 'प्रमाणदृष्टघटना कार्या सैव यथामति ॥ न शक्यते चेत्सर्वेशा- चिन्त्यशक्त्यैव सेत्स्यती'ति ॥ वाचस्पत्यभिमतजीवाश्रिताज्ञानपक्षनिरा- क्रियामुपक्रमते **नापीति** ॥ ८२ ॥

जीवो ह्यज्ञानकल्प्यस्ते सोऽज्ञानस्य कथं मही ।
न हि भार्यैव भर्तारं सूते यत्नशतैरपि ॥ ८३ ॥

विवरणोक्तान्योन्याश्रयदूषणमाह **जीव इति** । तदुक्तं विवरणे 'पूर्वसिद्धतमसो हि पश्चिमो नाश्रयो भवती'ति । **मही** आश्रयः । **कल्प्यः** कार्यः, अत एवोत्तरकालीनः । अर्थान्तरं न्यस्यति **नेति** । अत्र भर्तृभार्या- शब्दौ पूर्वोत्तरकालीनपरौ ॥ ८३ ॥

जीवसिद्धौ तदाधारमज्ञानं ते प्रसिद्ध्यति ।
अज्ञानसिद्धौ तत्कल्प्यो जीवस्सिद्ध्येन्न चान्यथा ॥ ८४ ॥

तदाधारमिति बहुव्रीहिः । ते इत्यनेन स्वभावाज्ञानवादे स्वमतेऽनुपपत्त्यभावं ध्वनयति ॥ ८४ ॥

यद्यज्ञानं विनैव स्याज्जीवोऽनादिस्स्वतस्तदा ।
सत्यो जीवेशभेदस्स्यात्तस्मादज्ञानकल्पितः ।
जीवोऽवश्यं त्वया वाच्यः कथं नान्योन्यसंश्रयः ॥ ८५ ॥

ननु जीवाश्रितत्वेनाज्ञानस्य तदधीनत्वेऽपि जीवस्याज्ञानाधीनत्वाभावान्नान्योन्याश्रय इत्यतो नैवं त्वन्मते संभवतीत्याह **यदीति** ॥ **तदा** अज्ञानकार्यत्वानङ्गीकारे । **सत्य** इति । जीव इति संबध्यते । **स्यादिति** च । अज्ञानतत्कार्यत्वान्यतरत्वस्यैव मिथ्यात्वोपगमादिति भावः । अस्तु जीवोऽपि सत्यः किं तत इत्यतः **सत्यः स्यात् इति** आवृत्त्या योजनीयम् । भेद इत्यनेन संबध्यते । ईशवत्सत्यस्य जीवस्य ततो भेदावश्यंभावात् । तथा चापसिद्धान्त इत्याशयः । तथा च यदि जीवोऽज्ञानकल्पितो न स्यात्तर्हि सत्यः स्यात् ततश्च जीवेशभेदः सत्यः स्यात् इति तर्कः अभिप्रेतः । विपर्ययपर्यवसानमाह **तस्मादिति** । फलितमाह **कथमिति** ॥ ८५ ॥

जीवोपाधिरविद्यैव लये सुप्तौ च वर्तनात् ॥ ८६ ॥

ननु जीवोपाधिरन्तःकरणमङ्गीक्रियते नाज्ञानम् । तेन नान्योन्याश्रय इत्यत एवं तर्हि उपाधिखण्डनोक्तरीत्या चक्रकापत्तिः । अज्ञाने सति तत्कार्यमन्तःकरणं तेन तदुपाधिको भेदः, तेन च भिन्नाश्रिताज्ञानमिति । एवं दोषे सत्येव दोषान्तरं चाह **जीवेति** । एवकारेणान्तःकरणादिव्यवच्छेदः । तत्र हेतुः **लयेति** । अन्तःकरणाद्यभावेऽपि लये सुप्तौ च त्वन्मते जीव-

भावानुवृत्तेः । न ह्युपाधिनिवृत्तावौपाधिकमवतिष्ठते । जीवभावनिवृत्तौ मुक्ताविव पुनर्निर्मूलसंसारप्रत्यावृत्त्यनुपपत्तिः ॥ ८६ ॥

अनादित्वेनानवस्थादोषस्य स्यात्कचिच्छमः ।
अन्योन्याश्रयदोषस्तु क्षोण्यां शून्यप्रतिक्रियः ।
यदङ्कुराद्धि यद्बीजं किं तद्बीजात्तदङ्कुरः ॥ ८७ ॥

अथापि स्यात् । जीवाज्ञानयोरनादित्वमाश्रीयते । 'षडस्माकमनादयः' इति पूर्वाचार्यवचनात् । अतो नान्योन्याश्रयः । नाप्यनवस्था । बीजाङ्कुरन्यायेन तस्या अदोषत्वोपपत्तेः । अनवस्थितासिद्धकारणापेक्षायां खलु मूलक्षयकारिण्यास्तस्या दोषत्वम् । अत्र च मिथ्याभूतस्याज्ञानस्य जीवाश्रितत्वलक्षणं मूलं अहमज्ञ इति प्रमितम् । अतः कथमत्र सा दोषो भवेदित्यत आह **अनादित्वेनेति** स्यादप्येवं कथञ्चिदनवस्थानिस्तारः । अन्योन्याश्रयस्तु दुष्परिहर इत्याह **अन्योन्येति** । न चानादित्वोपगमेन तत्परिहारः । अत्र प्रष्टव्यम् । किमेवं वदता जीवाज्ञानयोः कुत्रापि विषयेऽन्योन्यापेक्षोच्यते उत नेति । न तावद् द्वितीयः। जीवब्रह्मविभागस्याविद्यकत्वेन तदधीनत्वं, अविद्यायाश्च जीवाश्रितत्वेन जीवाधीनत्वमित्येवं स्वसिद्धान्तानवक्लप्तेः । अतोऽन्योन्यापेक्षाप्युपेयैव । न हि सर्वथा तदनपेक्षं तदधीनम् । अत आद्यः पक्ष एव स्वीकार्यः । तथा चागतः स एव दुरात्माऽन्योन्याश्रयः । तदुक्तं न्यायामृते 'अज्ञानस्य जीवाश्रितत्वभङ्गे' 'अविद्याजीवयोर्यत्र व्यपेक्षा तन्निरोधकः । अन्योन्यसंश्रयो नो चेदन्योन्याधीनताहतिः ॥ इति । एवं चान्योन्यप्रयुक्तत्वस्याविकलत्वात्स्यादेव स दोषः । न चानादित्वेनोत्पत्तिज्ञप्त्यप्रतिबन्धकत्वात्कथं दोषत्वमिति वाच्यम् । प्रयुक्तेः प्रतिबन्धेनापि दोषत्वस्यावश्यकत्वात् । तदुक्तं तत्रैव,

'यद्युत्पत्तिज्ञप्तिमात्रप्रतिबन्धाददोषता ।
तर्हि स्याच्चैत्रमैत्रादेरन्योन्यारोहणादिकम् ॥ इति

तदेतदुक्तं 'क्षोण्यां **शून्यप्रतिक्रियः**' इति । कुत्रापि अशक्यनिस्तार इति भावः । इदं चानवस्थाया अदोषत्वमभ्युपेत्योक्तम् । वस्तुतस्तु बीजाङ्कुरस्थले तददोषत्वेऽपि प्रकृते दोषत्वमेव । तदुक्तं **क्वचिदिति** । अयं भावः । न तद्वदिह दोषनिस्तारः । तत्र बीजाङ्कुरयोः कार्यकारणभावः प्रमितः । न चेयं जीवाज्ञानपरम्परा प्रमिता । सत्यभेदेनैवोपपत्तेः । अन्यदपि वैषम्यमाह **यदिति** । तद्वदिहाज्ञानजीवयोर्व्यक्तिभेदाभावात् । तथा सति पुनश्चक्रकाद्यापत्तेः ॥ ८७ ॥

तस्मादविद्याप्रत्यक्षं मन्ये पाण्डित्यशून्य ते ।
पूर्वोत्तरप्रमेयस्याविद्याया एव साधकम् ॥ ८८ ॥

निगमयति **तस्मादिति** । **अविद्याप्रत्यक्षं** त्वया ब्रह्मण्यानेतुमुपक्रान्तं 'अहमज्ञ' इति जीवप्रत्यक्षम् । जीवभेदस्य मिथ्यात्वोपष्टंभेन त्वदज्ञानस्य ब्रह्माश्रितत्वसाधनदुःसाहसं त्वयोपक्रान्तम् । तदसंभवश्चोपपादितः । अतस्त्वदुपक्रमः तवैव सत्यमेवाज्ञानं समसाधयदिति भावः ॥ ८८ ॥

एकाज्ञानेऽपि सर्वोऽज्ञस्स्यादैक्यबलतो न चेत् ।
एकदुःखेऽपि दुःख्यन्यस्स्यादैक्यस्य समाश्रयात् ।
एकानुभूतिस्सर्वस्येत्यागतो जातिसङ्करः ॥ ८९ ॥

लोके खल्वन्योन्यदुःखाद्यनुसन्धानभावाभावरूपा व्यवस्था तावदस्ति । सा च भेदाङ्गीकारेणैवोपपादनीया । ऐक्ये तदनुपपत्तेः । पारमार्थिकभेदस्तु तव नेष्टः । अपसिद्धान्तापातात् । ततो व्यावहारिक एव आस्थेयः । सोऽपि चेन्नाङ्गीक्रियते सर्वव्यवस्थाविलोप आपद्यते । तत्कथमित्यत आह **न चेदिति** । व्यावहारिकभेदो व्यवस्थोपपादक इति नाङ्गीक्रियते चेदित्यर्थः । अतिप्रसङ्गाः स्युरिति शेषः । तानेवाह **एकेत्यादिभिः** । **ऐक्यबलतः** यत्रैक्यं

तत्रान्योन्यानुसन्धानं इति व्याप्तिबलतः । **सर्वोऽज्ञः स्यादिति** न चेष्टापत्तिः । शास्त्राध्ययनवैयर्थ्यप्रसङ्गात् । अयं भावः । एकस्य शास्त्राध्ययनसमये तदैव सर्वेऽपि तथा विदधति न वा । नाद्यः अननुभवात् । द्वितीये त्विदमुपतिष्ठते । **एकेति** एकस्याध्ययनेन तदज्ञाननिवृत्तावपि अनध्येतृणामज्ञानानां अनपगमेन तेषामज्ञानेनैवास्याप्यज्ञानित्वस्यापाताद्व्यर्थः एवास्य अध्ययनक्लेश इति । इद-मुपलक्षणम् । अस्याध्ययनेन तेषामप्यज्ञाननिवृत्त्या तदर्थं तेषामपि तत्प्रयासो मोघः स्यादित्यप्यतिप्रसङ्गो ध्येयः । **अन्यः** सर्व इति शेषः । तथा च मुक्त-स्यापि दुःखित्वप्रसङ्गो दुर्वार इति बद्धमुक्तव्यवस्थाप्रविलयः । **एकानुभूतिः एकस्य** चण्डालस्य **अनुभूतिः** चण्डालस्त्रीभोगाद्यनुभवः **सर्वस्य** ब्राह्मणादेः । न चेष्टापत्तिरित्याह **जातीति** । इदं चानिष्टमेव 'सङ्करो नरकायैव कुलघ्नानां कुलस्य चे'ति स्मृतेः ॥ ८९ ॥

व्यावहारिकभेदेन समाधाने त्विदं गतम् ।
एकं सन्धित्सतः पुच्छमपरं च्यवते तव ॥ ९० ॥

ननु नैष दोषः । जीवानां परस्परं व्यावहारिकभेदोपगमादिति चेदत्र विचारणीयं जीवब्रह्मणोरपि स उररीक्रियते न वा । जीवब्रह्मभेद-पराणां द्वासुपर्णेत्यादिश्रुतीनां व्यावहारिकभेदानुवादपरत्वोपगमविरोधापत्त्या न द्वितीयपक्षं आश्रयितुं युक्तः । आद्ये आह **इदमिति** । जीवाज्ञानस्य ब्रह्मण्यानयनं इत्यर्थः । तथा च ह्रस्वकौपीनपुच्छन्याय इत्याह **एकमिति** ॥ ९० ॥

अतोऽनुभवमाश्रित्य जीवाज्ञाने मतं गतम् ।
ऐक्येन तमतिक्रम्य ब्रह्माज्ञाने मतं गतम् ॥ ९१ ॥

'न चानुभवविरोधे आगमप्रामाण्यं' इति भगवत्पादोक्तिमनुरुध्याह **अत इति** । **मतं** ऐक्यं । **ऐक्येन** अनुभवापेक्षया त्वदभिमतैक्यागमस्यैव प्राबल्य-

समाश्रयणेन । **अज्ञाज्ञाने** त्वयाऽङ्गीक्रियमाण इति शेषः । **मतं** त्वदभिमतं ज्ञान्यज्ञानि-दुःखदुःखिब्राह्मणचण्डालादिव्यवस्थासम्पादनम् ॥ ९१ ॥

जीवोऽज्ञो न जगत्कर्ता यः कर्ता तस्य नाज्ञता ।
अतोऽज्ञानभ्रमायोगाद्भ्रान्तिश्शास्त्रकृतस्तव ।
कथश्चिद्भ्रमयोगेऽपि भ्रान्तिश्शास्त्रकृतस्तव ॥ ९२ ॥

अज्ञत्वजगत्कर्तृत्वयोः परस्परविरहव्याप्ययोरेकत्रावस्थानमसंभवीत्याह **जीव इति न जगत्कर्तेति ।** उपदानादिगोचरापरोक्षज्ञानवत एव कर्तृत्वादित्याशयः । **अतः** 'वेदाहं समतीतानि वर्तमानानि चार्जुन । भविष्याणि च भूतानि' इत्यादिस्मृत्या 'तुरीयं तत्सर्वदृक् सदा' इत्यादिश्रुत्या च ब्रह्मणो स्वस्मिन्सार्वज्ञस्यापरोक्षीकरणावगमात् तथा 'न त्वं वेत्थ परन्तप' 'न तु पिप्पलाद' इत्यादिस्मृत्या जीवेऽज्ञानस्य च तेन साक्षात्क्रियमाणत्वावगमात् अधिष्ठानाभिमतस्य स्वस्य याथात्म्यापरोक्षदृश इति यावत् । **अज्ञानभ्रमायोगात्** 'अपरोक्षदृशो मिथ्यादर्शनं न क्वचिद्भवेदि'त्युक्तेरिति भावः । **ब्रह्मणो** भ्रान्तिर्न संभवतीति पूरणीयम् । कस्य तर्हि सेत्यतो भ्रमप्रमादिसर्वार्थान्विपरीताज्ञानतः गीतोक्तदिशा तामसबुद्धिमतस्त्वद्भाष्यकारस्यैवेत्याह **भ्रान्तिरिति ।** नन्वेवं अज्ञोऽहमिति प्रतीतेः का गतिरित्यत एषा प्रमैव न भ्रान्तिरित्यवेहि । बाधाभावात् । एवमपि तस्य भ्रान्तित्वाङ्गीकारेणाज्ञानारोपाङ्गीकारेऽपि तव नेष्टसिद्धिरित्याह **कथश्चिदिति ।** अयमाशयः । एषा खलु प्रतीतिः त्वद्रीत्याप्यज्ञानस्याहमर्थ आरोपं गोचरयति । अहमर्थश्च 'अहमित्येव यो वेद्यः स जीव इति कीर्तितः' इत्यादिमानैर्जीव एवेत्युपपादितं प्राक् । अतः सिध्यन्ती अपि भ्रान्तिर्जीवभूते त्वदीयभाष्यकर्तर्येव न त्वेव ब्रह्मणीति निष्टङ्कितम् । ॥ ९२ ॥

जीवानुभूतमज्ञानं सर्वज्ञे केन नीयते ।
हा(बस्त)वत्सगलरज्ज्वैव दिग्गजं बद्धुमिच्छसि ॥ ९३ ॥

अज्ञानं संसारबन्धं 'सा संसार उदाहृत' इति त्वदुक्तेः । **सर्वज्ञे** बन्धायोग्ये किमाक्षिपे । साहित्यमुद्रयाऽर्थान्तरं न्यस्यति **वत्सेति** । अन्यत्र **वत्सः** जीवः **गलः** तत्स्वरूपं **रज्जुः** अज्ञाननिमित्तको बन्धः । **दिग्गजः** स्वतन्त्रः नित्यमुक्तः परमात्मा । हा कष्टं तमःपातफलकस्ते दुरभिलाष इति भावः । प्रबलतररज्ज्वा दिग्गजोऽपि बध्येत । नत्वेव नित्यमुक्तः पर इति हृदयम् ॥ ९३ ॥

जीवसर्वस्वमज्ञानं त्वं राज्ञे दातुमिच्छसि ।
नतद्दरिद्रवित्तं स महाराजो दिदृक्षति ॥ ९४ ॥

सर्वस्वं स्वरूपभूतं **अज्ञानं** उपलक्षणम् । बन्धादिदोषम् । **राज्ञे** नित्यनिरस्तदोषे पूर्णशक्तये परात्मने **दातुं** संबध्नातुम् । **इच्छसि** केवलमिति शेषः । न तु पुनस्तत्र शक्तः । कृष्णं बद्धुं समीहमानस्य दुर्योधनस्येव विपरीतफलं ते समीहितमिति ध्वनिः । **दरिद्रवित्तं** अल्पशक्तिं जीवधर्मं दोषं **महाराजः** तज्जिहासावत्त्वे सति तत्र स्वतन्त्रः ईश्वरः **न दिदृक्षति** अतिदूरादेव तज्जहाति । 'सर्वधर्मोपपत्तेश्च' इति सूत्रोक्तन्यायेनेति भावः ॥ ९४ ॥

अनादिमायया सुप्तो यदा जीवः प्रबुध्यते ।
इति श्रुतिसती साध्वी त्वामध्वनि रुणद्धि च ॥ ९५ ॥

तत्त्वमसीति वाक्ये तत्त्वंपदयोर्भागत्यागलक्षणया खलु ऐक्यं परेण सिषाधयिषितम् । लक्षणा च मुख्यार्थानुपपत्त्यनुसन्धानमपेक्षते । न च तत्प्रकृते संभवति । मुख्यार्थयोः सर्वज्ञत्वाज्ञत्वयोः प्रतिपादनपरायाः सुस्पष्टश्रुतेरेव सद्भावादिति वक्तुं पूर्वोत्तरार्धयोरेकस्मिन्नेव श्लोके विरुद्धधर्मप्रतिपा-

दिकां श्रुतिमुदाहरति **अनादीति** । **मायया** अज्ञानेन । अनादित्वविशेषणेन ब्रह्मवत्तत्सत्यत्वमवगम्यते । पूर्वार्धः त्वंपदार्थजीवपरः । जीवश्रुतेरेव । अजमनिद्रमस्वप्नमित्याद्युत्तरार्धोऽपि तत्पदार्थब्रह्मपरोऽनुसन्धेयः । तत्र च ब्रह्मणोऽज्ञानाद्यभावः स्फुटः । एवं च विरुद्धधर्मानेव स्थापयन्ती श्रुतिस्त्वद-भिमतां लक्षणां न सहत इत्याह **श्रुतिसतीति** सतीति निर्दोषता, साध्वीति च निरवकाशता तस्या गम्यते । **अध्वनि** मुख्यार्थपरित्यागरूपे लक्षणाश्रयमार्गे **रुणद्धि** मुख्यार्थस्यैव समर्थनेन लक्षणाश्रयणोद्यतं त्वां निवारयति ॥९५॥

संपूर्णस्वसुखज्ञाने संसारो मुक्तिरेव ते ।
तदज्ञाने तु नाज्ञानबोधोऽवच्छेदको ह्यसौ ॥ ९६ ॥
अहमंशे न तेऽज्ञानं किन्त्वानन्दादिके परम् ।
यद्भातं न तदज्ञातमितिवाक्यमनुस्मर ॥ ९७ ॥

परेण भावरूपाज्ञाने 'अहमज्ञः' इति प्रत्यक्षं प्रमाणमुपन्यस्तम् । तस्य ज्ञानाभावविषयतयाऽप्युपपत्तेर्न तेन भावरूपाज्ञानसिद्धिः । अहमज्ञ इति ज्ञानस्य ज्ञानाभावविषयत्वेनाभिमतात् मयि ज्ञानं नास्तीति ज्ञाना-द्विषयभेदाप्रतीतेः । प्रतियोगिज्ञानाज्ञानाभ्यां ज्ञानाभावज्ञानदूषणं तु स्वव्याहतमित्याह द्वाभ्यां **सम्पूर्णेति** । अयमाशयः । चिदचित्संवलनात्मको-ऽहंपदार्थ इति परप्रक्रिया । तत्र अज्ञानं न तावदचिदंशे । तस्य ज्ञातत्वस्यै-वानुभवेन तद्विषयाज्ञानासंभवादित्याह **अहमंश इति** अहमंशभूतेऽचिदंश इत्यर्थः । ज्ञातत्वेऽपि कुतो नाज्ञानं इति चेत् समानविषयकज्ञानाज्ञानयोर्विरो-धादिति भावः । अङ्गीकृतश्चायं विरोधस्त्वयैवेत्याह **वाक्यमिति** । वक्ष्यति चैतदग्रे (१३९ श्लो.) । तथा च चिदंश एवाज्ञानमेष्टव्यम् । न चेद्बाधकमाह **संपूर्णेति** । संपूर्णसुखज्ञानस्वरूपत्वं हि चितस्त्वयाङ्गीकृतम् । अन्यथा तद्भावस्यापुमर्थत्वापत्तेः । तदंशेऽप्यज्ञानं नाङ्गीक्रियते चेत्तर्हि इदानीं

संसारे तदनुभव आवश्यकः । न तथा संभवति । तथा सति संसारस्य मुक्तित्वापत्तेरित्याह **संसार इति** । ते इत्यनेन जीवाश्रितमज्ञानं स्वस्वरूपसुखज्ञाना दिविषयकमिति मत्पक्षे नैतद्दोषावसर इति सूचयति । तदुक्तं 'स्वभावाज्ञानवादस्य निर्दोषत्वान्न तद्भवेदि'ति । स्वरूपानन्दांशे चेदज्ञानबोध एव दुर्घटः स्यादित्याह **तदज्ञान इति** । तत्र हेतुः **तर्हीति** । **असौ** स्वरूपानन्दः । चित्स्वरूपावच्छिन्नाज्ञाने चित्स्वरूपस्यावच्छेदकत्वात् , अवच्छिन्नज्ञानं प्रति अवच्छेदकज्ञानस्य कारणत्वादिति भावः ॥ ९६ ॥ ९७ ॥

अतोऽवच्छेदकज्ञानाभावान्नाज्ञानधीस्तव ।
अवच्छेदकतज्ज्ञाने भव एवापुनर्भवः ॥ ९८ ॥

अतः अवच्छिन्नज्ञानं प्रति अवच्छेदकज्ञानस्य कारणतया व्यापकत्वात् । **अवच्छेदकेति** चित्स्वरूपभूतसुखज्ञानेत्यर्थः । **अज्ञाने** चित्स्वरूपावच्छिन्नाज्ञानेत्यर्थः । अथ एतद्दोषनिस्ताराय अवच्छेदकज्ञानमङ्गीकरोषि तर्हि प्रागुक्तदोषापत्तिरित्याह **भव एवेति** । अपुनर्भवः स्यादिति शेषः । तथा च तदर्थं प्रयत्नो व्याहन्येतेति भावः ॥ ९८ ॥

यथाऽऽलोकपुरस्कारश्चक्षुषस्सर्ववस्तुनः
ग्रहणेऽप्यस्ति तमसो ग्रहणे तु स नेष्यते ॥ ९९ ॥

नन्वेवं अवच्छेदकस्य चित्स्वरूपस्य ज्ञाने अज्ञाने चेति पक्षद्वयेऽपि दौर्घट्ये अहमज्ञ इति प्रत्यक्षसिद्धस्याज्ञानज्ञानस्य का गतिरिति चेत् अवच्छिन्नज्ञानं अवच्छेदकज्ञानसापेक्षमिति व्याप्तेः सङ्कोचाश्रयणमेवेति वक्तुं तत्रानुरूपदृष्टान्तमाह **यथेति** । **पुरस्कारः** सहकारिकारणत्वेन नियतपूर्ववृत्तित्वम् । **सर्ववस्तुनः** तमसा वध्यघातुकभावानापन्नघटपटादिरूपवद्वस्तुनः । कुतः सर्वशब्दसङ्कोच इत्यतो व्याप्तेस्तमसि व्यभिचारदर्शनादित्याह **तमस इति** ॥ ९९ ॥

सिद्धव्याप्तेस्तु सङ्कोचो विरूद्धत्वाद्धि केवलम् ।
अत्रापि तत्पुरस्कारे न स्यादज्ञानमेव हि ॥ १०० ॥

सिद्धेति उत्सर्गतःसिद्धत्यर्थः । **सङ्कोचः** अपवादलक्षणबाधः । **विरुद्धत्वात्** तमआलोकयोर्वध्यघातुकभावलक्षणविरोधापन्नत्वात् । हीत्यनेन विरोधस्य प्रमाणप्रसिद्धिमाह । **केवलं** तमोग्रहणमात्रे **न तु** तदन्यत्र घटपटादि-ग्रहणे । आलोकसद्भावे तमसः स्वरूपस्यैव नाशेन न तद्ग्रहसंभव इति भावः । उक्तं उत्सर्गापवादन्यायं दार्ष्टान्तिके योजयति **अत्रापीति** । अर्थावच्छिन्न-भावरूपाज्ञानग्रहेऽपि इत्यर्थः । **तत्पुरस्कारे** अवच्छेदकीभूतार्थज्ञानसापेक्ष-त्वाङ्गीकारे ॥ १०० ॥

अतो व्याप्तेश्च सङ्कोचं कृत्वा सामान्यतो ग्रहः ।
वाच्योऽवच्छेदकादीनामज्ञानं तु विशेषतः ।
इति सर्वैस्समाधेयं त्वं सर्वेभ्यो बहिष्कृतः ॥ १०१ ॥

किं तत इत्यतो दौर्घट्यपरिहारोपायमाह **अत इति** । **सर्वैः** स्वव्या-घातं चेतयद्भिः विवेकिभिः । **त्वं** व्याहतभाषी उन्मत्तः । तदुक्तं न्यायामृते अविद्याविषयभङ्गे 'एवं च तद्विशेषसंशयं प्रति तत्सामान्यनिश्चय इव तद्विशे-षावच्छिन्नाज्ञानज्ञानं प्रति तत्सामान्यज्ञानमेव हेतुः । तथा दर्शनात् । न हि विशेषे ज्ञाते तदज्ञानधीर्दृष्टा । अवच्छेदकज्ञानस्य तदज्ञानहेतुतापि हि दर्श-नादेव कल्प्या । सामान्यविशेषभाव एव च नियामक इति नातिप्रसङ्ग' इति । विस्तरस्तत्रैव ॥ १०१ ॥

ज्ञानाविरोधि तेऽज्ञानं ज्ञाने सति कुतो न तत् ।
विरोधि चेत्परन्यायतरोस्त्वं मूलसेचकः ॥ १०२ ॥

उक्तं नियामकं विपक्षे बाधकप्रदर्शनेन परेणाप्यङ्गीकारयति **ज्ञानेति** ॥ **ते** साक्षिज्ञानं अज्ञानस्फोरकमित्युपगच्छतस्तव मते । **तत्** मोक्षकालीनं

संपूर्णस्वसुखज्ञानम् । **कुतो न** । इदानीं संसार एवेति पूरणीयम् । साक्षिणा तद्-ज्ञानानुभवान्नेदानीं तज्ज्ञानसंभव इत्यतः स्यादेवं तथा यदि ज्ञानाज्ञानयोर्विरोधस्त्वत्सिद्धान्तः स्यात् । नैतदस्तीत्याह **ज्ञानाविरोधीति** । अथ विरोधमङ्गीकरोषि तर्हि अतिप्रसङ्गपरिहाराय पूर्वोक्तः सामान्यविशेषभावलक्षणनियामकः अकामेनापि त्वया शरणीकरणीय इत्याह **परेति** ॥ १०२ ॥

ज्ञानाभावपदार्थस्य सर्वथाऽभाव एव चेत् ।
अत्यन्ताभावशून्यं तज्ज्ञानं स्यात्परमार्थसत् ॥ १०३ ॥

किं चैवं ज्ञानाभावज्ञाने दौर्घट्यं वदन् मायावादी प्रष्टव्यः । ज्ञानाभावाख्यं पदार्थमेव नाङ्गीकरोषि उत तज्ज्ञानमात्रम् । आद्ये अभावोऽपि प्रागभावः प्रध्वंसः अत्यन्ताभावो वा । नाद्यः । प्रागभावाभावे ज्ञानानां अनादित्वापातात् । इदानीं वेदान्तश्रवणादिसाध्यमोक्षहेतुब्रह्मज्ञानप्रागभावस्य त्वयाऽपि वक्तव्यत्वात् । अन्यथा श्रवणादिवैयर्थ्यापातात् । न द्वितीयः । ज्ञानानां नित्यत्वापातात् । तृतीये दोषमाह **अत्यन्ताभावेति** । तदत्यन्ताभावाभावे तस्य ज्ञानस्य अत्यन्ताभावाप्रतियोगित्वलक्षणं सत्त्वं ब्रह्मवत् स्वीकार्यं स्यादित्याह **तदिति** । न चेष्टापत्तिरित्याह **परमार्थसदिति** । तथा च सद्-द्वैतभङ्ग इति भावः । न च तद्दोषपरिहाराय ज्ञानस्य ब्रह्मस्वरूपत्वं त्वया वक्तुं शक्यम् । महावाक्यादिना उत्पद्यमानस्य ज्ञानस्य ब्रह्मस्वरूपत्वे ब्रह्मणोऽप्युत्पत्तिप्रसङ्गादिति भावः ॥ १०३ ॥

विद्यमानस्य चार्थस्य यथासंभवमेव धीः ।
किं जात्यन्धमते नास्ति चित्ररूपवती क्षितिः ॥ १०४ ॥

अथाङ्गीकृत्यापि ज्ञानाभावं तज्ज्ञानमात्रं नाङ्गीक्रियत इति तत्राह **विद्यमानस्येति** । ज्ञानमेव विषयसद्भावे प्रमाणं इति विषयस्य विद्यमानत्वमङ्गीकृत्य तज्ज्ञानानङ्गीकारे मानाधीना मेयसिद्धिरिति न्यायविरोध इति भावः ।

ननूक्तमत्र प्रतियोगिज्ञानभावाभावाभ्यां ज्ञानाभावज्ञानं दुर्घटमिति तत्राह **यथासंभवमिति** । ज्ञानावच्छेदकस्य विषयस्य सामान्यतो ज्ञानं विशेषतो ज्ञानाभावः इत्युक्तरीत्येति भावः । स्वमतमात्रानुसारेण प्रमितवस्त्वपलापेऽति-प्रसङ्गमाह **किमिति** । **मते** मतमात्रानुसारेण । **नास्ति** । चक्षुष्मतामपीति शेषः । अयं पुनरत्र विवेकः । चाक्षुषज्ञानाभावादन्धो रूपं नास्तीति मन्यत इत्येव । त्वं तु, रूपमङ्गीकृत्य चाक्षुषज्ञानमपलपन्नुन्मत्त इव, ज्ञानाभावं स्वीकृत्य तज्ज्ञानमपलपन् स्वन्यायविरोधमप्यचेतयमानो जात्युत्तरवादी ततोऽपि निकृष्ट इति । तदेतज्जातिपदग्रहणेन ध्वनितं ध्येयम् ॥ १०४ ॥

अज्ञानस्य हि दौर्घट्यं यथा ते भूषणं सदा ।
तथा तज्ज्ञानदौर्घट्यमपि भूषणमस्त्विदम् ॥ १०५ ॥

मायिमते आश्रयविषययोर्दुर्निरूपत्वेन अज्ञानं तावत् दुर्घटम् । दूषणमपि तद् दुर्घटत्वं तेन भूषणमित्येवाङ्गीकृतं 'दुर्घटत्वमविद्याया भूषणं न तु दूषणमि'ति । तदेवं दुर्घटत्वं भूषणं, सुघटत्वं तु दूषणमिति तत्सिद्धान्त-न्यायः । स्थितेऽप्येवं परमतं दुषयितुमुपक्रम्य ज्ञानाभावज्ञाने दुर्घटत्वं व्युत्पादयितुं तेन पराक्रान्तम् । दुर्घटत्वव्युत्पादने परमतं भूषितमेव भवति न त्वेव दूषितम् । सोऽयं तस्य दूषणोपक्रमः स्वसिद्धान्तन्यायमवधीर्य कृतोऽपहसनीय इत्याह द्वाभ्यां **अज्ञानस्येत्यादिना** ॥ 'सदा' इत्यनेन अविद्याया दुर्घटत्वं तन्मते स्वरूपलक्षणं सूचितं ध्येयम् । 'अविद्याया अविद्यात्वे इदमेव हि लक्षणम् । मानापातासहिष्णुत्वं असाधारणमिष्यते ॥' इति सुरेश्वरोक्तेः ॥ १०५ ॥

किमेककुण्डलत्वेन कुण्डलद्वयवान्भव ।
दुर्घटस्य हि यो हन्ता स स्यादत्यन्तदुर्घटः ॥ १०६ ॥

कुण्डलद्वयेति ज्ञानाभावतज्ज्ञानेति प्रकृतद्वयापेक्षयोक्तम् । वस्तुतस्तु 'अन्धन्तमोऽप्यलङ्कारो नित्यदुःखं शिरोमणिः' इत्याद्युक्तरीत्या वस्त्रालङ्कारवान् भवेत्यर्थः । अज्ञानस्य दुर्घटत्वे तन्निवर्तकस्य ज्ञानस्य दुर्घटत्वं सुतरां सेत्स्यतीत्याह **दुर्घटस्येति** । नित्यनिवृत्तस्य अप्रामाणिकस्य निवर्तकाभिमतमप्यप्रामाणिकमेवेति भावः ॥ १०६ ॥

किं च भावाज्ञानवादे दुर्घटत्वं यथेष्यते ।
अभावाज्ञानवादेऽपि दौर्घट्यं तद्वदिष्यताम् ॥ १०७ ॥

ननु, अज्ञानं न ज्ञानाभावः किन्तु भावरूपमेव । नञश्च विरोधोऽर्थः । अज्ञानमिति व्यवहारसाम्येऽपि ज्ञानाभावपक्षे नञोऽभावोर्थः । ज्ञानाभावज्ञानाय प्रतियोगिज्ञानज्ञानं अपेक्षितम् । न तु भावरूपाज्ञानज्ञानाय । अतो वैषम्यान्नैकस्याङ्गीकारेऽपरस्याप्यङ्गीकारापादनं साम्प्रतमित्यतः आपादकांशस्य साम्यादकिञ्चित्करोऽयं भावाभावरूपो विशेष इत्याह **किञ्चेति** । भावरूपत्वमङ्गीकुर्वताऽपि परेण नाज्ञानस्य सुघटत्वमङ्गीक्रियते । दुर्घटत्वाख्यतत्स्वरूपलक्षणहान्यापत्तेः । नापि तदङ्गीकारार्हम् । अभावाज्ञानपक्षे तदुक्तविकल्पदोषाणां वक्ष्यमाणरीत्या भावाज्ञानपक्षेऽप्यप्रतिबद्धप्रसरात् । अतः सर्वथा तद्दुर्घटमेवैष्टव्यम् । एवमपि चेत्तदङ्गीकारः किं तर्हि अभावाज्ञानेनापगद्धम् । दुर्घटत्वाविशेषात् । तदप्यङ्गीक्रियतामित्याह **तद्वदिति** । इदं चोपेत्योक्तम् । स्वपक्षे दौर्घट्यस्य निरसिष्यमाणत्वात् इति भावः ॥ १०७ ॥

अज्ञानत्वाविशेषेण द्वयोरपि समत्वतः ।
पक्षपाते हेत्वभावात्पक्षपातो भवेत्तव ॥ १०८ ॥

अज्ञानत्वाविशेषेण । उपलक्षणम् । दुर्घटत्वाविशेषेण च । **पक्षपाते** अन्यतरानङ्गीकारे । पक्षपातः दुर्घटमङ्गीकारार्हमिति त्वत्सिद्धान्तन्यायस्य निर्निमित्तं परित्यागो दोषः ॥ १०८ ॥

नित्यज्ञानमते ज्ञानसामान्याभाव एव न ।
चक्षुषा ब्रह्मविज्ञानस्याभावोऽज्ञानमुच्यते ॥ १०९ ॥

यदि तर्हि न जानामीति प्रत्ययस्य भावरूपाज्ञानं न विषयः को विषयस्तस्येत्यतो ज्ञानाभाव एवेति ब्रूमः । ननु तत्राप्युक्तो दोषः । अवच्छेदकस्य विषयस्याज्ञाने ज्ञानज्ञानस्य तत्प्रतियोगिकाभावज्ञानस्य दुर्घटकत्वं इति चेत्स्यादेष दोषः यदि ज्ञानसामान्याभावं ब्रूमः न चैवम् । किं नाम ज्ञानविशेषाभावमेव । कुत एवं सङ्कोचाश्रयणमित्यतस्तस्यावश्यकत्वादेवेत्याह **नित्यज्ञानमत इति** । चेतनः साक्षी सदा सामान्यतः सर्वविषयकज्ञानरूप इति मते इत्यर्थः । तदुक्तं भगवत्पादैः 'सर्वं सामान्यतो यस्मात्सर्वैरेवानुभूयते' इति । ज्ञातृत्वं तत्स्वभावः । तद्धानौ स्वरूपहानिरेवेति भावः । ज्ञानत्वावच्छिन्नप्रतियोगिताकाभावं प्रति ज्ञानत्वावच्छिन्नयत्किञ्चित्सत्त्वमपि विरोध्येवेति भावः ॥ सङ्कोचप्रकारमेव विवृणोति **चक्षुषेति** ॥ १०९ ॥

निष्किञ्चनपदं वित्तविशेषाभाववाग्यथा ।
एवं च मानसं ज्ञानं स्यादेव प्रतियोगिनः ॥ ११० ॥

निषेधवाक्यानां प्रमितेतरनिषेधकत्वं इति न्यायो गुणसौरभे व्युत्पादितः । तं लौकिकदृष्टान्तेन द्रढयति **निष्किञ्चनेति** । तं न्यायं प्रकृते सङ्गमयति **एवमिति मानसं ज्ञानमिति** उपलक्षणम् । साक्षिरूपं सामान्यतः सर्वविषयकं ज्ञानं च ग्राह्यम् ॥ ११० ॥

परोक्षरूपं तज्ज्ञानं यदभावश्च नोच्यते ।
ब्रह्मापरोक्षाभावेन न जानामीतिवाक्तु सा ॥ १११ ॥

मानसं इति पूर्वश्लोकोक्तं विशदयति **परोक्षरूपमिति** । **तदिति** अभावप्रतियोगिभूतेत्यर्थः । अनेन, 'मनसैवानुद्रष्टव्यमि'ति श्रुत्यनुसाराद-

परोक्षज्ञानस्यापि मनःकरणकत्वाङ्गीकारात् तादृशमानसज्ञानसद्भावे ब्रह्मा-परोक्षज्ञानाभावेनेति उत्तरार्धे क्रियमाणो निषेधोऽश्लिष्ट इति शङ्काऽनवकाशः। मानसज्ञानपदेन शब्दलिङ्गजन्यस्य परोक्षज्ञानस्यैव विवक्षणादिति ध्येयम्। यदङ्गीकृतं तदभावो नोच्यते। यस्य अपरोक्षज्ञानस्याभाव उच्यते न तदङ्गी-कृतमिति विषयभेदात् न विरोध इति पर्यवसितम् ॥ १११ ॥

प्रत्यक्षवृत्तिवैरेऽपि न जानामीति ते यथा।
प्रत्यक्षवृत्त्यभावेऽपि न जानामीति मे तथा ॥ ११२ ॥

भावरूपाज्ञानवादिनाऽपि सामान्यविशेषभावमाश्रित्यैव विरोधाभावः शक्यनिरूपणो नान्यथा गत्यन्तराभावादित्याह **प्रत्यक्षेति**। ब्रह्म न जानामि तत्कथय इति व्यवहारस्तावदस्ति। स कथं समाधेय इति वक्तव्यम्। साक्षिसिद्धमनूद्य प्रमाणबुभुत्सया व्यवहार इति न संभवति। अविशेषस्य साक्षिणस्त्वन्मते अज्ञानस्य अज्ञाततयाऽर्थानां च साधकत्वायोगात्। तदुक्तं भगवत्पादैः 'अविशेषस्य साध्या साधकता पुनः'। साक्षिसिद्धत्वे प्रमाणबुभुत्साया निष्फलत्वाच्च। साक्षिण एव प्रमाणत्वात्तस्यैव चाज्ञान-निवर्तकत्वात्। अन्यथा निवर्तकाभिमतवृत्तिप्रतिफलनाभावेन मोक्ष आनन्दस्वरूपाप्रकाशापातात्। अतः अकामेनापि सामान्यतः ब्रह्मणो ज्ञानं विशेषतस्तदज्ञानमित्येव पूर्वोक्तव्यवहारः त्वयाऽपि समाधेय इति न मां प्रत्येव पर्यनुयोग इत्याह **ते यथेति मे तथेति च**। **प्रत्यक्षवृत्तिः** इन्द्रिय-सन्निकर्षजन्यवृत्तिप्रतिफलितं चैतन्यमिति यावत्। तस्या एव **वैरं** निवर्तकत्वलक्षणविरोधः यस्य अज्ञानस्य इति अङ्गीकर्तुः तव मते इति भावः। प्रत्यक्षवृत्तिः वैरं यस्य इति विग्रहः ॥ ११२ ॥

अतो मम मतेऽज्ञानज्ञाने दौर्घट्यमेव न ॥ ११३ ॥

अतः सामान्यविशेषविषयकत्वेन एकविषयकज्ञानतदभावयोर्विरोधाभावात् । **मम मते** सविशेषब्रह्मवादिन इति उपस्कर्तव्यम् । **अज्ञानेति** ज्ञानाभावेत्यर्थः । एवकारो मत इत्यनेन संबध्यते । तेन परमते दौर्घट्यं दुष्परिहरमेवेति सूचयति । तन्मते ब्रह्मणो निर्विशेषत्वेन सामान्यविशेषभावाश्रयणेन परिहारस्याशक्यत्वात् । अनेन 'किञ्च भावरूपाज्ञानपक्षेऽपि पूर्वमर्थो ज्ञातो न वा' इत्यादिकम्, 'तस्मान्नाविद्या निरूपणगोचरतामाचरती'त्यन्तं वादावल्युक्तं भावरूपाज्ञानखण्डनं विवृतं ध्येयम् ॥ ११३ ॥

दौर्घट्यमेकं भूषा चेत्किं न स्याद्दूषणान्तरम् ।
परस्योत्तरमेवं च स्यादित्येव तदीरितम् ॥ ११४ ॥

पूर्वं ज्ञानाभावज्ञानस्य दौर्घट्योक्तिः पररीत्यैवेत्याह **दौर्घट्यमिति** ॥ ११४ ॥

परासिनाऽतिक्रूरेण या ह्यविद्या क्षतापि न ।
यतो ब्रह्मचिता नाशो नाज्ञानस्य भवन्मते ॥ ११५ ॥

स्वसन्तानासिना मन्दधारेण च्छिद्यते किल ।
आविद्यकमनोरूपविद्यया नाशकीर्तनात् ॥ ११६ ॥

या चेयं परप्रक्रिया, केवलं चिद्रूपज्ञानं नाज्ञाननाशकं किन्तु तत्स्फोरकमेव । वृत्त्युपारूढं तु सत्तदज्ञाननाशकं इति । यथोक्तं 'तृणादेर्भासिकाऽप्येषा सूर्यदीप्तिस्तृणं दहेत् ॥ सूर्यकान्तमुपारूढा तन्न्यायं चितियोजयेदि'ति । तां दूषयति **परेत्यादिभिश्चतुर्भिः** ॥ आद्यश्लोकद्वयस्य, एकान्वयः । तत्र 'यतो ब्रह्मचिता नाज्ञाननाशो भवन्मते' इति 'आविद्यकमनोरूपविद्यया नाशकीर्तनात्' इति च परप्रक्रियावर्णनम् । शिष्टेन, तन्नि-

रासः । परासिना इति स्वसन्तानासिनेत्येतत्प्रतियोगितयोक्तम् । अतिक्रूरेणेत्येतच्च मन्दधारेणेतत्प्रतियोगितयेति ध्येयम् । **परेति** अविद्यापेक्षया । अनाविद्यकेत्यर्थः । मनोरूपविद्या तु स्वयं अविद्याकृतत्वान्नैवमिति भावः । तदुक्तं **स्वसन्तानेति** । अविद्याकार्येत्यर्थः । **अतिक्रूरेण** । 'मायां व्युदस्य चिच्छक्त्या' इत्यादिप्रमाणैरज्ञाननिवर्तकतया प्रमितेन । एवं ज्ञप्तिरिति-ज्ञानशब्दमुख्यव्यवहारविषयेण चिद्रूपज्ञानेन । वृत्तिज्ञानं तु नैवमित्याह **मन्दधारेणेति** । धर्माधर्मादिपरोक्षविषये चिदसंवलननिमित्तेनाज्ञानानिवर्तकतया पराभ्युपगतत्वेन स्वयं अज्ञाननिर्हरणासमर्थेन वृत्तिज्ञानेन । अपेरतिक्रूरेणेत्यनेन संबन्धः । येत्युक्त्या सेति लभ्यते । छिद्यत इत्यनेन संबध्यते । किलेत्यपहासः । अयमर्थः । 'श्रुतमयेन ज्ञानेन तत्त्वमभिधाय चिन्तामयीमवस्थामवलम्बमानस्य यद्वृत्तिरूपज्ञानमुपजायते तेन भवेदविद्यानिवृत्तिरि'ति परेणोच्यते । तदेतदत्यसङ्गतम् । 'अहमज्ञानजं तमः । नाशयात्मभावस्थो ज्ञानदीपेन भास्वता' इति स्मृत्युक्तरीत्या अज्ञाननाशकत्वेन प्रमाणप्रमितं स्वयं अनाविद्यकं च ब्रह्मात्मकं चिद्रूपज्ञानं, अविद्यां न निवर्तयति किल । चिदसंवलने स्वयं अर्थप्रकाशने असमर्थं, अविद्याकार्यं च वृत्तिज्ञानं तां निवर्तयति किल । तदेतत् शत्रोस्तीक्ष्णखड्गप्रहारैरक्षतवर्मा वीरः स्वार्भकस्य क्रीडनकेनौपचारिकासिना घातित इतिवदपहास्यमिति ॥ ११६ ॥

मनसोऽपि हि चिद्योगाच्छक्तिरर्थप्रकाशने ।
अज्ञाननाशने च स्याच्छक्तिस्तद्योगतः परम् ॥ ११७ ॥

अपहासबीजं स्वरूपज्ञस्यपेक्षया वृत्तेरतिदौर्बल्यं पराङ्गीकृतं चेत्याह **मनस इति** । अपरोक्षवृत्तिज्ञानस्येत्यर्थः । हीत्यनेन पराङ्गीकारमत्र प्रमाणयति । ज्ञानस्य द्वे अर्थक्रिये । अर्थप्रकाशनं तदज्ञाननिवर्तकत्वं चेति । इमे चापरोक्षवृत्तावेव संभवतः । न धर्माद्यतीन्द्रियविषयकपरोक्षवृत्तौ । तत्कुत इत्यतः

परेणोच्यते **चिद्योगात् इति** । अपरोक्षवृत्तावेव चित्प्रतिफलनात् इत्यर्थः । तथोक्तं 'बिम्बीभवन्ती चितिः हरत्यज्ञानं प्रकटीकरोति विषयानि'ति । **परं** केवलम् । चिद्योगाभावे तु नैवोभयमित्यर्थः ॥ ११७ ॥

न चेद्घटादितुल्यस्य जडस्य द्वितयं च न ।
भूताविष्टाच्च भीतस्य भूतात्कथमभीतता ॥ ११८ ॥

तदेवाह **न चेदिति । जडस्य** चित्संवलनरहितस्य परोक्षवृत्तिज्ञानस्य । तत्र दृष्टान्तो **घटतुल्यस्येति** । तथा च प्रयोगः । चिदसंवलितं वृत्तिज्ञानं, न अर्थप्रकाशकं अज्ञाननिवर्तकं जडत्वात् घटवदिति । एवं चान्वयव्यतिरेकाभ्यां चितो वृत्तेर्दौर्बल्यसिद्धिरविकलेति भावः । अत्रैवार्थान्तरं न्यस्यति **भूतेति** । अत्र **भूतं** चिद्रूपज्ञानं, येन **आविष्टात्** तत्संवलितादपरोक्षवृत्तिज्ञानात् **भीतस्य** तन्निवर्त्यस्याज्ञानस्य, भूतात् चिद्रूपज्ञानात् **अभीतता** अनिवर्त्यता । कथमाक्षेपे । तथा च चितोऽज्ञानानिवर्तकत्वोक्तिः परस्यापहास्यैवेति भावः ॥ ११८ ॥

सिद्धं पश्यति चेद्ब्रह्म जगन्न भ्रमजं तव ।
कल्पयित्वैव पश्येच्चेत्सर्वं स्यात्सार्वकालिकम् ।
आ मुक्तेः कल्पकाज्ञानब्रह्मचैतन्ययोस्स्थितेः ॥ ११९ ॥

अज्ञाननिवर्तकसार्वज्ञाश्रये ब्रह्मणि अज्ञानस्य तज्जन्यस्य भ्रमस्य चावस्थानासंभव उपपादितः । विकल्पासहत्वाच्चैवमित्याह **सिद्धमिति** । तथा हि भ्रमः सादिरुतानादिः । आद्यं निराह **सिद्धं पश्यति चेदिति** । भ्रमः सादिश्चेदित्यर्थः । भ्रमात्पूर्वं जगतः सिद्धत्वे भ्रमस्य सादित्वं प्राप्नोत्येवेत्याशयः । किं तत इत्यत आह **जगन्न भ्रमजमिति** स्यादिति शेषः । **तव** अर्थज्ञानात्मको भ्रम इत्यङ्गीकर्तुः । मते इति पूरणीयम् । भ्रमात्पूर्वं सिद्धस्य शुक्तिकाशकलस्येव जगतः सत्यत्वं स्यात् । न हि तत्पूर्वं विद्य-

मानस्तत्कल्पितश्चेति संभवति । व्याहतेरेवेति भावः । द्वितीयं निराह **कल्पयित्वैवेति** । अज्ञानब्रह्मचैतन्ययोरिव तत्प्रयोज्यकल्पनाया अनादित्वमङ्गीक्रियते चेदित्यर्थः । **सर्वं** कालादृष्टादिकं जगत् । **सार्वकालिकं** नित्यम् । **आ मुक्तेरिति** । इदं च मुक्तौ परमते अज्ञाननाशमुपेत्योक्तम् । वस्तुतस्तु 'अनादिभावरूपस्य विज्ञानविलापनाऽसंभवाच्च ब्रह्मवदि'ति वादावल्युक्त्यनुसारेण मुक्त्यभिमतानन्तरमपीत्यर्थः । तथा च मोक्षासंभव एवेति भावः । आङोऽभिविधिर्वाऽर्थः ॥ ११९ ॥

अतो दैनंदिनलयः कल्पान्तप्रलयोऽपि वा ।
कथं स्यात्तस्य नित्यस्य दर्शनस्य न हि क्षयः ॥ १२० ॥

आपाद्यं चेदं प्रामाणिकलयादिपरित्यागरूपतयाऽनिष्टमित्याह **अत इति** । वाशब्देनोक्तदिशा मोक्षः समुच्चीयते । हिर्हेतौ । तत एव तदात्मकस्य जगतः अपि न क्षय इति सिध्यति ॥ १२० ॥

भ्रमकल्प्यं हि सर्वं ते कालादृष्टादिकं जगत् ।
भ्रमस्य नित्यसिद्धत्वात्किं किं न स्यात्सदा तव ॥ १२१ ॥

कालादृष्टादिनाशादस्तु जगतो नाश इत्यतो मोक्षं विस्मार्षीरित्याह **सर्वमिति ते इति च** । तव मते भ्रमस्यार्थज्ञानात्मकत्वेन भ्रमस्य नित्यत्वे कथं कालादृष्टादिकस्य भ्रमात्मकस्यार्थस्यापि नाशः संभवी । तस्यापि जगदन्तःपातित्वादेवेत्याशयः ॥ १२१ ॥

मायां तु प्रकृतिं विन्द्यान्मायिनं तु महेश्वरम् ।
गौरियं वाक्शुनी नेयं पुच्छं तस्या विचारय ।
यतः प्रकृतिरेवैषा माया पुच्छेऽत्र गीयते ॥ १२२ ॥

श्रुतौ मायित्वोक्त्या ब्रह्मणो भ्रान्तिसिद्धिरिति चोद्यं प्रत्याचष्टे **मया-मिति**। स्यादप्येवं यदि 'मायिनं' इति श्रुतौ मायाशब्दस्याज्ञानमर्थः मतुपश्च तदाश्रयत्वमर्थोऽभिमतो भवेत्। नैतदस्ति। मायाशब्दोऽत्र प्रकृतिपरः। मतुप् च स्वामित्वार्थकः। तथा च प्रकृतिस्वामी इत्येवार्थ-सिद्धिः। कुत एतदुभयमित्यतः तिष्ठन्तु प्रमाणान्तराणि, अत्रैव वाक्ये तथा व्याख्यानादित्याह **तस्या इति**। **पुच्छं** 'मायां तु प्रकृतिं विद्यादि'ति पूर्ववाक्यम्। महेश्वरं इत्युत्तरभागं च। न खलु प्रकृतिमहेश्वरोऽज्ञानी भ्रान्तो वेति संभावनार्हमिति भावः। विचारयेत्यनेन शास्त्रार्थनिर्णयप्रकार-स्येत्थंभावं सूचयति। शब्दस्य नापातप्रतीत एवार्थः। किं तु मानान्तरा-विरुद्धः पूर्वोत्तराविरुद्धश्च। अन्यथा मीमांसावैयर्थ्यात्। तदुक्तं वार्तिके 'अन्य एवैकदेशेन शास्त्रस्यार्थः प्रतीयते। अन्यश्च परिपूर्णेन समस्ताङ्गोप-संहृतौ' इति। एकमात्राङ्गेन निर्णये लोकेऽप्यतिप्रसङ्गं श्लेषोक्त्याऽनु-रूपदृष्टान्तेन दर्शयति **गौरिति**। **इयं वाक्** विष्णोर्गुणोत्कर्षे महातात्पर्य-वत्त्वेन प्रमिता श्रुतिवाक्। **गौः** चिदचित्प्रकृतिनियामकत्वलक्षणमहिमा-मृतस्यैव दोग्ध्री। **शुनी** स्वदंशनेन भगवति अज्ञानरूपव्रणकारिणी वक्र-पुच्छा। पुच्छमित्युपलक्षणम्। महेश्वरमिति साम्नादिमस्त्वस्थानीयमग्रभागं चेत्यपि ग्राह्यम्॥ १२२॥

यथा कुलालश्चक्री स्यात्तथा मायी तया सृजन्॥ १२३॥

तदस्यास्तीति संबन्धसामान्यं मतुबर्थः। स च संबन्धः न समवा-यादिरेव। किं तु स्वामित्वमपि। तदुक्तं 'स्वातन्त्र्यं तद्गतत्वं च शब्द-वृत्तेर्हि कारणम्। स्वातन्त्र्यं तत्र मुख्यं स्यादि'ति। तदेतद्दृष्टान्तनिष्ठतया प्रदर्शयति **यथेति**। अयं भावः। यदि समवाय एव मतुबर्थः तर्हि चक्रावयव एव चक्रिपदप्रयोगः स्यात्। यदि वा संयोगस्तदा कुलालशाला-गृहे। नैवमस्ति। किं तु गृहाद्बहिर्भावदशायामपि कुलाल एव।

तेन ज्ञायते स्वामित्वं एव तत्र तत्पदप्रयोगे निमित्तमिति । 'प्रकृतिं विन्द्यादि'ति उपादानस्य प्रकृतत्वेऽपि निमित्तस्य चक्रस्य निदर्शनेन उभयविधकारणस्य नियामकत्वं श्रौतमहेश्वरपदोक्तं द्योत्यते । तथा हि श्रुतिः 'चतुर्भिः साकं नवतिं च नामभिश्चक्रं न वृत्तं व्यतीं र्वीविपदि'ति । स्मृतिश्च 'भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायये'ति । **तथा** स्वामित्वेन निमित्तेन । **मायीति** महेश्वर इति पूर्वप्रकृतः संबध्यते । **तया प्रकृत्या** । **सृजन्निति** । यथोक्तं 'मयाऽध्यक्षेण प्रकृतिः सूयते सचराचरमि'ति ॥१२३॥

किं न कोशस्थवित्तेन धनी राजा वनेचरः ।
मतुपा सर्वसर्वस्वं गले तस्य न निक्षिप ॥ १२४ ॥

स्वातन्त्र्यं शब्दवृत्तेः कारणमिति निदर्शितम् । मुख्यं च तदित्याह **किमिति** । यद्यस्याधीनं तत्तस्य मुख्यं भवति । यथेष्टविनियोगयोग्यत्वात् । न तु यत्र यत्संबद्धं तत्तस्य मुख्यतः । तेन धनित्वं जयित्वमिव राज्ञ एव मुख्यं न तु कोशपालस्य भृत्यस्येति भावः । एवमपि यो दुराग्रही तं अनिष्टप्रदर्शनेनोपहसति **मतुपेति** तदर्थकेन्प्रत्ययबलात् इत्यर्थः ॥ १२४ ॥

सर्वज्ञं खलु तद्ब्रह्म कथमज्ञानवद्भवेत् ।
स्वरूपस्य सदा दृष्टेरसर्वस्यान्यस्य चाञ्जसा ॥ १२५ ॥

'अज्ञाताऽखिलसंवेत्तुर्घटते न कुतश्चन' इति भगवत्पादोक्तिमनुरुध्याह **सर्वज्ञमिति** । **खलु** निश्चयः । 'यः सर्वज्ञः सर्ववित्' इति श्रुतेः 'आत्मानमन्यं च स वेद विद्वान्' इति स्मृतेश्च । सदा अञ्जसेति च स्वरूपस्यान्यस्य चेत्युभयत्र संबध्यते । **अञ्जसा** स्वातन्त्र्येण, निरतिशयस्पष्टतया, अशेषविशेषपुरस्सरं च । दृष्टेरित्यनेन साक्षिणस्तस्य ज्ञानस्य परोक्षतां प्रत्याह । 'विमतो नाज्ञानवान् सर्वज्ञत्वात्' इति सामान्यतो दृष्टानुमानमिह

विवक्षितम् । तेन विशेषव्याप्तौ न दृष्टान्ताभावदोषः । 'यो यत्र ज्ञानवान्नासौ तत्राज्ञानवान् इति सामान्यव्याप्तेरविरोधात्' इति टीकोक्तेरित्यवधेयम् । तदेतदुक्तं न्यायामृते 'सर्वं हि यो विजानीते तस्य कुत्रापि नाज्ञता ॥ न हि यो यद्विजानीते स तत्राज्ञानवान् भवेदि'ति । सर्वज्ञः अज्ञानवांश्च इति व्याहतमिति फलितम् ॥ १२५ ॥

असङ्गस्य यतस्सङ्गो विनाऽज्ञानं न युज्यते ।
अतस्सार्वज्ञमप्यज्ञानापेक्षमिति यन्मतम् ॥ १२६ ॥

'असङ्गश्रुतिस्तु परमेश्वरस्य पापादिसंबन्धाभाववादिनी' इति वादावल्युक्तिं समर्थयितुं आक्षिपति **असङ्गस्येति** । यदुक्तं 'ब्रह्म नाज्ञानाश्रयः सर्वज्ञत्वात्' इति न तद्युक्तम् । हेतोर्विरुद्धत्वात् । 'असङ्गो ह्ययं पुरुषः' इति श्रुतिः खलु ब्रह्मस्वरूपज्ञप्तेः असङ्गत्वं अभिधत्ते । 'यः सर्वज्ञ' इति श्रुतिः तस्याः सर्वसंबन्धम् । न च श्रुत्योरन्यतराप्रामाण्यं युक्तम् । कथं तर्हि विरोधपरिहार इत्यतः ब्रह्म स्वभावतोऽसङ्गमपि अज्ञानरूपोपाधिसंबन्धेन सर्वज्ञं इत्येव व्यवस्थाऽऽश्रयणीयेत्याह **विनेति** । तथा च सर्वज्ञत्वहेतुर्विरुद्ध इति वक्ति **अत इति** ॥ १२६ ॥

स प्रष्टव्यः किमज्ञानं सन्धानकरणी तव ।
किं वा द्रवत्वनिबिडत्वाहर्सीसादिधातुवत् ॥ १२७ ॥

परिहरति **स इति** । **प्रष्टव्यः** प्रश्नपूर्वकं दूषणीय इति यावत् । अन्यथा छलप्रसङ्गात् । **संधानकरणी** युद्धादौ विश्लेषितस्योत्तमाङ्गस्य साङ्गोपाङ्गकबन्धेन संश्लेषसम्पादकसन्धानकरण्याख्यवनस्पतिवत् , किं अज्ञानं दूरस्थतया विश्लिष्टाया ब्रह्मचितः सर्वपदार्थैः संबद्धत्वसंपादनहेतुः इति भावः । **तत्र** ब्रह्माश्रिततया त्वदभिमतम् । **सीसादिधातुवत्** । यथा

सीसत्रप्वादिकं पाकेन द्रवीभूय पुनः निबिडतां प्राप्य कांस्यादिपात्रखण्डद्वयस्य अखण्डतासम्पादकं तथा किं सखण्डस्य ब्रह्मज्ञानस्य सर्वसङ्गसंपादने हेतूभूय अखण्डत्वसंपादकं वेति भावः ॥ १२७ ॥

व्यापिनी चिन्न नेतव्या नानेतव्या च केनचित् ।
अतस्स्वतस्तत्तदर्थसङ्गस्तस्या भविष्यति ॥ १२८ ॥

आद्यं पक्षं दूषयति **व्यापिनीति** चितो नयनेन प्रपञ्चाद्विश्लेषः, पुनरानयनेन तेन संश्लेष इति वक्तव्यम् । नोभयं संभवति । चितः व्याप्तत्वेन क्रियाऽसंभवात् । क्रियया विभागसंयोगोत्पत्ती मूर्तेष्वेव न अमूर्त इति भावः । विश्लेषस्यैवासंभवेन प्रश्न एवायं न युक्त इति द्योतनाय न **नेतव्येत्युक्तिः** । उपेत्यापि विश्लेषं पुनः संश्लेषस्यासंभवद्योतनाय नानेतव्येत्युक्तिरिति विवेकः । स्वतः सतः सार्वज्ञस्य घटनाय नान्यापेक्षेत्यत्रैव तात्पर्यम् । **अतः** सङ्गशब्देन संश्लेषविवक्षाया अशक्यत्वात् विषयविषयिभावस्यैव वक्तव्यत्वात्, ज्ञानस्य विषयसंबन्धस्वभावत्वेन तदर्थमन्यानपेक्षणात्, परमते चितः स्वयं ज्ञानरूपत्वेन संबन्धस्यैवानपेक्षणाच्च । **सङ्गः** **विषयीकारित्वम्** । स्वयमखण्डायाश्चितः अखण्डत्वसंपादनार्थतः सीसादेरिवाज्ञानव्यपेक्षेति पक्षस्य दोषस्तु सुस्फुटः शिष्यैरेवोह्यतामिति न पृथङ् निराकृतः ॥ १२८ ॥

असङ्गत्वश्रुतेर्भीतिस्तवापि च ममापि च ॥ १२९ ॥

यदि तर्हि चितः विषयसङ्गः स्वभावः, असङ्गत्वश्रुतिविरोध आपद्यत इत्यतो वक्ति **असङ्गत्वेति** । **भीतिः** विरोधापत्तिशङ्का । **तवापीति** । तथा च 'यत्रोभयोः सम' इति न्यायेन न मां प्रत्येव पर्यनुयोग इति भावः ॥ १२९ ॥

यदि स्वभावतोऽसङ्ग इत्यर्थस्स्याच्छ्रुतेस्तव ।
ममाप्युपाधितोऽसङ्ग इति स्यादुक्तयुक्तितः ॥ १३० ॥

ननु न साम्यम् । स्वभावत इति पदाध्याहारेण मम शङ्कानिस्तारसंभवादित्यतो हन्त तर्हि ममापि उपाधित इति पदाध्याहारेण परिहारः सुलभ इत्याह **यदीत्या**दिना ॥ तथा च 'परिहारोऽपि वा समः' इति न्यायेन पुनः पर्यनुयोगानुपपत्तिस्तदवस्था । दोषपरिहारयोः साम्योक्तिरियमापाततः । वस्तुतो मत्पक्ष एवादरणीय इत्याह **उक्तयुक्तित इति** । ज्ञानमात्रस्य विषयीकारित्वस्वाभाव्यादिति 'स्वतस्तत्तदर्थसङ्ग' इति पूर्वोक्तयुक्तित इति भावः । तदुक्तं तत्वोद्योतटीकायां 'निर्विषयत्वे ज्ञानमेव न स्याद् घटवदि'ति । तथा च चित् स्वभावत एव विषयसम्बन्धवती न तु पुनरुपाधित इति मत्पक्ष एव प्रमाणवानिति भावः ॥ १३० ॥

किञ्च त्वदज्ञानतोऽपि सङ्गस्तस्य कथं वद ।
यदसङ्ग इति श्रुत्या सर्वसङ्गो निषिध्यते ॥ १३१ ॥

अज्ञानसम्बन्धाद्ब्रह्म सर्वज्ञमिति तदा स्याद्यदि ब्रह्म अज्ञानसंबन्धवद्भवेत् । तदेव त्वन्मतेऽसम्भवि । असङ्गश्रुतेः संबन्धसामान्याभावार्थकत्वस्य त्वया स्वीकृतेः । तथा च त्वदर्थस्त्वत्पक्षमेव व्याहन्तीत्याह **किञ्चेति** । संबन्धसामान्यशून्यं अज्ञानसंबन्धवच्चेति स्फुटा व्याहतिरिति भावः । **यत्** यस्मात् । **निषिध्यते** त्वयेति शेषः । मत्पक्षे तु 'लेपरूपमपाकरोदि'ति गतिर्वक्ष्यत इति भावः ॥ १३१ ॥

अथाज्ञानान्यसङ्गो नेत्यर्थेऽनर्थपरंपरा ।
या श्रुतिर्निरनिष्टं तं निरवद्यं च शंसति ।
महाशक्तिमतस्तस्य सा दोषं किल शेषयेत् ॥ १३२ ॥

परपक्षे व्याहतिपरिहारमाशङ्कते **अथेति** । तथा च असङ्ग इत्यत्र नञ् न सामान्याभावपरः किं तु अज्ञानव्यतिरिक्तविशेषाभावपर एवेति भावः । परिहरति **अर्थे इति** । त्वदुक्तरीत्या सङ्कोचेनार्थेऽङ्गीक्रियमाणे सतीत्यर्थः । **अनर्थेति** नञः अभावः विरोधश्चार्थः । प्रमाणानुगुण्याभावः प्रमाणविरोधश्चेति । **परम्परेति** । प्रमाणसामान्याभावः सर्वप्रमाणविरोधः व्याहतिः इत्यादिका । श्रुतिविरोधं तावदाह **निरनिष्टमिति** । अज्ञानं तु अनिष्टं सर्वदोषमूलत्वात् अवद्यं चेति कथं एषा श्रुतिः तत्संबन्धं ब्रह्मणो न निरुणद्धि इत्याशयः । युक्तिविरोधमाह **महाशक्तिमत इति** । 'पराऽस्य शक्तिर्विविधैव श्रूयते' इति श्रुतिसिद्धपूर्णशक्तिमत इत्यर्थः । तथा च 'परमात्मा अज्ञानाद्यशेषदोषरहितः पूर्णशक्तिमत्त्वादिति युक्तिविरोधः । इयं च युक्तिः सर्वधर्मोपपत्तिनये व्युत्पादिता । **किल** अपहासे ॥ १३२ ॥

सर्वेश्वरत्वकर्तृत्वसर्वव्यापित्वपूर्वकान् ।
गुणान्पोषयितुं कस्मान्नादोषं शेषयेज्जगत् ॥ १३३ ॥

जगता सह नियम्यनियामकभावं, व्याप्यव्यापकभावं, कर्मकर्तृभावं इत्येतान्संबन्धान् असङ्गश्रुतिर्नैव निषेधति । तेषां 'एष सर्वेश्वरः', 'स हि कर्ता' 'तन्वा वृधान' इत्यादिश्रुतिसिद्धत्वात् । किं तु तान् शेषयेदेव । गुणोत्कर्षे महातात्पर्यवत्या श्रुत्या कथं गुणनिषेधः इति भावः । **अदोषं** भगवति दोषानापादकम् । **जगत्** जगता सह पूर्वोक्तसंबन्धजातम् ॥ १३३ ॥

स्वसङ्गवन्मङ्गलार्थं सङ्गमङ्गीकरोति तत् ।
अज्ञानदुःखकर्मादिलेपरूपमपाकरोत् ॥ १३४ ॥

परमते अनर्थान्तरमाह **स्वसङ्गवदिति** । अयं भावः । यदि वाक्यमिदं सङ्गसामान्यं निषेधेत् तर्हि स्वेन सह प्रतिपाद्यप्रतिपादकभावलक्षणसंबन्धमपि निषेधेत् तथा चाबोधकं सदप्रमाणमापद्येत इति उपपत्तिविरोधः

परामिमतार्थस्येति भावः । यद्वा व्याघातरूपमनर्थान्तरं चाह **स्वसङ्गवदिति** स्वेत्यस्य पूर्वप्रकृतमसङ्गत्वमर्थः । तेन सङ्गं असङ्गत्वरूपधर्मसंबन्धं **यदि निषेधेत्** तर्हि व्याहतभाषिणी स्यात् । स्वयं विहितस्य स्वेनैव निषेधे कथं न व्याहतिरिति । **मङ्गलार्थं** मङ्गलानां श्रुतिस्मृतीनां **अर्थं** अभिधेयं **सङ्गं** मङ्गलगुणसङ्गं परममङ्गलमहालक्ष्मीसङ्गं च । **अङ्गीकरोति** न प्रतिषेधति । 'अप्रतिषिद्धमनुमतमि'ति न्यायादित्याशयः । तर्हि निषेधस्य को विषय इत्यतः चिन्तासन्तापाद्यशेषदोषलेप एवेत्याह **अज्ञानेति** । तदुक्तं न्यायामृते प्रतिकर्मव्यवस्थाभङ्गे ''असङ्गो ह्ययमिति श्रुतिरीश्वरस्य तत्तत्कृतलेपाभावपरा 'स यत्तत्र किञ्चित्पश्यति अनन्वागतस्तेन भवति' इति पूर्ववाक्यात् 'यथाऽऽकाशस्थितो नित्यं वायुः सर्वत्रगो महान्' इत्यादिस्मृतेश्च'' । इति ॥ १३४ ॥

अथवा दुर्जनैस्सङ्गं स्नेहरूपं निषेधति ।
प्रमातृत्वप्रमेयत्वसङ्गं वा तैर्न्यवारयत् ।
अतस्त्वच्छरपातस्य लक्ष्यं वक्षोऽभवत्तव ॥ १३५ ॥

'सङ्गस्तु गुणसम्प्रीतिर्गुणवत्त्वेऽतिनिश्चयात्' इत्येकादशस्कन्धभागवततात्पर्योक्तिमनुरुन्धानोऽसङ्गश्रुतेरर्थान्तरमाह **अथवेति** । **दुर्जनैः** असङ्गश्रुतेरन्यथाऽर्थं परिकल्प्य भगवतो गुणसंबन्धमपलपद्भिर्मायावादिभिः । **सङ्गं स्नेहम्** । **निषेधति** 'परा पूर्वेषां सख्या वृणक्ति' इति श्रुतेः । इदमुपलक्षणम् । सङ्गविरुद्धं च द्वेषं अभिधत्ते इत्यपि ग्राह्यम् । 'मोघज्ञाना विचेतसः' 'विदूरकाष्ठाय मुहुः कुयोगिनां' इत्यादिस्मृतिलब्धं असङ्गश्रुतेः पुनरर्थान्तरमाह **प्रमातृत्वेति** । प्रमाश्रयत्वनिवारणेन परेषां ब्रह्मविषयिणीं भ्रान्तिं संमन्यते । **शरस्य** असङ्गश्रुतेः । **पातस्य** ब्रह्मणः अज्ञानसंबन्धं साधयितुं त्वया उदाहरणस्य । **त्वद्वक्षः** ब्रह्मणः अज्ञानाश्रयत्वलक्षणस्तव

सिद्धान्त एव लक्ष्यं निराकृतिविषयः । वृकासुरस्येव तवायमुद्यमः अपह सनीय इति भावः ॥ १३५ ॥

किञ्च सार्वज्ञमज्ञानसापेक्षमिति यद्वचः ।
मूकोऽहमितिवत्तच्च विरुद्धमिति मे मतिः ॥ १३६ ॥

स्वक्रियाविरोधश्च परस्येत्याह **किञ्चेति ॥ स्वक्रिया** ब्रह्मणोऽज्ञानाश्रयत्वबोधनाय श्रुत्युदाहरणरूपा, तज्ज्ञाप्यः अर्थः ब्रह्मणः श्रुत्या बोध्यबोधकभावलक्षणसङ्गरूपः, तद्विरुद्धः अर्थः ब्रह्मणः सर्वथा सङ्गाभावरूपः, तत्प्रतिपादकं वाक्यं श्रुतेरपार्थवर्णनपरं तत्प्रयोक्तृत्वादिति भावः । तत्र दृष्टान्तो **मूकोऽहमितिवदिति** ॥ तच्चेत्यत्र चशब्देन स्ववचनविरोधं समुच्चिनोति । सर्वज्ञं ब्रह्म अज्ञानाश्रयश्चेति वाक्ये, 'मे माता वन्ध्या' इत्यत्रेव पदयोरेव मिथो विरोध इति ॥ १३६ ॥

मायां व्युदस्य चिच्छक्त्या कैवल्ये स्थित आत्मनि ।
इति भागवतोक्त्या यच्चिदप्यज्ञाननाशिनी ।
स्वरूपज्ञानमप्यज्ञानस्य वैरि न संशयः ॥ १३७ ॥

ननु सर्वज्ञं ब्रह्म मायाशबलम् । न तदज्ञानाश्रयः । किं नाम शुद्धचिदेव । यथोक्तं 'आश्रयत्वविषयत्वभागिनी निर्विशेषचितिरेव केवला' इति । एवं स्वरूपज्ञानं न अज्ञानं विरुणद्धि किं नाम मानसज्ञानमेव । अतो नोक्तो दोष इत्यत आह **मायामिति** । अत्र स्मृतौ चिच्छक्तेरेव अज्ञाननिरासकत्वं उच्यते । तच्छून्यस्य कैवल्ये स्थितस्य तुरीयस्य शुद्धस्यैव तुरीयं तत्सर्वदृक् सदा' इति श्रुत्या सर्वज्ञत्वं वर्ण्यते । अतः शुद्धचित एवाज्ञानाश्रयत्वमिति, सर्वज्ञं शबलमिति च, प्रक्रियाद्वयमपि श्रुतिस्मृतिविरोधेनापहस्तितं वेदितव्यम् । **यत्** यस्मात् । अपिर्वृत्तिज्ञानं समुच्चिनोति ।

वैरि नाशकम् । अङ्गीकर्तव्यत्वं साध्यम् । तेन न साध्याविशिष्टता । तथा च स्वरूपज्ञानं, अज्ञाननाशकत्वेन अङ्गीकर्तव्यं, तथा स्मृत्युक्तत्वात्, इति प्रयोगो ध्येयः ॥ १३७ ॥

सुखज्ञाने सति तदा तदज्ञानं च कोऽन्वभूत् ।
सत्यज्ञानेऽनवच्छिन्नसुखं वा कोऽन्वभूद्भवे ॥ १३८ ॥

प्रदीपस्यान्धकारनिवर्तकत्वमिव, स्वरूपज्ञानस्याज्ञाननिवर्तकत्वं स्वभाव इत्येतदनुभावयति **सुखेति** । सुखं आन्तरत्वात्साक्षिवेद्यमेव । तच्च त्साक्षिज्ञानं स्वरूपात्मकं अज्ञानसमकालीनं समानविषयकाज्ञानाविरोधीति यावत् । **तदा** सुखानुभवकाल एव । कः अन्वभूत् इति पदच्छेदः । न चेष्टापत्तिः । तथा सति सुखं न जानामि इति अनुव्यवसीयेत इति भावः । एवं अज्ञानं यदि स्वरूपज्ञानाविरोधि तर्हि **भवे** संसारदशायां अनवच्छिन्न-मोक्षसुखाज्ञानकाले एवेति यावत् तथाविधसुखानुभवः स्यात् । न च सोऽस्ति । तथा च चितोऽज्ञानस्य चाविरोधोऽनानुभविक इति स्थितिः ॥ १३८ ॥

यद्भातं न तदज्ञातमिति यत्तत्वदीपने ।
स्वयमप्याह सार्वज्ञाज्ञत्वे तद्दूरदूरगे ॥ १३९ ॥

भातं स्वरूपज्ञानविषयः । 'तमेव भान्तं' इति श्रुतौ परेण भान-शब्दस्य स्वरूपज्ञानपरतयैव व्याख्यानात् । **तत्वदीपनं** मायावादिग्रन्थ-विशेषः । **तत्** तस्मात् अनुभवविरोधात् स्ववचनविरोधाच्च । **दूरदूरगे** वीप्सायां द्विर्वचनं; परस्परपरिहारेणैव वर्तमाने ॥ १३९ ॥

अज्ञताऽखिलसंवेत्तुर्घटते न कुतश्चन ।
इत्युक्तमत एवार्यैः कार्यधुर्यैर्महात्मभिः ॥ १४० ॥

कुतश्चन स्वभावतः उपाधितो वा । **आर्यैः** मध्वाचार्यैः 'मध्वार्याणां गुरुं भजे' इत्यच्युतप्रेक्षतीर्थवर्णनात् । 'कर्तव्यमाचरन्कार्यं अकर्तव्यमनाचरन् ॥ तिष्ठति प्रकृताचारे स वा आर्य इति स्मृतः' इति स्मृतेः शुद्धभागवतधर्मनिरतैः । **कार्यधुर्यैः** 'सर्वज्ञमन्यमनवेक्ष्य स कार्यवार्ये' इति सुमध्वविजयोक्तेः दुर्भाष्यसन्तमसनिरसने एकैकसमर्थैः । **महात्मभिः** जीवोत्तमैः ॥ १४० ॥

ज्ञाने सत्येव चाज्ञानं यदीदं तर्हि किं नञा ।
नाम्नि विप्रतिपत्तिस्ते जानतां ज्ञानमेव तत् ॥ १४१ ॥

स्वरूपज्ञानस्य भावरूपाज्ञानस्य च विरोधाभावे अज्ञानशब्दनिष्पत्तिरेव तव दुर्घटेत्याह **ज्ञान इति** स्वरूपज्ञान इत्यर्थः । **अज्ञानं** भावरूपम् । **इदं** त्वदभिमतम् । **किं नञेति** । **अयं भावः** अज्ञानेत्यस्य ज्ञानविरुद्धं ज्ञानभिन्नं ज्ञानाभावो वाऽर्थो वाच्यः । अन्त्यौ तव नेष्टौ । अतः आद्य एवास्थेयः । तस्याप्यनभ्युपगमे इदमुपतिष्ठते **किं नञेति** । नैरर्थक्येन सर्वथाऽप्रयोग एव नञ आपद्यते । तथा च तवाज्ञानमूलक एव तत्राज्ञानशब्दप्रयोगः इति । यदि तर्हि अज्ञानपदे नञोऽप्रवेशः कीदृशी तत्पदस्य मम मते वृत्तिः सम्भाविनी इत्यत आह **ज्ञानमेवेति** । अकारस्य विष्णुः अतिशय इति चार्थद्वयमादाय विष्णोर्विषये अतिशयेन ज्ञानमित्येवार्थः समाश्रयितुमुचित इत्याह **विजानतामिति** मत इति शेषः । तथा च परविषयकज्ञाने सत्येव स्वविषयेऽप्यशेषज्ञानवान् ईश्वर इति फलितम् । एवमीदृशज्ञानवान् । अखिलसंवेत्ता इति चानर्थान्तरमिति आवयोः नाममात्र विप्रतिपत्तिः पर्यवसितेत्याह नाम्नीति ॥ १४१ ॥

यदि तन्मानसं ज्ञानं रुणद्धि तव निष्कले ।
न ब्रह्मणि मनोऽप्यस्ति तस्याज्ञानं तु केन तत् ॥ १४२ ॥

आह । नञो विरोध एवार्थः । स च मानसज्ञानेनैव न स्वरूपज्ञप्त्या अतो न कोऽपि दोष इति । तत्र प्रष्टव्यं कस्य मानसज्ञानेनेति । न तावज्जीवस्येति युक्तं । त्वन्मते ब्रह्माश्रिताज्ञानस्य जीवगतमानसज्ञानविरोधित्वासंभवात् । समानाधिकरणयोरेव ज्ञानाज्ञानयोर्विरोधनियमात् । नापि ब्रह्मणः । तस्य मानसज्ञानस्यैवाभावात् । तत्र हेतुः **मनोऽपि नास्ति इति** । अपिरेवार्थः । मनःकरणकं हि मानसम् । कारणाभावे च कार्यं दुर्घटम् । कुतस्तस्य मनो नेत्यत आह **निष्कल इति** । मनसः षोडशकलान्तर्भूतस्य 'निष्कलं निष्क्रियं शान्तमि'ति कलाविकलत्वेन प्रमिते तस्मिन्ननवकाशादिति भावः ॥ १४२ ॥

अज्ञानकल्प्यं सर्वं ते मनआदिजगत्त्रयम् ।
प्राक्सृष्टेर्न तदज्ञानं नाज्ञो भ्रान्तोऽपि वा परः ॥ १४३ ॥

न केवलं श्रुत्या, किं तु त्वत्प्रक्रिययाऽपि ब्रह्मणि मानसज्ञानाभावः सिध्यतीत्याह **अज्ञानेति** । **कल्प्यं** कार्यं । **ते** तव मते । सति अज्ञाने तदुपादानकमानसज्ञानसिद्धिः । सति च मानसज्ञाने तन्नाश्याज्ञानसिद्धिरित्यन्योन्याश्रयान्न द्वयमपि सिध्यतीति भावः । किं च ब्रह्माश्रिताज्ञानस्य वृत्तिनाश्यत्वं सृष्टेः प्रागुत तदूर्ध्वं वा । नाद्यः दत्तोत्तरत्वादित्याह **प्रागिति** । अस्तु वा कथंचित्स्थितिकाले व्यधिकरणयोरपि विरोधोपगमेन जीवगतमानसज्ञानविरोधित्वेन ब्रह्मणि त्वदभिमताज्ञानोपपत्तिः । प्राक् सृष्टेस्तु मनआदिजगत्त्रयस्यैवाभावेन मानसज्ञानरूपविरोधिन एवाभावात् न ब्रह्मण्यज्ञानोपपत्तिरित्याह **अज्ञानमिति** । **तत्** वृत्तिनाश्यत्वेन त्वदभिमतम् । **भ्रान्त इति** अज्ञानकार्यत्वाद्भ्रान्तेरित्याशयः ॥ १४३ ॥

सृज्यजीवस्य मनसो वृत्त्या नाश्यत्वतो यदि ।
तदज्ञानं तव मतं युक्तिर्नाङ्गीकरोति तत् ॥ १४४ ॥

द्वितीयं निराह **सृज्येति** स्रक्ष्यमाणेत्यर्थः । **तत्** वृत्तिनाश्यत्व-लक्षणं त्वदभितज्ञानशब्दप्रवृत्तिनिमित्तं अज्ञानत्वम् । न अङ्गीकरोतीत्युपलक्षणं प्रतिक्षिपतीत्यपि ग्राह्यम् ॥ १४४ ॥

अन्यज्ञानेनान्यनिष्ठस्याज्ञानस्यानिवर्तनात् ।
किं देवदत्तज्ञानेन यज्ञदत्ताज्ञता गता ॥ १४५ ॥

तदेवाह **अन्येति** ब्रह्माज्ञानं न जीववृत्त्या निवर्त्यं तदसमानाधिकरण-त्वात् इति विवक्षिते प्रयोगे सामान्यव्याप्तिमुक्त्वा दृष्टान्तमाह **किं इति** देवदत्तज्ञानानिवर्त्ययज्ञदत्ताज्ञानवत् इति भावः । ज्ञानस्य अज्ञाननिवर्त-कत्वे समानाधिकरणत्वं तन्त्रमिति न्यायो व्युत्पादितो ध्येयः ॥ १४५ ॥

ऐक्येन तत्समाधानमपि दत्तोत्तरं तव ।
ऐक्ये सति तदज्ञानं तत्सिद्धौ च तदेकता ॥ १४६ ॥
स्वाज्ञानादेव तद्ब्रह्म जीवतामेति चेद्धि सा ।
अतोऽन्योन्याश्रयाच्चात्र नञर्थो नाश्यता न ते ॥ १४७ ॥

नन्वसिद्धो हेतुः । ऐक्येन जीववृत्तेरेव ब्रह्मवृत्तित्वेन वृत्त्यज्ञानयोः समानाधिकरणत्वादिति चेत्स्यादप्येवं यदि ऐक्यमेव सिद्धं स्यात् । तदेव नास्तीत्याह **दत्तेति** । त्वन्मते जीवब्रह्मणोरिव देवदत्तयज्ञदत्तयोरपि ऐक्य-साम्येन पूर्वोक्तोऽतिप्रसङ्गो दुष्परिहर इत्याह **तवेति** मत इति शेषः । अन्योन्याश्रयं दोषान्तरं चाह **ऐक्य इति** जीवब्रह्मणोरैक्ये सति जीव-वृत्तेरेव ब्रह्मवृत्तित्वेन स्रक्ष्यमाणजीववृत्तिनाश्यत्वेन ब्रह्माश्रिताज्ञानसिद्धिः । तत्सिद्धौ च ब्रह्मण एवाज्ञानोपाधिसंबन्धेन जीवभावप्राप्तिरिति तदैक्यसिद्धि-रिति । **अतः** व्यधिकरणत्वात् ऐक्येन समाधानासंभवाच्च । **नञर्थ इति** तथा च ज्ञानमज्ञानस्यैव निवर्तकमिति त्वन्मतहानिरिति भावः ॥ १४६ ॥ ॥ १४७ ॥

कथमावरणे सत्येवान्यस्याप्यपरोक्षधीः ।
ज्ञानोत्पत्तिविरोध्येव यस्मादावरणं विदुः ॥ १४८ ॥

व्यधिकरणाया जीववृत्तेर्नाज्ञाननाशकत्वं युक्तमित्युक्तम् । इदानीं अज्ञानाख्यावरणसद्भावदशायां वृत्तिरेव नोत्पत्तुमर्हति दूरे तयाऽज्ञाननिवृत्तिवार्तेत्याह **कथमिति** । एवेत्यनेनोत्तेजकाभावो ध्वनितः । **अन्यस्यापि** जीवस्यापि । उपाधितो भिन्नस्यापि स्वभावत ऐक्यमापन्नस्येत्यर्थः । तेन व्यधिकरणस्य कथं प्रतिबन्धकत्वमिति चोद्यानवकाशः । अन्यथा प्रतिबन्धकलक्षणव्याघात इत्याह **ज्ञानेति** । विरोधि इति द्वितीया । एवं आवरणमित्यपि । यद्वा आवरणमित्यनन्तरं इतीति पूरणीयम् । **विदुः** लक्षणज्ञा इति शेषः । कार्यानुत्पादव्याप्यत्वं, कारणनिष्ठकार्यानुकूलशक्तिविघटकत्वं वा प्रतिबन्धकत्वं इति ज्ञानिप्रसिद्धिरनेनोक्ता ध्येया ॥ १४८ ॥

तदुत्पत्त्यविरोधे तन्नाश्यताशाऽपि किंकृता ।
बन्धस्यैव कुतो नाशस्तर्हि न स्याच्छ्रुतेर्बलात् ॥ १४९ ॥

उक्तलक्षणानङ्गीकारे परस्यानिष्टं प्रसञ्जयति **तदिति** । तदुत्पत्तिसहिष्णुत्वे सर्वथा तदविरोधापत्त्या वृत्तिनाश्यत्वमप्यज्ञानस्य दुर्घटमेवेति भावः । ज्ञाननाश्यत्वं च तवाशासितमित्याह **आशेति** । अपिशब्देन दूरे तत्सिद्धिरिति सूचयति । केन कृतेति विग्रहः । **तर्हि** विरोधस्याप्रयोजकीकरणे । एवशब्देनाज्ञाननाशद्वारकत्वं बन्धनाशस्य तदभिमतं व्यवच्छिनत्ति । एतत्पक्षे श्रुतिसंमतिरप्यस्तीत्याह **श्रुतेरिति** । तरति शोकमित्यादेः इत्याशयः । बलादित्यनेन श्रुतीनां निरवकाशतामाह ॥ १४९ ॥

अज्ञानमेव ज्ञानेन नाश्यं बन्धस्तु नेति वाक् ।
तदा स्याद्यदि नाशाच्च प्राक्तयोरस्याद्विरुद्धता ॥ १५० ॥

ननु 'दृष्ट्वैव तं मुच्यते' इति श्रुतौ एवकारः अयोगव्यवच्छेदपरत्वेनाप्युपपन्न इति श्रुतिः सावकाशा । ज्ञानेनाज्ञाननाशः तेन तदुपादानबन्धनाश इत्यप्यर्थस्य संभवादिति चेन्न । स्यादेवं श्रुतेरन्यार्थकल्पना यदि ज्ञानाज्ञानयोरितः प्राक् विरोधः प्रमितः स्यात् । नैतदस्ति । तथा हि । विरोधः अज्ञानस्य ज्ञाननाश्यत्वमेव वा ज्ञानोत्पत्तिप्रतिबन्धकत्वं वा । नाद्यः बन्धेऽपि संभवात् । न द्वितीयः वृत्तेरेवानुत्पत्तौ तन्नाश्यत्वोक्तेरसंभवस्योक्तत्वात् । अतः श्रुतिबलाद्बन्धस्यैव ज्ञाननाश्यत्वं अङ्गीकार्यमिति सुस्थम् ॥ १५० ॥

मनसो ह्यचिदंशस्ते घटप्रायो न नाशकः ।
चिदंशस्य बलान्नाशे कथं ब्रह्मचिति स्थितिः ।
अतो ब्रह्माश्रिताज्ञाने नञः कार्यं न विद्यते ॥ १५१ ॥

मनसः चिदचित्संवलनात्मकस्य त्वदभिमतवृत्तिप्रतिफलितचैतन्यस्य । 'स्वच्छेन्तःकरणेऽशनिप्रसृमरे' इत्यादिना त्वदुक्तप्रक्रियानुरोधादिति भावः । **घटप्राय इति** । इदं च 'न चेद्घटादितुल्यस्ये'त्यादिना (श्लो. ११८) प्राग्व्युत्पादितमनुसंधेयम् । अतः परिशेषाच्चिदंशेनैव अज्ञाननाशो वक्तव्यः । अस्त्विति चेत्तत्राह **कथमिति** अन्धकारविरोधिनि प्रकाशेऽन्धकारस्थितिरिव अज्ञानविरोधिन्यां ब्रह्मचिति नाज्ञानस्थितिः संभाविनीति भावः । उपसंहरति **अत इति** । चिदाश्रितत्वोपगमेन चिता विरोधस्य, निष्कले ब्रह्मणि मनस एवाभावेन ब्रह्ममनोवृत्त्या विरोधस्य, व्यधिकरणत्वात्, आवरणे सति वृत्त्युत्पत्तेरेवायोगाच्च जीवमनोवृत्त्या विरोधस्य चेति त्रेधाऽपि विरोधस्य दुर्वचत्वादिति भावः । **कार्यं** विरोधार्थकत्वम् ॥ १५१ ॥

अस्य विद्येति विद्यैव तत्पदेनोच्यते हरौ ।
तदधीना रमा चाभिमन्यमानाऽथवा जडा ।
ताभिस्स्पृष्टमिदं विश्वं भ्रान्त्युत्थं केन कथ्यताम् ॥ १५२ ॥

'जानतां ज्ञानमेव तदि'ति प्रागुक्त विग्रहप्रदर्शनेन विशदयति **अस्येति** 'अकारो विष्णुरुद्दिष्ट' इत्यभिधानसिद्धस्य विष्णोरिति भावः । षष्ठ्या अधीनत्वार्थमाश्रित्याह **रमेति** । **विद्या** ईश्वरैकाधीनयथार्थज्ञानरूपा । जडप्रकृतौ अविद्याशब्दं व्युत्पादयति **अभिमन्यमानेति** विष्ण्वधीनविद्याशब्दितरमाऽभिमन्यमानेत्यर्थः । अभिमान्यभिमन्यमानयोरैक्यव्यपदेशः 'तथौ प्राणात्मकौ प्रोक्तौ' इति भाष्योदाहृतप्रमाणसिद्धः । **ताभिः** ईश्वरेण स्वतन्त्रेण, तन्मात्राधीनया रमया निमित्तया, प्रकृत्या उपादानेन चेति तिसृभिरविद्याभिः । **इदं** प्रमितम् । सृष्टमिति हेतुगर्भं विशेषणम् । तेन विमतं न भ्रान्तिकल्पितं सृष्टत्वात् व्यतिरेकेण शुक्तिरूप्यवत् इति प्रयोगः सूचितः । न चासिद्धिः 'भवो निरोधः स्थितिरप्यविद्यया' इति प्रमाणतः सिद्धेः । विपक्षे हेतूच्छित्तिः । **भ्रान्त्युत्थं** भ्रमविषयः । केनेत्याक्षेपे । ईश्वरस्य सत्यजगत्सृष्टिसमर्थत्वेन, निमित्तोपादानकारणानां च सत्यत्वेनेति भावः ॥ १५२ ॥

यन्मिथ्यात्वं परो वक्ति स्वाज्ञानस्य तथैव तत् ।
यस्मात्तदस्मदीशाने नाभूदस्ति भविष्यति ॥ १५३ ॥

यत् मिथ्यात्वं इति पदच्छेदः । **वक्ति** अविद्यातत्कार्ययोरन्यतरत्वं मिथ्यात्वं इति तल्लक्षणकथनेन । **स्वाज्ञानस्य** मायावादिना कल्प्यमानस्य ब्रह्माश्रिताज्ञानस्य । **तथैव** यथार्थमेव । **अस्मदीशाने** 'यः सर्वज्ञः सर्ववित्' 'सर्वज्ञं सर्वकर्तारं नारायणमनामयं' इत्यादिश्रुतिस्मृतिभिः सदा सर्वज्ञत्वेन प्रमिते नारायणे । नाभूदित्यादिना त्रैकालिकनिषेधप्रतियोगित्वलक्षणं मिथ्यात्वमुक्तम् ॥ १५३ ॥

निरनिष्टो हि सोऽसंगो निरवद्यः परः प्रभुः ।
अनीदृग्जीवता तस्य नाज्ञानेन न कर्मणा ॥ १५४ ॥

एवं सर्वज्ञे परमात्मनि अज्ञानासंभवव्युत्पादनेन तस्य चिन्तासन्तापादिसकलदोषातिदूरत्वं 'निरनिष्टो निरवद्यः' 'असङ्गो ह्ययं पुरुषः' इत्यादिश्रुतिसिद्धं सिद्धं, अज्ञानमूलत्वात्सर्वदोषाणामित्याह **निरनिष्ट इति** । 'नित्याताद्दशचिच्चेत्ययन्तेष्टो नो रमापतिः' इति भगवत्पादोक्तदिशा जीवभेदोऽप्यनेन सिद्ध इत्याह **अनीदृगिति** ॥ उपाधिसंबन्धेनाप्यस्य जीवभावं प्रत्याख्याति **नेत्यादिना** । अज्ञानस्य निरस्तत्वात् कर्मलेपाभावस्यासङ्गश्रुतिसिद्धत्वाच्चेति भावः । तदुक्तं वादावल्यां 'असङ्गश्रुतिस्तु परमेश्वरस्य पापादिसंबन्धाभाववादिनी' इति ॥ १५४ ॥

अज्ञानासंभवादेव नाध्यासोऽप्यखिलेश्वरे ।
लेपायोग्ये नभोदेशे न पंको नापि तन्मलम् ॥ १५५ ॥

अज्ञानस्याध्यासं प्रति निमित्तत्वात्तदभावे तदभावोऽपि सुलभ इत्याह **अज्ञानेति** । अखिलेश्वरे इत्यनेन दोषनिरसनं न योगसामर्थ्यात् किंतु स्वरूपशक्तेरेवेति ध्वनयति । प्रसक्तस्य लेपस्य न निराकृतिः किं तु लेपायोग्ये तत्प्रसक्तिरेव नेति भावः । तत्रैवानुरूपमर्थान्तरं न्यस्यति **लेपेति** । यथोक्तं गीतायां 'यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते । सर्वत्रावस्थितो देहे तथाऽऽत्मा नोपलिप्यते' इति ॥ १५५ ॥

तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तप ।
इति गीतावचनतो यस्सर्वज्ञ इति श्रुतेः ॥ १५६ ॥

तानीत्यादिना कृष्णस्य सर्वज्ञत्वं, 'न त्वं वेत्थ' इति अर्जुनोपलक्षितसर्वजीवानां अज्ञत्वं अवगम्यते । एवं 'यः सर्वज्ञ' इति श्रुतेर्ब्रह्मणः सर्वज्ञत्वम् च । 'आत्मानमन्यं च स वेद विद्वानपिप्पलादो न तु पिप्पलादः' इत्यादीन्यपि प्रमाणान्यत्र भवन्ति । अतो नाज्ञानस्य ब्रह्माश्रितत्वमित्याह **तानीति** ।
॥ १५६ ॥

अहमज्ञ इति प्रोक्तं त्वत्प्रत्यक्षं न मत्प्रभोः ।
अनुमायाश्च बाधोऽभूदागमोऽन्यार्थमागमत् ॥ १५७ ॥

प्रोक्तं त्वत्प्रत्यक्षं अज्ञानसाधनाय त्वदुदाहृतं प्रत्यक्षम् । **प्रभोः** स्वेन धाम्नाऽज्ञानादिदोषनिरसनसमर्थस्य । 'अहमज्ञ' इति प्रत्यक्षविषयोऽहमर्थो जीव एवेति भावः । 'अहमित्येव यो वेद्यः स जीव इति कीर्तितः' इति तत्वनिर्णयोदाहृतश्रुतेः । **अनुमायाः** स्वदेशगतवस्त्वन्तरपूर्वकं इत्याद्यज्ञानसाधकाभिमतायाः । **आगमः** 'मायिनं तु महेश्वरं' इत्यादिः । **अन्यार्थं** पूर्वार्धप्रकृतप्रकृतिनियामकत्वादिरूपम् । ऐन्द्रियकार्थविषये प्रत्यक्षस्यागमापेक्षया प्राबल्यं तत्त्वमसिवाक्ये तत्त्वंपदयोर्लक्षणां व्याचक्षाणस्य परस्यापि संमतमेव । तथा हि तद्वाक्यं 'कथमेकत्वमनयोर्घटते विपरीतयोः । प्रत्यक्षेण विरोधोऽयमुभयोरुपलभ्यते' इति । एवं 'कामोऽस्मि' इत्यस्य कामनियामकोऽस्मि इति व्याख्यानावसरे तत्र तत्र ॥ १५७ ॥

अतो ब्रह्माश्रिताज्ञानपक्षो निर्मूल एव ते ।
अज्ञानं ब्रह्मणि न चेत्तत्रेदं कल्पितं च न ।
उपादानं तवाज्ञानमुपादेयप्रदेशि तत् ॥ १५८ ॥

अतः सकलप्रमाणानां जीवाश्रिताज्ञानसाधकत्वात् **निर्मूलः** प्रमाणशून्यो बाधितश्च । अतः ब्रह्मनियतं जीवाश्रितं चाज्ञानमिति पक्ष एव निर्दोषः । तदुक्तं भगवत्पादैः 'स्वभावाज्ञानवादस्य निर्दोषत्वादि'ति । माऽस्तु तर्हि ब्रह्मण्यज्ञानमिति वैयात्याद्ब्रुवन्तं प्रत्याह **न चेदिति** । आध्यासिकसंबन्धासिद्ध्या जगन्मिथ्यात्वासिद्धिरिति भावः । कथमेतदित्यत आह **उपादानमिति** । **तवेति** । मत्पक्षे तु नैष दोषः । अज्ञानं भ्रमं प्रति निमित्तमेव । भ्रमश्च सत्योऽन्तःकरणोपादानकः । रूप्यं च न भ्रमात्मकं किं त्वत्यंतासदेवेति मदभ्युपगमादिति भावः । तथा च जीवस्याज्ञानाश्रयत्वेन तस्यैव जगदारोपाधिष्ठानत्वं त्वयैष्टव्यम् । न च तत्संभवति । तस्य मिथ्यात्वादिति हृदयम् ॥ १५८ ॥

अज्ञानापगमे तत्तच्चैतन्यं तस्य तस्य दृक् ।
इत्यादिप्रक्रिया सर्वा विक्रियाऽभूत्तवाधुना ॥ १५९ ॥

अध्यासस्याविशिष्टत्वेन सर्वेषां सर्वदा सर्वोऽपि प्रपञ्चः प्रकाशेतेत्यतिप्रसङ्गपरिहाराय परेण प्रतिकर्मव्यवस्थोच्यते । यस्य चैतन्यस्य इन्द्रियद्वारेण बहिर्निर्गतमन्तःकरणं यदर्थाकारेण परिणमते तया च परिणामरूपया वृत्त्या यदर्थाधिष्ठानावरकाज्ञानं यदा निवर्तते तस्यैव, स एवार्थः तदैव प्रकाशते नान्यस्यान्योऽन्यदेति । अधिष्ठानचैतन्यं च ब्रह्मैवेति च । तदुक्तं 'सर्वप्रत्ययवेद्ये च ब्रह्मरूपे व्यवस्थिते' इति । इयं च व्यवस्था तदा स्याद्यदि ब्रह्मचैतन्यावरकं नामाज्ञानं संभवेत् । तस्यैवोक्तरीत्याऽसंभवे त्वत्प्रक्रिया सर्वापि भग्नेत्याह **अज्ञानेति** ॥ १५९ ॥

किं चाहमज्ञ इत्येव ह्यज्ञानस्याकृतिस्तव ।
मामहं न विजानामीत्याकारश्च निगद्यते ॥ १६० ॥

प्रकारान्तरेण परप्रक्रियर्यैवारोपासंभवमुपपादयति किं चेत्यादिना पंचभिः श्लोकैः । तत्र विचारणीयं किं अज्ञानदशायां विश्वभ्रम उत तदपगमे । न प्रथमः । अज्ञानभ्रमयोः विरुद्धाकारतयाऽनुभूयमानत्वात् उपादानोपादेयभावापन्नयोः समानाकारतानियतेरिति दूषणं हृदि निधाय अज्ञानज्ञानाकारं तावद्विविनक्ति **अहमज्ञ** इत्यादिना । परेण खलु भावरूपाज्ञाने अहं अज्ञः, मामन्यं च न जानामि, न किंचिदहमवेदिषं इत्यादिकं प्रमाणमुपन्यस्तम् । अज्ञानविषयश्च न जडः किं तु ब्रह्मैव । जडस्याप्रकाशरूपत्वेन तत्रावरणाप्रसक्तेः । 'प्रमाणवैकल्यादेव तदग्रहणोपपत्तेरि'ति हि तदुक्तिः । तदुक्तं भगवत्पादैः 'अप्रकाशस्वरूपत्वाज्जडेऽज्ञानं न मन्यते' इति । अज्ञानं च प्रातीतिकं प्रतीतिस्वरूपमेवेति तन्मतम् ॥ १६० ॥

एवं चाज्ञानवद्ब्रह्म नैव विश्वभ्रमो भवेत् ।
इदं जानामीति सर्वभ्रांतिर्यस्मात्प्रदृश्यते ॥ १६१ ॥

यदर्थं अज्ञानज्ञानस्याकारो निर्धारितस्तदाह **एवं चेति** । तयोरन्यो-न्यविरुद्धाकारालिङ्गितत्वादिति पूर्णायम् । विरोधं स्फोरयितुं सर्वानुभवसिद्धं भ्रान्तेराकारमभिनीय दर्शयति **इदमिति** ॥ १६१ ॥

सर्वं जानामि सर्वं च न जानामीति चैकदा ।
विरुद्धाकारसम्पत्तिरनानुभविकी चितः ॥ १६२ ॥

सर्वं जानामि इति भ्रमाकारः, सर्वं न जानामीति चाज्ञानज्ञान-स्याकारः इति ज्ञाततयाऽज्ञाततया चैकदा साक्षिचैतन्यविषयत्वं विरुद्धाकारयोः समावेशोऽनुभवविरुद्ध इत्याह **अनानुभविकीति** ॥ १६२ ॥

अथाज्ञानस्यापगमे भ्रमत्वं यदि कथ्यते ।
अज्ञानकल्पितत्वोक्तिरयुक्ताऽभूत्तदा तव ॥ १६३ ॥

अज्ञानापगमे भ्रम इति द्वितीयं कल्पं निरस्यति **अथेति** । **अज्ञान-कल्पितत्वोक्तिः** अज्ञानोपादानकत्वोक्तिः । **अयुक्ता** भ्रमः अज्ञानापगम-कालीनावस्थानवान्न तदुपादानकत्वात्, यथा तन्तूपादानकः पटः तन्त्वपगम-कालीनावस्थानवान्नेत्येवंरूपयुक्तिविरुद्धा । **तव** भ्रमोपादानत्वं अविद्याया लक्षणमिति वादिनः ॥ १६३ ।

अज्ञानरूपमेवास्य प्रपञ्चस्य विचारणे ।
वक्त्यनारोपितत्वाख्यमहिमानं ततस्स्फुटम् ॥ १६४ ॥

अज्ञानस्य रूपं इति विग्रहः । न जानामीत्यज्ञानज्ञानस्याकार इत्यर्थः । एवकारेण परेषां भ्रमत्वनिरासोपयव्युत्पादनप्रयासं व्यवच्छिनत्ति । **प्रपंचस्य**

महिमानमित्यनेन सम्बन्धः । **विचारणे** कृते सतीति शेषः । **वक्ति** ज्ञापयति ॥ १६४ ॥

विषयाश्रितमज्ञानं यद्यावरणमिष्यते ।
तर्ह्येकवृत्त्या तन्नाशे सर्वैर्दृश्येत वस्तु तत् ॥ १६५ ॥

'पुंगतमेव हि तमः' इति भगवत्पादोक्तिं समर्थयिष्यमाणः अज्ञानस्य विषयाश्रितत्वपक्षेऽतिप्रसङ्गं 'विषयाश्रितं चेदज्ञानं निवर्तते तर्ह्येकेन ज्ञातस्य घटस्यान्यैरज्ञातत्वं न स्यादि'ति तत्त्वोद्योतोक्तमाह **विषयेति** । घटावच्छिन्नचैतन्यावरकं एव घटावरकमिति उच्यते । **एकस्य** पुरुषस्य **वृत्त्या** वृत्तिफलितज्ञातृचैतन्येन आवरकाज्ञाननाशे सर्वैः तद्वस्तु दृश्येत । न च तथा दृश्यते । किं तु इतरेषां तद्विषयकमज्ञानं अनुवर्तते एव । अतः न विषयाश्रितमज्ञानं किं तु नयनगतकाचादिवत्पुरुषगतमेवेति विपर्यये पर्यवसातव्यम् ॥ १६५ ॥

विषयावरकं दीपस्तमिस्रं नाशयेद्यदा ।
तदा तद्वस्तु सर्वैश्च सुव्यक्तं किं न दृश्यते ॥ १६६ ॥

तत्र दृष्टान्तमाह **दीप इति** । **तद्वस्तु** समनस्केन्द्रियसन्निकृष्टं इति उपस्कर्तव्यम् ॥ १६६ ॥

यद्यज्ञानान्तरं तत्र पुनरावरणं भवेत् ।
तर्हि केनापि तद्वस्तु न दृश्येताऽऽवृतत्वतः ॥ १६७ ॥

परिहारं शङ्कते **यदि इति** । **तत्र** विषये । **पुनः** प्राचीनावरणापगमानन्तरमपि । तथा चाज्ञानान्तरेणावृतत्वान्न सर्वेषां तदैव दर्शनापत्तिरिति शङ्कितुरभिप्रायः । परिहरति **तर्हि इति** । **केनापि** प्राचीनेनान्येन वा ।

आवृतत्वतः अज्ञानान्तरेणेति शेषः । यत्किञ्चिदावरणसद्भावेऽपि तद्दर्शनं सर्वस्यापि दुर्घटमेवेति भावः ॥ १६७ ॥

यदि ज्ञातृविभेदेन कल्प्येतावरणं घटे ।
तदा ह्यदृष्टस्य बहोः कल्प्यत्वाद्गौरवं भवेत् ॥ १६८ ॥

नैष दोषः । अज्ञानानां प्रतिपुरुषभिन्नत्वाङ्गीकारात् । तथा चैकपुरुषसंबन्ध्यज्ञानापगमेऽपि इतरसंबन्ध्यज्ञानरूपावरणावस्थितेर्न सर्वेषां तदैव दर्शनप्रसङ्ग इत्याशङ्कते **यदीति** । समाधत्ते **तदेति** । प्रतिविषयं प्रतिपुरुषानेकाज्ञानसद्भावः किं स्वसमयानुरोधेन कल्पितः उत एवं लौकिकी प्रतीतिरस्ति । नाद्यः स्वसमयमात्रानुसरणस्यातिप्रसञ्जकत्वात् । समयान्तरानुसारेण तद्विरुद्धकल्पनासौलभ्यात् । न द्वितीयः । तदभावादेव । गौरवपराहतत्वाच्चेत्याह **बहोरिति** । प्रामाणिकगौरवं न दोषावहमित्यत आह **अदृष्टस्येति** । अप्रामाणिकस्येत्यर्थः ॥ १६८ ॥

न हि तत्तद्गृहालोकैर्नाश्यतामिस्रराशयः ।
घटादिषु प्रदृश्यन्ते ततोऽप्रामाणिकं त्विदम् ॥ १६९ ॥

अप्रामाणिकत्वमेव दृष्टान्तप्रदर्शनेनोपपादयति **न हीति** । आलोकैरिति राशयः इति च बहुवचनेन एकस्मिन्नावरणे नष्टेऽपि आवरणान्तरसद्भावात् 'केनापि तद्वस्तु न दृश्येतावृतत्वतः' इति **पूर्वोक्तोऽतिप्रसङ्गः** समाहितो ध्येयः । एवं तत्तद्गृहेत्यनेन **'बहोः कल्प्यत्वाद्गौरवं भवेदि'त्युक्तातिप्रसङ्गा**न्तरमपि समाहितं बोद्धव्यम् । **ततः लोके** एवंविधावरणान्तरस्य प्रतिनियतावरणानां वा कुत्राप्यदर्शनात् । **इदं** तदुभयकल्पनम् । नाशकतावच्छेदकरूपसाम्ये नाशकस्य व्यक्तिविशेषसम्बन्धित्वमकिञ्चित्करमिति हृदयम् ॥१६९॥

अतः पुङ्गतमेवेदं तमो मर्त्या हि तामसाः ॥ १७० ॥

अतः अज्ञानस्य विषयाश्रितत्वासम्भवात् । **इदं तमः** सम्यग्ज्ञानप्रतिरोधकत्वसाम्यात् तम इति व्यवहारविषयः अज्ञानम् । **मर्त्याः** संसारिचेतनाः **तामसाः** प्रकृतिसम्भवतमोगुणसम्बन्धवन्तः । तदुक्तं 'ज्ञानमावृत्य तु तमः प्रमादे संजयत्युत'ेति । न हि घटादयोऽचेतनास्तमसा निबद्धा इति संभवतीति भावः ॥ १७० ॥

पुंसु काचादिदोषाश्च यतस्सन्ति पृथक्पृथक् ।
अतो नानात्वमप्येषामनायासेन सिद्ध्यति ॥ १७१ ॥

ननु भवत्पक्षेऽपि दोषः समानः । प्रतिव्यक्ति अज्ञाननानात्वांगीकारात् । तत्रापि कल्पनागौरवदोषप्रसरादित्यत आह **पुंस्विति । दोषाः** अज्ञानहेतुभूताः । **अतः** हेतुनानात्वात् **एषां** कार्याणां अज्ञानानां **नानात्वं** प्रतिव्यक्तिनियतत्वम् **अनायासेनेति** । न हि सामग्रीभेदेन कार्यभेदसाधने कोऽप्यायास इति भावः ॥ १७१ ॥

नाश्यनाशकयोर्ज्ञानाज्ञानयोरेकदेशता ।
तमःप्रकाशवत्सिद्धा नान्धकारोऽपि चेतने ।
दीपो वा चेतनगतस्ततस्तौ यत्र कुत्र चित् ॥ १७२ ॥

ज्ञानं तु ज्ञातृपुंस्येव तन्नाश्याज्ञानमप्यतः ।
वक्तव्यं ज्ञातृपुरुषे ब्रह्मणि स्यात्कथं वद ॥ १७३ ॥

अज्ञाननाशकस्य ज्ञानस्य ज्ञातृनिष्ठत्वेन तन्नाश्यस्याज्ञानस्यापि ज्ञातृनिष्ठत्वं युक्तिबलात्सिद्धमित्याह **नाश्येत्यादिना सिद्धेत्यन्तेन** । अज्ञानं ज्ञातृनिष्ठं ज्ञानसमानदेशत्वात् यथाऽऽलोकसमानदेशोऽन्धकार आलोकाश्रयघटाश्रितः । न चासिद्धिः । अज्ञानं ज्ञानसमानदेशं ज्ञाननाश्यत्वात् । यथा

आलोकनाश्योंधकार आलोकसमानदेश इति तत्सिद्धः । इदानीमन्धकारदृष्टान्तोक्त्या प्रसक्तां मन्दाशङ्कां परिहरति **नेत्यादिना ज्ञातृपुरुष इत्यन्तेन** । अन्धकारः ज्ञानप्रतिबन्धकः बहिःपदार्थसम्बन्ध्युपलब्धः । स च पदार्थः क्वचित्पुरुषदेहो वा घटादिर्वा । तथाऽज्ञानमपि बहिःपदार्थाश्रितं किं न स्यादिति चेन्नैवम् । दृष्टान्तस्य वैषम्यादित्याह **नेति** । तत्र नाशको दीपो विषयसम्बन्धीति तन्नाश्यस्यान्धकारस्यापि तथात्वमुपपन्नम् । ज्ञानस्य तु नियमेन ज्ञातृपुरुषाश्रितत्वात्तन्निवर्त्यस्याज्ञानस्यापि तदाश्रितत्वमेवोपपन्नमिति भावः । एतेनैवाज्ञानस्य ब्रह्माश्रितत्वमपि पराभिमतं परास्तमित्याह **ब्रह्मणीति** । अज्ञानस्य ज्ञानसमानाश्रयत्वनियमात्, उत्पद्यमानज्ञानस्याज्ञाननिवर्तकस्य ज्ञातृपुरुषनिष्ठत्वेन ब्रह्मनिष्ठत्वाभावादित्याशयः ॥ १७२ ॥ १७३ ॥

ज्ञानाज्ञाने हि पुंधर्मौ पुंस्थावेवार्थसाधकौ ॥
किं न पुंनेत्रगः काचो बाह्यार्थावरणक्षमः ।
अतस्तत्रानुमानं च परकैंकर्यमाचरेत् ॥ १७४ ॥

ननु आन्तरं विज्ञानं कथं बाह्यार्थप्रकाशनक्षमं प्रकाश्यप्रकाशकयोर्घटालोकयोः समानदेशावस्थाननियमात् । एवं आन्तरं अज्ञानं कथं बाह्यार्थावरणक्षमं आवरणाव्रियमाणयोरपि तन्नियमादिति चेत्तत्राह **ज्ञानेति** ॥ किं सहदर्शनमात्रेण नियमोऽवसीयते उत अव्यभिचारादिसंपत्तौ सत्याम् । नाद्यः अतिप्रसङ्गात् प्रमेयत्वादिना ह्रदेऽपि वह्निसाधनापत्तेः । न द्वितीयः । उभयत्र व्यभिचारात् । गोलकस्थस्य चक्षुरिंद्रियस्य प्रत्यासत्तिमहिम्ना बाह्यार्थप्रकाशनसामर्थ्यदर्शनात् । एवं पुरुषनेत्रस्थितकाचादेः बाह्यार्थज्ञानप्रतिबन्धकत्वोपलंभाच्चेत्याह **किमिति** । काचस्य रश्मिद्वारकेंद्रियार्थसन्निकर्षविघटकत्वेनेति भावः । साक्षात्परंपरासाधारणप्रत्यासत्तिमात्रमेवापेक्षितम् । न तु समानदेशत्वमपीति भावः । साध्यसाधनभावेऽनुभवसिद्धे काऽत्र

कथन्तेत्याशयः । तत्रानुमानं आत्माश्रिताज्ञानसिद्धये त्वदुपन्यस्तं, प्रमाण-ज्ञानं स्वप्रागभावव्यतिरिक्तस्वविषयावरणस्वनिवर्त्यस्वदेशगतवस्त्वन्तरपूर्वकं अप्रकाशितार्थप्रकाशकत्वात् इत्येवंरूपं अनुमानम् । **परस्य** अज्ञानं जीवाश्रितमेव नत्वेव ब्रह्माश्रितमिति वादिनः । **कैंकर्यं** अनुकूलताम् । विषयाश्रिताज्ञानसिद्ध्या प्रसक्तामर्थान्तरतां विनिवार्यात्माश्रिताज्ञानसिद्धये खलु त्वया साध्ये स्वदेशगतेति विशेषणमुपात्तम् । तत्र स्वशब्दार्थप्रमाण-ज्ञानस्य यो देशो ज्ञातृपुरुषो जीवस्तद्गतत्वेन सिद्ध्यदज्ञानं जीवाश्रितत्वपक्षमेव समर्थयते इति परानुकूलमेवेत्याकूतम् ॥ १७४ ॥

स्वदेशगतमज्ञानं प्रमाणज्ञानतस्तव ।
सिद्ध्यत्प्रमातृपुरुषे यतस्सिद्धमभूद्बलात् ।
प्रमाता जीव एवेति जीवाज्ञानमभूद्धि तत् ॥ १७५ ॥

तदेव विशदयति **स्वेति** । स्वममानेत्यर्थः । **प्रमाणज्ञानतः** सार्वविभक्तिकस्तसिः । पक्षीभूतप्रमाणज्ञान इत्यर्थः । एवकारेण ब्रह्मणः प्रमातृत्व-व्यवच्छेदः । न हि ब्रह्मणः प्रमाणज्ञानं अप्रकाशितार्थप्रकाशकं न वा तस्य प्रागभावप्रसक्तिरस्ति अनादित्वादेवेति भावः ॥ १७५ ॥

चक्षुषा सन्निकृष्टार्थज्ञानं स्यादन्तरेव हि ।
जानामीत्यान्तरत्वस्य सुखादाविव सिद्धितः ॥ १७६ ॥

यदुक्तं ज्ञानसमानाश्रयत्वेनाज्ञानं न विषयाश्रितमिति न तद्युक्तम् । मन्मते **वृत्तिरूपप्रमाणज्ञानस्यापि** विषयाश्रितत्वात् । विषयसन्निकृष्टेंद्रियद्वारा **निर्गतं तदाकारेण** परिणतं अन्तःकरणमेव वृत्तिरित्युपगमात् **। तथा च नाज्ञानस्य** पुंगतत्वसिद्धिः । न वा ब्रह्माश्रितत्वोपगमविरोधः । **अज्ञानाश्रयस्य** विषयावच्छिन्नचैतन्यस्यैव ब्रह्मत्वात् । यथोक्तं 'सर्वप्रत्ययवेद्ये च ब्रह्मरूपे व्यव-

स्थिते' इति । अतः कथं मदुक्तानुमानस्य परकिंकरत्वं इति चेत्स्यादेतदेवं यदि अन्तःकरणस्य बहिर्निर्गमनं तावत् प्रामाणिकं स्यात् । न च तदस्ति । वृत्तेरान्तरत्वस्य सुखादेरिव जानामीत्याकारकसाक्ष्यनुभवसिद्धत्वात् । तादृश्या अपि वृत्तेरिन्द्रियद्वारा विषयसन्निकर्षोपपत्तेः । तदुक्तं वादावल्यां 'करणसामर्थ्येन विषयविषयिभावोपपत्तेरि'ति । अतः तमसो पुंगतत्वोक्तिः भगवत्पादीया सुस्थैवेत्याह **चक्षुषेति** । तथा च प्रयोगः । ज्ञानं, आन्तरं साक्षिणं प्रति साक्षाद्विषयत्वात् सुखादिवदिति । न चासिद्धिः जानामीति प्रत्यक्षेणैव तत्सिद्धेः इत्याह **जानामीतीति** ॥ १७६ ॥

परोक्षज्ञानकरणाज्ज्ञानमन्तर्भवेद्यथा ।
तथाऽपरोक्षकरणाज्ज्ञानमप्यन्तरेव हि ॥ १७७ ॥

ननु करणसामर्थ्येनापि बाह्यपदार्थविषयकापरोक्षज्ञानस्य कथमान्तरत्वं इति चेत् लिङ्गशब्दरूपपरोक्षज्ञानकरणसामर्थ्येन विप्रकृष्टातीतानागत-गोचरस्य परोक्षज्ञानस्य ज्ञानत्वेनापरोक्षज्ञानजातीयस्य यथाऽऽन्तरत्वं तथै-वेति गृहाणेत्याह **परोक्षेति** । न च तत्राप्यसंप्रतिपत्तिः । परोक्षवृत्तेरपि बहि-र्निर्गमनस्य तत्र चैतन्यप्रतिफलनस्येत्यादेः कल्पनेऽभिव्यक्तापरोक्षैकरसचिदु-परागेण तद्विषयस्याप्यापरोक्ष्यापातादित्याशयात् ॥ १७७ ॥

यदि शब्दसहायेन मनो वैकुंठमाविशेत् ।
पुनर्निवृत्तिशून्यं स्याद्दीर्घनिद्रा भवेत्तदा ॥ १७८ ॥

परोक्षवृत्तेर्बहिर्निर्गमनकल्पनं अनर्थकरं चेत्याह **यदीति** । शब्देति परोक्षज्ञानकरणोपलक्षणम् । **वैकुण्ठं** पुनरावृत्तिशून्यं स्थानम् । **आविशेत्** अन्तरेव विषयीकरणमन्तरा स्वरूपत एव प्रविशेत् । आपाद्यस्यानिष्टत्वं व्यनक्ति **दीर्घनिद्रेति** । मरणेत्यर्थः ॥ १७८ ॥

मनोयात्रा तु जीवस्य यात्राकाले परं भवेत् ।
अन्तःकरणमेतस्मादन्तःकार्यकरं हि तत् ॥ १७९ ॥

तत्कथमित्यत आह **मनोयात्रेति** मनसो देहादपुनरावृत्तये बहिर्निर्गतिः । **यात्राकाले** जीवस्य देहाद्बहिर्निर्गमनकाले **परं** केवलं न तु जीवनावस्थायाम् । 'न ह्यमनाः पुमांस्तिष्ठती'ति श्रुतेरिति भावः ॥ तथा च वैकुण्ठशब्दश्रवणसमनन्तरं जायमानं वृत्तिज्ञानं मरणपर्यवसायीति भावः । अन्तःकरणमिति यौगिकनाम्नोऽवयवार्थपर्यालोचनयाऽपि मनसः अन्तःस्थित्यैव ज्ञानकरणत्वं लभ्यते इत्याह **अन्तःकरणमिति** ॥१७९॥

अतो ज्ञानवदज्ञानमांतरं साक्षिणो बलात् ।
एकदेशत्वमनयोर्नाश्यनाशकयोर्ध्रुवम् ॥ १८० ॥

अतः । वृत्तेर्विषयव्यापित्वस्याप्रामाणिकत्वात् तत्कल्पनाया अनर्थहेतुत्वात् आन्तरत्वस्य जानामीति साक्षिप्रत्ययसिद्धत्वात् अन्तःकरणशब्दनिर्वचनबलाच्च सिद्धत्वात् । **साक्षिण इति** । न जानामीति साक्षादेव ज्ञातृपुरुषनिष्ठतया च विषयीकुर्वेत इत्यर्थः । ध्रुवमित्यनेन नाश्यनाशकयोरेकदेशत्वनियमस्याव्यभिचारं व्यनक्ति ॥ १८० ॥

न चेदन्याश्रितज्ञानमन्याज्ञानं निवर्तयेत् ।
अज्ञानमप्यान्तरं तन्न बाह्यविषयाश्रितम् ॥ १८१ ॥

नियमानङ्गीकारेऽतिप्रसङ्गं बाधकमाह **न चेदिति** । तथा चानुभवविरोध इति भावः । उपसंहरति **अज्ञानमिति** ॥ १८१ ॥

अहमज्ञ इति ह्यक्षं जीवाज्ञानस्य साधकम् ।
अनादिमायया सुप्तो यदा जीवः प्रबुध्यते ।
इति वेदेन मायेयं जीवगेवेति गीयते ॥ १८२ ॥

अज्ञानस्य जीव एवाश्रितत्वे प्रागुक्तानि प्रत्यक्षादीनि त्रीण्यपि प्रमाणानि स्मारयति अहमित्यादित्रिः ॥ अहमभिर्थस्य जीवत्वं 'अहमित्येव यो वेद्यः स जीव इति कीर्तितः' इति तत्वनिर्णयोदाहृतश्रुतिसिद्धम् । **अक्ष** साक्ष्यनुभवः । तस्य च प्राबल्यं धर्मिग्राहकत्वादुपजीव्यत्वेन नित्यनिर्दोषत्वेन च ज्ञेयम् । श्रुतिमपि स्पष्टां अज्ञानस्य जीवाश्रितत्वे आह **अनादीति** । श्रुतावेकवचनं तु 'यथा नीतिपरो राजा' इतिवत् समुदायविवक्षया युक्तम् । अत्र जीवशब्दो मायावादिनाऽपि संसारिजीवपर इति एकजीववादावसरेऽङ्गीकृतम् ॥ १८२ ॥

ऐक्येन च प्रमाणानामन्यथीकरणं वृथा ।
ऐक्यासिद्धेरयुक्तं च प्रमाता जीव एव हि ।
न चेत्सर्वैक्यतस्सर्वमस्तव्यस्तं भवेत्तव ॥ १८३ ॥

ननु ब्रह्मण एव मायोपाधिसम्बन्धेन जीवव्यवहारः स्वभावतस्त्वैक्यमेवेति चेत् 'ऐक्यात्तदेव चेद्ब्रह्म अन्योन्याश्रयता तदा' (श्लो. ७४) इत्यादिप्रागुक्तदूषणगणं मा विस्मार्षीरित्याह **ऐक्येनेति** । **अन्यथीकरणं** ब्रह्मविषयकानीत्यर्थोक्तिः । वृथाभावमेवोपपादयति **ऐक्यासिद्धेरिति** । अपव्याख्यामात्रेणार्थासिद्धेरिति भावः । उत्तरार्धे 'आत्मानं बुध्यते तदा' इति एकस्यैव कर्तृकर्मभावोक्तेर्निर्विशेषे ब्रह्मणि तदसम्भवान्नात्र जीवशब्दो ब्रह्मपर इत्याह **प्रमातेति** । आत्मानमिति द्वितीयान्तोक्तप्रमेयश्च जीव एवेति ग्राह्यम् । **न चेत्** भेददर्शनादरणं न चेत् । **सर्वं** साधनदूषणादिसकलव्यवहारजातम् । **अस्तव्यस्तं** साधनस्यैव दूषणत्वमित्यादिप्राप्त्या विप्लुतम् । तदुक्तं वादावल्यां 'यदि भेददर्शनं न स्यात्तर्हि सकलव्यवहारविधुरः परः प्रसज्येते'ति ॥ १८३ ॥

अज्ञानं ज्ञातृपुंनिष्ठं ज्ञानेनैकाश्रयत्वतः ।
सुखवद्दुःखवच्चैति ह्यनुमाऽप्यस्त्यबाधिता ॥ १८४ ॥

अनुमानमप्यज्ञानस्य जीवाश्रितत्वमेवावगमयतीत्याह **अज्ञत्वमिति** । इदं च 'ज्ञानं तु ज्ञातृपुंस्येवे'त्यादिना, (श्लो. १७३) प्रागुपपादितं ध्येयम् । ॥ १८४ ॥

मृदादिकमुपादानं कार्ये कार्ये च विद्यते ।
अतो जगत्सर्जनार्थमपि नाज्ञानमिष्यते ॥ १८५ ॥

अथापि स्यात् । प्रपञ्चस्तावद्ब्रह्मण्यारोपितः । स च भ्रमात्मकः । अतः तदुपादानतयैव ब्रह्माज्ञानसिद्धिः । यथा शुक्तिरूप्योपादानतया शुक्तिकाऽज्ञानस्य । तथा च प्रयोगः । प्रपञ्चः, अज्ञानोपादानकः कार्यत्वात् शुक्तिरूप्यवदिति । तत्राह । **मृदादीति** । अयमाशयः । आरोपितस्य प्रपञ्चस्य पक्षीकारे तस्यासत्त्वेन तत्र कार्यत्वहेतोः असिद्धिः । दृष्टान्तस्य साध्यसाधनवैकल्यं च । सत्यस्य पक्षीकारे तत्र कार्यत्वस्य मृदाद्युपादानकत्वेनाप्युपपत्त्याऽर्थान्तरतेति । सर्वथा नाज्ञानसिद्धिरित्याह **अत इति** ॥ १८५ ॥

मायी मायाऽधीश्वरत्वाद्गोमान्गोपालको यथा ।
तस्माद्ब्रह्माश्रिताज्ञानमज्ञानादेव वर्णितम् ॥ १८६ ॥

'मायिनं तु महेश्वरं' इत्यत्रत्यो मायिशब्दः प्रकृतिनियामकत्वमहिमानमेव ब्रह्मणो वर्णयति न पुनरज्ञानाश्रयत्वं इति 'यतः प्रकृतिरेवैषा-माये'त्यादिना प्रागुक्तं (श्लो. १२२) । इदानीं पराभिमताज्ञानार्थत्वोपगमेऽपि प्रागुक्तरीत्या महेश्वरश्रुतिसमभिव्याहारबलेन चाज्ञानाधीश्वरत्वमेव तस्य वक्ति गोमच्छब्दो गोपाले गोस्वामित्वमिवेत्याह **मायीति** । इन्द्रजालार्थकत्वं तु 'न मायेत्यवधार्यतामि'ति स्मृत्यैव निषिद्धमित्यशक्यशङ्कम् । उपसंहरति **तस्मादिति** । अप्रामाणिकत्वात् सर्वप्रमाणविरुद्धत्वाच्च ॥ १८६ ॥

जीवस्तु मायासुप्तत्वान्न स्वानन्दादि वीक्षते ।
मायाऽभावे सतीक्षेत तस्माज्जीवाश्रितैव सा ॥ १८७ ॥

'अनादिमायया सुप्तो यदा जीवः प्रबुध्यते' इति श्रुतिः सिद्धान्ते सुसङ्गतेत्याह **जीव इति** । **मायया** ईश्वरेच्छारूपावरणेन मुख्येन । 'विष्णोरिच्छावशत्वात्तु मायामात्रमि'त्यादिस्मृतौ मायाशब्दस्येच्छापरत्वेन व्याख्यानात् । एवं तदधीनया अविद्याशब्दितप्रकृत्याख्यावरणेन चामुख्येन । **सुप्तः** संसारदशायामावृतानन्दस्वरूपः यतोऽतः **स्वानन्दादि** स्वरूपभूतमप्यानन्दादिकं **न वीक्षते** नानुभवति । **अभावे** अपगमे । **तस्मात्** अन्वयव्यतिरेकाभ्यां जीवस्वरूपानन्दावरकत्वेन सिद्धत्वात् । **सा** मायाऽऽख्याऽविद्या । यथोक्तं सुधायां जिज्ञासानये 'अतः परमेश्वर एव सत्त्वादिगुणमय्याऽविद्याविरोधित्वेनाविद्यया स्वाधीनया प्रकृत्याऽचिन्त्याद्भुतया स्वशक्त्या च जीवस्य स्वप्रकाशमपि स्वरूपचैतन्यमाच्छादयतीति युक्तमि'ति ॥ १८७ ॥

जीवस्वरूपानन्दादीनाच्छादयति केवलम् ।
अहमित्येव तद्रूपज्ञाने न प्रतिबन्धिका ।
इमं तु न दहेत्युक्तं मन्त्रशक्त्या यथाऽनलः ॥ १८८ ॥

'स्वभावाज्ञानवादस्य निर्दोषत्वान्न तद्भवेत्' इत्यनुव्याख्यानसुधोक्तरीत्या स्वमते दोषं परिहरति **जीवेति** । केवलमित्यनेन व्यवच्छेद्यं दर्शयति **अहमित्यादिना** ॥ अत्रोपपत्तिः सुधोक्ताऽनुसन्धेया । 'यद्यपि धर्माः स्वप्रकाशचैतन्यान्न भिद्यन्ते । तथाऽपि सविशेषत्वाङ्गीकारादज्ञानविषयतोपपत्तिरि'ति । ननु चैतन्यस्वरूपप्रकाशाप्रतिबन्धकं अविद्याऽऽवरणं स्वप्रकाशस्वरूपाभिन्नतद्धर्माणां आनन्दपारतन्त्र्यादीनां कथं प्रकाशप्रतिबन्धकं इति चेन्न । ईश्वराचिन्त्यशक्त्योपपत्तेरिति भावः । यथोक्तं सुधायां तत्रैव 'यद्यपि जीवचैतन्यं ब्रह्मस्वधर्मप्रकाशात्मकं तथाऽपि परमेश्वराचिन्त्याद्भुतशक्त्युपबृंहिताविद्यावशान्न तथा संसारे प्रकाशयती'ति इति । नेदमदृष्टचरमित्याह **इममिति** । मन्त्रशक्तिः प्रयोक्तृपुरुषेच्छया व्यक्तिविशेषे दाहं प्रतिबध्नन्ती

सत्यपि व्यक्त्यन्तरविषये न तं प्रतिबध्नाति तथेति भावः । मान्त्रिकपुरुषस्यापि चेत्स्यादीदृशी शक्तिः किमु वाच्यं अशेषमन्त्रप्रतिपाद्यस्य प्रभोरिति भावः ॥ १८८ ॥

सा सत्या प्रकृतेरंशभूता जीवेषु तिष्ठति ॥ १८९ ॥

पूर्वोक्तमविद्यास्वरूपं विशेषं विवक्षुर्निर्धारयति **सेति** । सा अविद्या पक्षः । सत्येति साध्यम् । प्रकृतेरंशभूतेति हेतुकथनम् । नासिद्धिः । 'सत्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः । निबध्नन्ति महाबाहो देहे देहिनमव्ययम्' । इति स्मृत्या तत्सिद्धेः । नाप्यप्रयोजकता । 'प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि' इति पुरुषवदनादित्वेन सिद्धायाः प्रकृतेर्मिथ्यात्वे ब्रह्मणोऽपि तथात्वापात इति विपक्षे बाधकसद्भावात् । यत्र सत्योपादानकत्वं तत्र सत्यत्वमिति सुस्थः प्रतिबन्धः । अंशभूतेत्यनेन वक्ष्यमाणद्वैविध्यं सूचयति । जीवेषु इत्यनन्तरं आवरणत्वेन आश्रितत्वेन चेति पूरणीयम् । तेन आश्रितत्वात् आवरणत्वाच्चेति सत्यत्वे हेत्वन्तरे उक्ते ध्येये । न ह्यसतः क्वचिदाश्रितत्वं आवरणरूपार्थक्रियाकारित्वं वा सम्भवतीति भावः । जीवेषु इति बहुवचनेन प्रतिव्यक्तिनियतत्वोक्तिः, तत एवैकमुक्तौ सर्वमुक्तिरूपातिप्रसङ्गपरिहारश्च सूचिते ध्येये ॥ १८९ ॥

नारायणप्रसादेन काचिदक्षिमलोपमा ।
नश्येद्वस्त्रावृतिप्राया काचिच्चापसरेत्ततः ॥ १९० ॥

नारायणप्रसादेन नाशापसरणयोरुक्त्या नाशात् अपसारणादिति सत्यत्वे हेतू सूचितौ । मिथ्यात्वे तयोरयोगात् । अत्र बन्धकप्रकृत्योः स्वरूपस्य तन्निवृत्तिप्रकारे विशेषस्य च विवरणं 'अथान्ये प्रकृती दुष्टे नृषु प्रातिस्विकं स्थिते' इत्यादिकात् भागवते श्रुतिगीतिकातात्पर्यादवसेयम् । **काचित्** ।

द्वयोर्दुष्टप्रकृत्योर्मध्ये जीवाच्छादिका । **काचिच्च** अपरा परमाच्छादिका । यथोक्तं 'स्वगुणाच्छादिकां हत्वा परमाच्छादिकां परः । व्याघुट्य मोक्षपदवीं ददाति पुरुषोत्तमः' इति । तत्र क्रमेण, अक्षिमलं काचादिकं, चक्षुषो वस्त्रेण आवृतिश्च दृष्टान्तौ ॥ १९० ॥

जीवस्याच्छादिका त्वेका परस्याच्छादिका परा ।
द्वयं जीवगतं नित्यं हरिस्तूभयमोचकः ॥ १९१ ॥

जीवस्य तस्मिन्विद्यमानयथायोग्यैश्वर्यादिगुणसमूहस्य । **परस्य** जीवं प्रतीति शेषः । **जीवगतं** ब्रह्मादिव्यतिरिक्तजीवगतम् । 'जीवस्यैव न तत्रापि ब्रह्मादेरस्ति सा क्वचिदि'ति वचनात् । नित्यं मोचक इत्यन्वयः । तु-शब्देन तस्य तदावृतत्वं व्यवच्छिनत्ति । **मोचकः** एकस्य नाशनेन अपरस्यापसारणेन ॥ १९१ ॥

उभयोश्चातिदूरस्थो न चेत्ते मोचयेत्कथम् ।
निगडेन निबद्धांघ्रिर्न हि राजा विमोचकः ॥ १९२ ॥

अतिदूरस्थः तदत्यन्ताभाववान् । हरिः बन्धात्यन्ताभाववान् नित्यं तन्मोचकत्वात् । यो यदा यद्बन्धमोचको नासौ तदा तद्बद्ध इति सामान्यव्याप्तौ राजा दृष्टान्त इति व्यतिरेकमुखेनाह **निगडेनेति** ॥ १९२ ॥

अस्मिन्नर्थे श्रुतिर्मानं पुराणानि च भूरिशः ।
अनिर्वाच्या तु या माया साऽनिर्वाच्यैव धीमताम् ॥ १९३ ॥

आगमानुग्रहात्सुदृढा नित्यमुक्तत्वसाधकयुक्तिरित्याह **अस्मिन्निति ।** भूरिश इति श्रुतिरित्यनेनाप्यन्वेति । एकवचनं तु ग्रहैकत्ववदविवक्षितम् । 'ज्ञानिनां मोक्षदश्च सः' 'यस्य प्रसादात्परमार्तिरूपादस्मात्संसारान्मुच्यते' इत्यादिकाः श्रुतयः 'मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते' 'एकस्यैव ममांशस्य जीव-

स्यैव महामते' इत्यादि स्मृतयश्च **मानं** प्रमाणानि । नन्वेवं स्वमतेऽपि मायाया अङ्गीकारे कथं तन्निराकरणमित्यत आह **अनिर्वचनीया त्विति ।** तुना स्वाभिमतां व्यवच्छिनत्ति । एवेत्यनेन व्याहतत्वेनासम्भवित्वात्साधनानर्हतामाह । **धीमतामिति** । एवमपि तां ये ब्रूयुस्ते विवेकविधुरा इति भावः । एतेन मिथ्यात्वेऽप्यसद्विलक्षणत्वेनावरणरूपार्थक्रियोपपन्नेति निरस्तम् । तथात्वे सत्यत्वस्यैव प्राप्तेः । तस्य च मयाऽप्यङ्गीकारात् । तदुक्तं वादावल्यां 'सत्यतथाविधवस्तुपूर्वकत्वे सिद्धसाधनं' इति 'न च भावरूपाज्ञाननिराकरणे सिद्धान्तविरोधः । परन्यायेन परनिराकरणादि'ति च ॥ १९३ ॥

यो मायां वक्त्यधीशाने स प्रष्टव्यस्तयेशितुः ।
भ्रमस्सम्पाद्यते नेति न चेद्विद्यैव तामपि ॥ १९४ ॥

निरस्तकुहकत्वोक्त्या नोरीचक्रुः परं हरौ ।
आद्ये त्वविद्यैव तस्मात्कल्पोऽयं च विकल्पभोः ॥ १९५ ॥

आह । द्विविधं खल्वज्ञानं अविद्या माया चेति । तत्राविद्योपाधिकं **दुःखादि** । मायोपाधिकं अम्बरादि । तत्र मास्तु ब्रह्मण्यविद्या दुःखादिप्रसक्तेः । माया तु भविष्यतीति । तत्पक्षं दूषयितुं विकल्पयति **भ्रम इति ॥** स्वाश्रयव्यामोहकरी न वेति विकल्पार्थः । न द्वितीयः । **परव्यामोहकर्यास्तस्यास्सत्यमन्त्रौषधादिविद्यायामेव** प्रयोगात् । तस्या मिथ्यात्वानुपपत्तेरित्याह **विद्यैवेति** । 'मायामास्थाय युध्यस्वे'ति प्रकृतमायायां 'आस्थाय तामसीं विद्यामि'ति विद्याशब्दप्रयोगस्य स्मृतत्वादिति भावः । अस्तु तर्हि सैवेश्वर इति तत्राह **तामपीति** । नोरीचक्रुरित्युत्तरेणान्वयः प्रामाणिका इति शेषः । कुत इति तत्राह **निरस्तेति** । तन्निषेधकप्रमाणसत्त्वादिति भावः । 'धाम्ना स्वेन सदा निरस्तकुहकमि'ति भागवतोक्तिमनेन संगृह्णाति । परं भ्रमानापादकत्वेऽपि **केवलं** कुहकत्वादेव । कुहकविद्या-

श्रयणे सत्यसृष्ट्यावशक्तताऽऽख्यदोषापादकत्वात् । तदुक्तं 'अशक्ताः सत्यसृष्टौ हि मायासृष्टिं वितन्वत' इति । नाद्यः । तथात्वे अविद्यालक्षणाक्रान्तत्वेनाविद्यात्वस्यैव प्राप्त्या तत्पक्षे प्रागुक्तसर्वविकल्पदोषाणामप्रतिहतप्रसरादित्याह **विकल्पभीरिति** । तथा च घट्टकुटीवृत्तान्त इति भावः । इदं च विकल्पदूषणमुपलक्षणम् । मायाशब्दो हि 'योगमायां समादिशदि'ति चित्प्रकृतौ, 'एकस्त्वमेव भगवन्निदमात्मशक्त्या मायाऽऽख्यये'ति भगवतो विचित्रशक्तौ, 'माया वयुनं ज्ञानमि'ति वेदनिघण्टौ पाठात् ज्ञाने इत्यादौ व्युत्पन्न इति तदाश्रयत्वं हरावनुमतमेवेत्यपि ग्राह्यम् । विस्तरस्तु न्यायामृते श्रुतेरनिर्वाच्याविद्यापरत्वभङ्गे ॥ १९४ ॥ १९५ ॥

स्वदोषाच्छादनायाल्पो निर्दोषेष्वपि तं वदेत् ।
जीवे सम्भवदज्ञानं ब्रह्मण्यपि न किं जगुः ॥ १९६ ॥

असूयादोषस्य मायावादिषु समन्वयं व्युत्पादयति **स्वेति** । स्वस्य अल्पत्वापादकं दोषं आच्छादयितुं **निर्दोषेषु** अत एव स्वस्मादुत्कृष्टेषु अपि **तं** दोषं **वदेत्** आरोप्य तान् गर्हयेत् । दिवाभीतः सूर्येऽन्धकारमिवेति भावः । अस्य च परोत्कर्षासहनाख्यमात्सर्यज्वरस्य मायावादी निदर्शनमित्याह **जीवे इति** । स्वस्मिन्मायावादिनि **संभवत्** अनुभवबलेन प्रमितं **ब्रह्मण्यपि** सर्वज्ञत्वेन प्रमितेऽत एवाज्ञानविरहितेऽपि ॥ १९६ ॥

किं मलैस्समलस्यास्य निर्मलस्य मलं मलम् ।
नीलिमा दूषणं भानोस्स्वर्भानोस्तु स भूषणम् ॥ १९७ ॥

समलस्य प्रमाणदुर्घटस्य **अस्य** अनन्तदोषदुष्टस्य मायावादस्य । **मलैः** अनवस्थादिकतिपयैर्दोषैःआपादितैः । **किं** । न किमप्यनिष्टमापादितं भवति । प्रमाणगृहीताभावप्रतियोगित्वं ह्यनिष्टत्वं नाम आपाद्यस्य । यत्र मतेऽनन्तदोषाः

प्रमाणगृहीता एव यत्र च दौर्घट्येन भूषणत्वं स्वयमङ्गीकृतं, तत्र दोषापादक-तर्कस्येष्टापादनेनाभासत्वं प्रसज्यत इति भावः । कुत्र तर्हि दोषापादनेऽनिष्टमित्यत आह **निर्मलस्य** तत्ववादस्य दूषणसामान्यात्यन्ताभाववतः । **मलं** यत्किञ्चिद्दोषा-पादनमपि । **मलं** अनिष्टमेव, प्रमाणप्रतिषेधप्रदर्शनेन तद्दूषणं परिहार्यमेव । अत एव स्वमतेऽज्ञानाङ्गीकारे परेणापादितो दोषः 'स्वभावाज्ञानवादस्य निर्दोषत्वान्न तद्भवेदि'त्यादिना परिहृत इत्याकूतम् । एकस्यैव दूषणत्वं विषय-भेदेन भूषणत्वं च न दृष्टचरमित्यत आह **नीलिमेति** । **भानोः** शुक्ल-भास्वरतेजोराशेः सूर्यस्य । दूषणं स्वयमविद्यमानत्वेऽपि बुद्धिशून्यैरारोपि-तत्वात् अप्रामाणिकम् । **स्वभानोः** राहोः वस्तुगत्या नीलस्य विषये **भूषणं** वस्तुगत्या विद्यमानत्वेन प्रामाणिकमेव । जीवे कर्मलेपादिवास्तव-दोषाणामेव सद्भावेन न तत्र तदारोपः तत्पूर्वकनिषेधो वा संभवति । परमात्मनि तु नित्यनिर्दोषे लेपादिदोषारोपः तत्पूर्वकनिषेधश्च 'संभोग-प्राप्तिरिति चेन्न वैशेष्यादि'त्यादिना तत्र तत्र क्रियत इति विभावनीयम् ॥ १९७ ॥

स्वयं ह्यशक्तश्शक्तस्याप्यशक्तिं प्रथयेत्खलः ॥
स्वज्ञानवद्धरेर्ज्ञानं किं नाज्ञानानुगं जगौ ॥ १९८ ॥

अपरमपि नीतिविरोधं मायावादिन आह **स्वमिति** । **खलः** मर्कटः । **अशक्तः** समुद्रतरणे असमर्थः । **शक्तस्य** हनूमतोऽपि तत्र **अशक्तिं** असमर्थतां **प्रथयति** ख्यापयति । इयमत्र लौकिकी कथाऽनुसन्धेया । कश्चित्क्षुद्रो वानरो रामायणं श्रुत्वा स्वयमपि समुद्रप्लवनदुःसाहसं उपक्रम्य तत्रैव समुद्रे निपतितो निमज्जन्नाह । 'मिथ्यैव हनूमतः समुद्रलङ्घनवर्णनपरं रामायणम् । अपारोऽयं पारावार' इति ॥ इयं दुर्नीतिर्मायावादिनः कुत्र दृष्टेत्यत आह **स्वज्ञानेति** । **स्वस्य** संसारिजीवस्य **ज्ञानं** यथा **अज्ञानानुगं** अज्ञानावृतं 'अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तव' इत्युक्तेः । तथा **हरेः** अज्ञान-

निर्हरणे समर्थस्य **ज्ञानं** स्वपराशेषविषयकं 'यः सर्वज्ञ' इति श्रुतिसिद्धम् । **अज्ञानानुगं** स्वरूपचितोऽज्ञानस्फोरकत्वेन अज्ञानावृतम् ॥ १९८ ॥

> **अनृतं वदतो वाक्यमसम्बद्धं भवेद्ध्रुवम् ।**
> **ज्ञानस्य सहकार्यस्य हानिर्नावरणे किल ॥ १९९ ॥**

प्रक्रियान्तरमपि नीतिविरुद्धं तन्मत आह **अनृतमिति** । मूकोऽह-मित्ययथार्थं **वदतः** इव मिथ्यावादिनः वाक्यं **असंबद्धं** स्वक्रियाविरुद्धम् । यद्वा **अनृतं** जगतः अध्यासं **वदतः** उत्सूत्रं भाषमाणस्य **असंबद्धं** तदुच्य-मानसङ्गतित्रयशून्यम् । तदुक्तं 'बन्धमिथ्यात्वं नैव मुक्तिरपेक्षत' इति । यद्वा **अनृतं** नेह नानास्तीति वाक्यं जगदनृतत्वप्रतिपादकं इति वदतः वाक्यं **असंबद्धं** वन्ध्यासुतवचस इव स्वस्याप्यसाधकत्वप्राप्त्या बुबोधयिषितार्थेन **असंबद्धं** संबन्धशून्यम् । तदुक्तं 'तद्वाक्यस्याग्रतो भवेदि'ति । यद्वा **अनृतं** ब्रह्मणो निर्विशेषत्वम् । **असंबद्धं** निर्विशेषत्वेनैव विशेषेण सविशेषत्वप्राप्त्या व्याहतम् । तदप्युक्तं '**निर्विशेषत्वमेतेन मूकोहमितिवद्भवेदि**'ति । यद्वा लोके चोरस्य अनृतभाषिणो यथा वाक्यं अन्योन्यासंबद्धं तथा **अनृतं** 'अतत्वावेदकाः प्रायो वेदाः केचिन्निरर्थकाः' इति एवं सूत्रजातविरुद्धार्थं **वदतः** प्रतिपादयतः **वाक्यं** भाष्यं **असंबद्धं** मूलसूत्रेण संबन्धशून्यम् । यथोक्तं सुमध्वविजये 'मान्योन्वयोऽन्योन्यमहो न दृश्यते' इति । यद्वा **अनृतं** अविद्यमानं चित्स्वरूपावरणं **वदतः** चितः स्वप्रकाशाया अपि तत्स्फोरकत्वमेव न तु नाशकत्वं इति वदतो वाक्यं **असंबद्धं** लिलक्षयिषित-ज्ञानाज्ञानसंबन्धशून्यतल्लक्षणोक्तिपर्यवसितं **भवेदिति** योज्यम् । एतद्विवृणोति **ज्ञानस्येति** । सहकार्यस्येति बहुव्रीहिः । ज्ञानस्य कार्याणि अज्ञाननिवृत्तिः, संस्कारः व्यवहारः इत्यादीनि तत्सहितस्येत्यर्थः । तदावरणं च, तत्र तत्कार्येषु वाऽकिञ्चिद्धानिकरं चेति कथं न दुर्नीतिरिति भावः । तदुक्तं

न्यायामृते 'न हि ज्ञानानिवर्त्यमज्ञानं भवति' इति, 'अज्ञानाविरोधित्वे चैतन्यस्य घटादिवज्ज्ञानत्वायोगाच्च । ज्ञानाज्ञाने हि ज्ञातुरर्थप्रकाशाप्रकाशौ' इति च ॥ १९९ ॥

सकृद्भ्रष्टः खलः पश्चाद्भ्रष्टताया बिभेति किं ।
सर्वज्ञाज्ञानदौर्घट्यं किं नाभाषत भूषणम् ॥ २०० ॥

सकृत् ब्रह्मणि सर्वज्ञेऽसंभवदज्ञाननिरूपणेन **भ्रष्टः** वैदिकव्यवहाराद्बहिष्कृतः । **पश्चात्** स्वनिरूपितस्य प्रमाणदुर्घटार्थस्य उपपादने दुस्साहसे स्वीकृतोद्यमः **भ्रष्टतायाः** अनुपपत्तिः अलङ्कारः, दुर्घटत्वं भूषणं, इत्यादिप्रजल्परूपायाः । भयाभावे ज्ञापकमाह **किमिति** । यदि भीतोऽभविष्यत्नैवासंबद्धं अभाषिष्यतेति भावः । राज्ञोऽज्ञानोक्तौ प्रसक्तात् सद्यःशासनाद्बिभेति । देवस्य तु तदुक्तौ सद्यःशासनाभावात् कालान्तरे तमस्सद्भावेऽपि तस्मादुन्मत्ततया न बिभेति । इदं च कुमतेर्लक्षणम् । वक्ष्यति च ग्रन्थकारः स्वयमुत्तरत्र 'बिभेति कुमतिः सद्यःशास्तुर्न समयान्तरे' इति ॥ २०० ॥

मामहं न विजानामि मां जानाम्यहमित्यपि ।
सर्वस्यानुभवात्स्वस्य विषयोऽपि स्वयं भवेत् ॥ २०१ ॥

इदानीं ईश्वरस्य स्वविषयकज्ञानाभावे सार्वज्ञ्यं नोपपद्यत इति एतदुपपादनार्थं चेतनमात्रस्य स्वकर्मकसंविद्रूपतालक्षणं स्वप्रकाशत्वं पराभिमततल्लक्षणदूषणपुरस्सरं समर्थयते 'मामहं न विजानामि' इत्यारभ्य स्वस्यैव क्लेशकारकमि'त्यन्तेन पञ्चाशच्छ्लोकैः । तत्रात्मनः स्ववेद्यत्वं किं साधकाभावादुत बाधकसद्भावात् । नाद्यः सर्वानुभवस्यैव तत्साधकत्वादित्याह **मामिति** । न जानामि इत्यज्ञानज्ञानं, जानामीति ज्ञानज्ञानं च प्राणिमात्रस्यानुभवसिद्धं । तत्रोभयत्र स्वस्यैव कर्तृत्वं कर्मत्वं चेति स्ववेद्यत्वं

सुस्फुटमिति भावः । परस्यापि संमतत्वादज्ञानज्ञानस्य प्रथममुदाहरणम् । तेन भावरूपाज्ञानविषये 'मां अन्यं च न जानामो'त्यनुभवस्य प्रमाणतयोपन्यासात् ॥ २०१ ॥

परस्मिन्समवेता या क्रिया तत्फलशालि यत् ।
तत्कर्मेति हि भाट्टोक्तलक्षणानुपपत्तितः ॥ २०२ ॥
दृष्टार्थस्य कथं त्यागो वक्तव्यं लक्षणान्तरम् ।
किं नु किंपुरुषो नास्ति किंनरो वा विलक्षणः ॥ २०३ ॥

न द्वितीयः तदभावात् । तथा हि बाधकं किं कर्मलक्षणानुपपत्तिः उत एकस्यैव कर्तृकर्मभावविरोधः । आद्येऽपि लक्षणं किं भाट्टोक्तं परसमवेतक्रियाजन्यफलशालित्वं यद्वा कर्तुरीप्सिततमं इत्याद्यन्यद्वा । नाद्यः तस्यैवानुपपत्तेः । समर्थयिष्यते चैतदनुपदमेव अन्त्य इत्यादिना । तादृशदुष्टलक्षणविरोधभिया दृष्टार्थपरित्यागायोगात् । दृष्टानुसारेण लक्षणान्तरस्यैव कल्प्यत्वात् । अन्यथाऽतिप्रसङ्गादित्याह **परस्मिन्नित्यादिना ॥ परस्मिन्** प्रकृतकर्मापेक्षयाऽन्यस्मिन् कर्तरि **समवेता या क्रिया** गमनादिरूपा तज्जन्यं **फलं** ग्रामसंयोगादिः **तच्छालित्वं** ग्रामे । संयोगस्य द्विष्ठत्वेन कर्तर्यतिव्याप्तिवारणाय परसमवेतेति क्रियाविशेषणम् । दृष्टविरोधे लक्षणमेव परकल्पितमवधीरणीयमित्यत्र दृष्टान्तमाह **किं न्विति ।** अश्वमुखोऽन्यत्र मनुष्याकारः **किंपुरुषः ।** मनुष्यमुखोऽन्यत्र पश्वाकारः **किंनरः । विलक्षणः** दृष्टमनुष्यविरुद्धलक्षणः ॥ २०२ ॥ २०३ ॥

कर्मत्वस्यानिरुक्त्या हि दृश्याध्यासो दशीरितः ।
परोक्तलक्षणे भक्त्या तत्कुतोऽद्य निरुच्यते ॥ २०४ ॥

अस्तु वा परलक्षणं यथा तथा । तदङ्गीकारस्तु तव त्वत्सिद्धान्तविरुद्ध इत्याह **कर्मत्वस्येति । अनिरुक्त्या** 'नियामकं न संबन्धं पश्यामो

नीलतद्धियोः' इति अख्यातिवादिनां ग्राह्यलक्षणाभावाख्यं तर्कं भिक्षित्वा मायिभिक्षुणा त्वया ज्ञानकर्मत्वनिर्वचनस्यानङ्गीकारेण । **दृश्यस्य** कर्मणः **दृशि** ज्ञाने । भक्त्येति काकुः । स्वसिद्धान्तमपि धिक्कृत्य ब्रह्मणः स्वविषयकज्ञानापलापदुराग्रहेण परलक्षणे कपटस्नेहप्रदर्शनेनेति ध्वनिः । **अद्य** ब्रह्मणः अवेद्यत्वसाधनदुःसाहसदीक्षादशायाम् । स्वनामां छित्त्वाऽपि पराप-शकुनं समीहमानमनुकरोतीति भावः ॥ २०४ ॥

अन्त्यश्चरणसंयोगो ग्रामेण सह यो भवेत् ।
न तत्फलमनुद्देशात्क्रियाया बहुदूरतः ॥ २०५ ॥

परोक्तलक्षणं दुष्टमित्युक्तम् । तत्समर्थयते **अन्त्य इति** । फलं क्रियाजन्यं किं संयोगादि, अभिलपनं, ज्ञातता, उत स्वरूपसंबन्धविशेषः । नाद्यः अनुद्देशात् । तत्र हेतुः **बहुदूरत इति** ॥ २०५ ॥

ग्रामं पदा स्प्रष्टुमेव न हि कोऽपि व्रजेत्पुमान् ।
ग्रामस्थधनपूर्वार्थप्राप्तिरेव प्रयोजनम् ॥ २०६ ॥

क्रियाया अनुद्देश्यत्वमेव विशदयति **ग्राममिति** । एवकारेण वक्ष्यमाणं धनपूर्वार्थप्राप्तिरूपमुद्दिष्टफलं व्यवच्छिनत्ति । पूर्वेत्यनेन पुत्रमित्रादिदर्शनसंग्रहः । ईदृशफलशालित्वं च कर्तुरेव न तु कर्मणो ग्रामस्य । अतो नेदं क्रियाफलशालित्वं कर्मलक्षणं येन तस्यातिव्याप्तिपरिहाराय परसमवेतेति विशेषणं स्यादिति भावः । न हि गोरेकशफत्वलक्षणमभिधाय तस्यानतिव्याप्तये अश्वासमवेतत्वविशेषणं निवेश्यते इत्याशयः ॥ २०६ ॥

न चेत्पदे पदे पुंसः क्रियया स्याद्विभागवान् ।
पूर्वः प्रदेशस्संयोगशाली स्यादुत्तरोऽपि च ॥ २०७ ॥

त्वदुक्तलक्षणेन स्याद्विषयत्वं तयोरपि ।
अतस्स्वरूपसंबन्धविशेषस्स हि कश्चन ॥ २०८ ॥

ननु फलत्वं नोद्देश्यत्वं विवक्ष्यते किन्तु क्रियाजन्यत्वमात्रम् । तच्चान्त्यचरणसंयोगेऽपि संभवति इति नोक्तदोष इत्यत आह **न चेदिति** । उद्देश्यत्वं न विवक्ष्यते चेत् । क्रियाजन्यत्वमात्रत्वं फलत्वं इति स्वीक्रियते चेत् इति यावत् । गमनक्रियाजन्यविभागरूपफलस्य **पूर्वदेशे** तथा तज्जन्यसंयोगलक्षणफलस्योत्तरदेशे विद्यमानत्वेन लक्षणस्य तयोरतिव्याप्तिरापद्यत इत्याह **त्वदुक्तेति** । न खलु तयोः कर्मत्वं कोऽपि व्यवहरतीति भावः । **अतः** प्रकारान्तरानुपपत्तेः परिशेषात् चतुर्थः कल्प एव स्वीकार्य इत्याह **स्वरूपसंबन्धेति** । **कश्चनेति** । कोऽसाविति विशेषजिज्ञासाया अनर्थकत्वात् । तदुक्तं वादावल्यां 'संयोगासंभवे समवायवदन्यस्यापि तयोरसंभवे कल्प्यत्वात्' इति, 'विषयविषयिभावस्य संभवादि'ति च ॥ २०८ ॥

इत्येव सर्वथा वाच्यं न चेज्ज्ञानक्रियाफलम् ।
अर्थाभिलपनं पुंसि तच्छालित्वं कथं घटे ॥ २०९ ॥

परिशेषसिद्धये प्रसक्तौ द्वितीयतृतीयप्रकारौ प्रतिषेधति **अर्थाभिलपनमिति** ॥ अभिलपनं व्यवहारः । **तच्छालित्वं** तदाश्रयत्वं व्यवहर्तृत्वमिति यावत् । **घटे** विषयरूपे । तथा च तत्राव्याप्तिरिति भावः । व्यवहारेण विषयविषयिभावसंबन्धस्य स्वरूपसंबन्धविशेषरूपस्य घटादेर्विद्यमानत्वेऽपि तस्य त्वयाऽनङ्गीकारादिति भावः ॥२०९॥

अतीतानागतेऽभावान्नार्थस्था ज्ञातता फलम् ।
ज्ञानस्य विषयत्वं तज्ज्ञातता स्यान्न चापरा ॥ २१० ॥

सा च नात्माश्रयात्कर्मलक्षणान्तर्गता भवेत् ।
क्षुद्रराज्ञोरभावेन लब्धा गौः किं विसृज्यते ॥ २११ ॥

ज्ञातता फलं इति द्वितीयं निराह **अतीतेति** । ज्ञातता नाम प्रमेयाश्रितः प्रकाशविशेषो वा ज्ञानविषयत्वं वा । आद्ये आह **अतीता-**

नागत इति। उपलक्षणम्। नित्यातीन्द्रियेषु चेत्यपि ग्राह्यम्। असति धर्मिणि प्रकाशविशेषरूपधर्मजननायोगादिति भावः। इदं च परीत्योक्तम्। स्वमते ज्ञानविषयत्वातिरिक्ताया ज्ञाततायाः अप्रामाणिकत्वेन कुत्राप्यनङ्गीकारादित्यवधेयम्। तदुक्तं वादावल्यां 'स्वरूपासिद्धेरि'ति। अस्तु तर्हि ज्ञानविषयत्वमेव ज्ञातता इति चेत्सत्यमेवम्। तथापि न तद्विषयत्वलक्षणान्तर्गतमिति संभवति ज्ञप्तौ आत्माश्रयादित्याह **सा चेति**॥ अलक्षणविरोधेन दृष्टार्थापलापिनः परस्याविवेकमपहसति **क्षुद्रेति**॥ **क्षुद्रज्ञोः** असंबद्धलक्षणस्य। **अभावेन** विरोधेन। **लब्धा** सर्वानुभवसिद्धा। **गौः** 'अहमित्येव यो वेद्यः स जीव इति कीर्तितः' इति जीवमात्रस्य स्वकर्मकज्ञानमभिदधाना वेदवाक् **किं विसृज्यते** कुतः अपलप्यते॥ २१०॥ २११॥

न हि ते भगवन्व्यक्तिं विदुर्देवा न दानवाः।
स्वयमेवात्मनाऽऽत्मानं वेत्थ त्वं पुरुषोत्तम।
इति गीताविरोधश्च स्वावेद्यत्वमते भवेत्॥ २१२॥

प्राग्जीवमात्रस्य स्ववेद्यत्वेऽनुभवश्रुती उदाहृते। इदानीं भगवतस्तथात्वे आगमं प्रमाणयति **नेति**॥ **व्यक्तिं** प्रभावं, अपरिच्छिन्नं सामर्थ्यातिशयम्। **न विदुः** साकल्येनेति शेषः। **स्वयमेव** अन्यनिरपेक्षेण। **आत्मना** स्वसामर्थ्येनैव। स्वरूपज्ञानेनेति यावत्। अत्र स्वयमित्युक्तं लुप्तप्रथमाविभक्त्या, मध्यमपुरुषप्रयोगादेव वा लब्धेन त्वमिति कर्त्रा वा भगवतः कर्तृत्वं, आत्मानं इति कर्मत्वं, आत्मना स्वरूपज्ञानेनेति च तस्यैव क्रियात्वमवगम्यते॥ स्वपक्षसाधकमिदं वाक्यं स्वावेद्यत्वमतं विरुणद्धि चेत्याह **इतीति**॥ २१२॥

यतोऽत्र वचनैस्सर्वैः कर्तृकर्मक्रियैकता।
विभक्तीनां विभागेन व्यक्तमेव प्रदृश्यते॥ २१३॥

तदेव विशदयति **यत इति** । कर्ता च कर्म च क्रिया च तासामेकता ॥ २१३ ॥

कथं पुंकल्पनामात्रमूलं लक्षणमेव ते ।
अन्यथीकुरुते सर्वसंमतं स्पष्टमागमम् ॥ २१४ ॥

मात्रशब्देन कल्पनायाः प्रामाणिकत्वव्यवच्छेदः । **ते** त्वदुक्तम् । **आगमं** उदाहृतं गीतावचनम् ॥ २१४ ॥

ज्ञानं प्रत्यक्परग्ज्ञेयमिति बाह्यार्थधीस्थले ।
नान्तरे यन्मनोज्ञाने ज्ञेयः प्रत्यक्परस्तव ॥ २१५ ॥

'कर्मकर्त्रोरुत्सर्गतो भिदा ॥ अभेदोऽपि विशेषे स्यात्' इत्यनुव्याख्यानोक्तं समर्थयितुं उत्सर्गापवादकं अनुभवं आगमं च विशेषं प्रदर्श्य भगवतः स्ववेद्यत्वं व्युत्पादितम् । अधुना प्रत्यक्पराक्स्वरूपो हि कर्मकर्तृभावो भेदाभावे कथं घटतामिति शङ्कां विशेषेण भेदप्रतिनिधिनेति परिहारे सत्येव ज्ञानज्ञेययोः प्रत्यक्पराभाव एवा र्वैत्रिक इति तथाभावरहितस्थलप्रदर्शनेन पररीत्याऽपि प्रकारान्तरेण समाधत्ते **ज्ञानमिति** । तथा च यत्र बाह्यार्थघटादिविषयकत्वं ज्ञानस्य, तत्रैव ज्ञेयस्य पराक्त्वमिति नियमः । **नान्तरे** मनसोऽप्यन्तर्नियामकतया स्थितभगवद्विषयके ज्ञाने । **यत्** यस्मात् । **मनोज्ञाने** मनःकरणकभगवद्विषयकज्ञाने **ज्ञेयः परः प्रत्यक्** । 'अधिष्ठाय मनश्चायं' इति गीतोक्तरीत्या मनोऽधिष्ठातृत्वेन तदन्तः स्थितत्वादिति भावः ॥ २१५ ॥

जडे ज्ञानास्वरूपत्वाज्ज्ञानज्ञेयविभिन्नता ।
ज्ञानरूपे तु किं न स्याज्ज्ञानता ज्ञयताऽपि च ॥ २१६ ॥

ज्ञाने प्रत्यक्त्वनियमस्य अपवाददर्शनेन यथा बाह्यार्थज्ञान एवेति सङ्कोचः तथा ज्ञानज्ञेययोर्भेदनियमस्यापि तद्दर्शनेन अचिदात्मकघटादिविषयकज्ञाने इति सङ्कोच उचित इत्याह **जड इति** ॥ २१६ ॥

मनोऽनुमित्या मानस्या किं नानुमिमते बुधाः ।
ज्ञानरूपं तु यद्वस्तु स्वेनापि ज्ञेयमेव तत् ।
अतस्स्वरूपविज्ञाने स्वयमात्मा प्रकाशताम् ॥ २१७ ॥

ज्ञानं ज्ञेयभिन्नमित्यस्य व्यभिचारं दर्शयति **मन इति । मनः** कर्म । **मानस्या** मनोरूपया । **अनुमित्या** सुखादिप्रतीतिः क्रमिकसंयोगवत्करण-साध्या क्रियात्वात् छिदिक्रियावत् इत्येवंरूपया । तथा च तत्र मनस एव ज्ञानत्वेन ज्ञेयत्वेन च तयोर्भेदव्याप्तिस्तत्र भग्नेति भावः ॥ प्रकृतोप-योगमाह **अत इति** ॥ २१७ ॥

श्रुतेस्स्मृतेः कुतो बाधः क्रियतेऽनुभवस्य च ।
यतस्तदात्मानमेवावेदित्युपनिषज्जगौ ॥ २१८ ॥

चशब्देन न्यायामृतोक्तानि 'आत्मरूपा संवित् स्वविषयः स्वजन्य-व्यवहारविषयत्वादि'त्याद्यानुमानान्यपि ग्राह्याणि । प्रतिज्ञातां श्रुतिमाह **तदिति** । अत्र क्रियाकर्तृकर्मैक्यं सुस्पष्टम् । **बाधः क्रियते** अप्रामाण्यं उच्यते । दोषविसंवादयोरभावादिति भावः ॥ २१८ ॥

न चेदेवमसंबद्धं वदतो मरणे कथम् ।
विलपेत्पट्टमहिषी स्वोरस्ताडनपूर्वकम् ॥ २१९ ॥

असंबद्धं वदतः भगवत्प्रद्वेषमूलकतत्सार्वज्ञ्यापलापरूपात्युत्कटपापिनः **मरणे** 'इहैव फलमश्नुते' इति स्मृत्यनुसारेण क्षीणायुष्ट्वतयेति हृदयम् । पट्टमहिषीति दुःखोद्रेकात्प्रवृत्तिमाह । तत्रैकस्यैव देहस्य कर्तृत्वं कर्मत्वं । दृष्टमिति भावः ॥ २१९ ॥

अवान्तरविशेषेण यद्येकत्रापि तद्भवेत् ।
आत्मा कर्म क्रिया ज्ञानमित्यत्रापि विशेषणे ।
अवकाशोऽस्ति यच्छब्दा अपर्यायास्तयोस्सदा ॥ २२० ॥

अवान्तरविशेषेण अवयवावयविनोर्भेदस्यापि सद्भावेन । **एकत्र** देहे । **तत्** कर्तृत्वं कर्मत्वम् । **अत्रापि** 'आत्मानमेवावेदि'ति अनुपचरितक्रियाकर्मभावरूपभेदव्यवहारेऽपि । **विशेषणे** विशेषबलेन भेदव्यवहारनिर्वाहे । उपलक्षणतयाऽपर्यायशब्दवाच्यत्वरूपमेकं भेदव्यवहारमाह **यदिति** । **तयोः** ज्ञानब्रह्मणोः ॥ सदेत्यनेन व्यवहारस्यानुपचरितत्वमाह ॥ २२० ॥

मामहं न विजानामीत्यत्र कर्तृत्वकर्मते ।
यथैकस्य तथा क्वापि क्रियाकर्मैक्यमुच्यताम् ॥ २२१ ॥

ननु मनोऽनुमितौ क्रियाकर्मैक्यमात्रम् । कर्ता त्वात्मैव । उरस्ताडने कर्तृकर्मैक्यमात्रम् । क्रिया तु ताडनमेव । उभयत्रापि न त्रयाणामैक्यमिति न दृष्टान्तयोरत्यन्तसङ्गतिरित्यतोऽन्योन्यं त्रयाणां विरोधाभावमात्रे एतद्दृष्टान्तोक्तिरिति वा प्रागुक्तेन मामहं जानामीति अनुभवेनैव त्रयाणां ऐक्यसिद्धिरिति वा समाधत्ते **मामिति** ॥ **अत्र** अज्ञानज्ञानानुभवे । **क्वापि** मामहं जानामीति ज्ञानज्ञानानुभवे । **क्रियाकर्मैक्यं** उपलक्षणम् । त्रयाणामप्यैक्यमित्यनुसन्धेयम् ॥ **उच्यतां** अनुभव आदरवता भवता इति शेषः ॥ २२१ ॥

अभिधाख्याभिधेयत्वमभिधानाम्नि किं न ते ।
प्रमाणसदसत्त्वाभ्यां व्यवस्था च भविष्यति ॥ २२२ ॥

क्रियात्वकर्मत्वयोरेकत्र समावेशं दृष्टान्तान्तरेण घटयति **अभिधेति** ॥ अभिधा इति आख्यया नाम्ना अभिधेयत्वं वाच्यत्वम् । इदं चोपलक्षणम् । कृतिविशेषस्य कार्यत्ववत् इच्छाविशेषस्य चेष्टत्ववत्, व्यवहृतेश्च व्यवहार्यत्ववत् इत्यादीनि न्यायामृते आत्मनः पराभिमतस्वप्रकाशभङ्गे उदाहृतानि दृष्टान्तान्तराण्यप्यनुसन्धेयानि ॥ २२२ ॥

किं ज्ञानपदजन्यं यज्ज्ञानं स्वविषयं न तत् ।
न हि तस्याप्यवेद्यस्य व्यवहारो भवन्मते ॥ २२३ ॥

ज्ञान एव तयोः समावेशं दर्शयति **किमिति** । ज्ञानसामान्यविषयकस्य स्वविषयकत्वस्यापि सत्त्वादिति भावः । अन्यथा ज्ञानरूपस्य तस्य स्वविषयकव्यवहारजनकत्वं न स्यात् । त्वन्मते 'अवेद्यत्वे सत्यपरोक्षव्यवहारयोग्यत्वं स्वप्रकाशत्वं' इति लक्षणमभिदधता ब्रह्मण एव केवलं स्फुरणरूपतया वेद्यत्वाभावेऽपि स्वव्यवहारजननयोग्यत्वमुररीकृतम् । नान्यत्र । न हि ज्ञानपदजन्यं ज्ञानं ब्रह्म येनात्रापि तथात्वं भवेत् । ब्रह्मणोऽजन्यत्वात् । अतोऽस्य स्वविषयकत्वमावश्यकमिति तत्रैव क्रियात्वकर्मत्वयोः समावेशः । अपिशब्देन ब्रह्मणोऽवेद्यस्यापरोक्षव्यवहाराङ्गीकारं परस्य व्याघातेन गर्हयामासेति ध्येयम् ॥ तदेतदभिप्रेत्योक्तं **न हीति** ॥ २२३ ॥

तत्र स्वविषयत्वं तत्स्वप्रकाशत्वमागतम् ।
जडेऽपि क्वचिदेवं चेच्चेतनेषु कुतो न तत् ॥ २२४ ॥

एवं चेदित्यनेन 'मामहं जानामीत्येवंरूपं चेतनस्यैव न तु क्वापि जडे' इति ध्वनितम् । तदुक्तं वादावल्यां प्राभाकरनिराकरणप्रस्तावे प्रामाण्यस्वतस्त्ववादे 'अनात्मरूपेषु मनोवृत्तिज्ञानेषु स्वप्रकाशत्वासंभवादि'ति ॥ २२४ ॥

यदि स्वावेद्यता स्वप्रकाशत्वमिति मन्यसे ॥ २२५ ॥

तदा वदामश्शब्दस्य विरुद्धार्थपरिग्रहे ।
को हेतुरिति यद्येकस्यैव कर्तृत्वकर्मते ॥ २२६ ॥

विरुद्धे इति भीतोऽसि शब्दायोग्यार्थकल्पनात् ।
कुतो न भीः किं च सा भीर्धावन्तं त्वाऽनुधावति ॥ २२७ ॥

इदानीं पराभिमतं स्वप्रकाशत्वं दूषयति **यदीत्यादिना** । **शब्दस्य** स्वप्रकाशेत्यस्य **विरुद्धार्थपरिग्रहे** स्वावेद्यत्वापरपर्यायस्वाप्रकाश्यत्वरूपार्थस्वीकारे । **कर्तृत्वकर्मते** क्रियात्वकर्मते चेत्यपि ग्राह्यम् । **विरुद्धे** सहान_

वस्थिते । **अयोग्येति** स्वारसिकार्थप्रतिषेधात्मकेत्यर्थः । सहानवस्थानलक्षणविरोधापेक्षया प्रतिषेधात्मकविरोधस्य प्राबल्यादिति भावः । यदि आद्याद्भीस्तर्हि द्वितीयाद्विरोधात्सुतरां भेतव्यं इत्याशयः । अयोग्यस्य परवेद्यत्वरूपार्थस्याङ्गीकारेऽपि **सा भीः** कर्तृत्वकर्मत्वादेरेकत्र समावेशानुपपत्तिरूपा भीः । **अनुधावति** बलादापतति ॥ २२५ ॥ २२६ ॥ २२७ ॥

दोषोऽयं परवेद्यत्वे समो यस्माद्विचारणे ।
आत्मनो वृत्तिवेद्यत्वे कर्तृकर्मैक्यमागतम् ॥ २२८ ॥

तत्कथमित्यत आह **आत्मन इति** । 'अहं मां जानामि' इत्यत्र जानामीति क्रियाया वृत्तिरूपत्वेन क्रियाकर्त्रैक्यं तदवस्थमेव ॥ २२८ ॥

सुखादेस्साक्षिवेद्यत्वे क्रियाकर्त्रैक्यमापतेत् ।
क्रियाकर्मैक्यमप्येवं न्यायसाम्यात्कुतो न ते ॥ २२९ ॥

एवं सुखमहमनुभवामीत्यत्र सुखानुभवस्य साक्षिरूपत्वेन क्रियाकर्त्रैक्यं तदवस्थमेव । तथा च भक्षितेऽपि लशुने न शान्तो व्याधिरित्याभाणकविषयोऽसीति भावः । विरोधसाम्ये क्रियाकर्मैक्यमपि विप्रतिपन्नं अङ्गीक्रियताम् । अर्धजरतीयानुपपत्तेरित्याह **क्रियेति** ॥ २२९ ॥

किं च साक्ष्येव विषयावच्छिन्नाऽज्ञानदृक्त्वया ।
वाच्याऽवश्यं यतो वृत्तिनाश्यस्यान्याऽत्र नैव दृक् ॥२३०॥

स्वव्याहतश्च परस्य चिदवेद्यत्वाङ्गीकार इति वक्तुमुपयुक्तमाह **किं चेति** । त्वया **साक्ष्येव** शुद्धचिदेव न तु वृत्तिः । विषयाधिष्ठानचैतन्यावरकाज्ञानदृक् इति **अवश्यं वाच्या** । तत्र हेतुः **यत इति** । **अत्र** अज्ञाने आव्रियमाणतया अवच्छेदके चैतन्ये **अन्या** चिदन्या वृत्तिरूपा **दृक्**

प्रकाशिका नैव। **अयं भावः** चिद्विषयकमज्ञानं केन प्रकाश्यते इति वाच्यम्। न तावद्वृत्त्या। तस्य तन्नाश्यत्वोपगमनेन तत्प्रकाश्यत्वायोगात्। अतः साक्षिरूपचितैवेति वाच्यम्। उक्तं च 'आश्रयत्वविषयत्वभागिनी निर्विशेषचितिरेव केवले'ति। चिद्विषयकाज्ञानस्य चिद्वेद्यत्वे अज्ञाने विषयतयाऽवच्छेदिकायाश्चितोऽपि तद्वेद्यत्वं अङ्गीकृतमेवेति पुनस्तदवेद्यत्वोक्तिः कथं व्याहता न भवेदिति ॥ २३० ॥

विषयश्च स्वयं तस्य स्वावेद्यत्वे च कीर्तिते।
अज्ञानवेदनस्यैव भवेदत्यन्तवेदना।
अवच्छेदकदृग्व्याप्तं यतोऽवच्छिन्नदर्शनम् ॥ २३१ ॥

स्वयं चिदेव। **विषयः** अज्ञाने विषयतयाऽवच्छेदिका। **तस्य** चिद्रूपात्मनः **कीर्तिते** अवेद्यत्वं स्वप्रकाशत्वं इति लक्षणकथनेनाभिहिते सति। **अज्ञानवेदनस्यैव** त्वदुपगताज्ञानज्ञानस्यैव। **अत्यन्तवेदना** अतिसंकटः असंभव इति यावत्। भवेत्। साक्षिचैतन्यं अज्ञानावच्छेदकचैतन्यविषयकं चैतन्यावच्छिन्नाज्ञानविषयकत्वात्। यद्यदवच्छिन्नविषयकं ज्ञानं तत्तदवच्छेदकविषयकं यथा दण्डावच्छिन्नचैत्रविषयकं दण्डविषयकं इति प्रयोगो ध्येयः। विपक्षे हेतूच्छित्तिः ॥ २३१ ॥

ज्ञानरूपत्वतः किं स्यात्तद्गोचरतां विना।
घटज्ञानं ज्ञानमिति किमन्यव्यवहारकृत् ॥ २३२ ॥

माऽस्तु साक्षिज्ञानस्य अज्ञानविषयकत्वम्। चैतन्यावच्छिन्नाज्ञानस्य ज्ञानरूपः साक्षीति व्यवहारादिकं साक्षिणस्तद्विषयतां विनैव स्वयं ज्ञानरूपतयैव संपत्स्यत इत्याशङ्कां परिहरति **ज्ञानेति ॥ किं स्यात्** तद्व्यवहारादिकं नैव संभवतीति भावः। ज्ञानस्य तद्व्यवहारजनकत्वे तद्विषयकत्वमेव तन्त्रं न तु स्वयं ज्ञानरूपतामात्रमिति भावः। एतदनङ्गीकारेऽतिप्रसङ्गमाह

घटज्ञानमिति । ज्ञानमितीति । स्वयं ज्ञानरूपमित्येतावता । अन्यस्य पटादेर्व्यवहारकृत् किम् । नैव । तथैति भावः । 'अन्यथा प्रमेयत्वमपि स्ववृत्तिं विनैव स्वस्मिन्प्रमेयव्यवहारं कुर्यादिति केवलान्वयि न स्यात् । गतिरपि ग्राम इव स्वस्मिन्नपि स्वकार्यं कुर्यादि'त्यादीनि न्यायामृते स्वप्रकाशत्वभङ्ग उक्तानि अतिप्रसङ्गान्तराणि ध्येयानि ॥ २३२ ॥

अतोऽज्ञानं स्वविज्ञप्त्यै क्षिपेत्तत्स्वप्रकाशताम् ।
चित्रमत्रापि ते बाणस्तव प्राणापहारकः ॥ २३३ ॥

अतः अवच्छेदकज्ञानं विनाऽवच्छिन्नज्ञानायोगात् । **स्वविज्ञप्त्यै** चैतन्यावच्छिन्नस्वज्ञानाय तस्य चैतन्यस्य स्वप्रकाशतां अवच्छेदकीभूतस्वविषयकत्वं **क्षिपेत्** आक्षिपेत् , अन्यथाऽनुपपत्त्या साधयेत् । **बाणः** भावरूपाज्ञानस्फोरकं चैतन्यमित्यङ्गीकारः तव **प्राणस्य** परमप्रियस्य अवेद्यत्वस्य । **अपहारकः** अभावसाधकः ॥ २३३ ॥

किं च प्रागुक्तदृष्टान्तत्रितयं च न विस्मर ।
यत्र कर्मक्रियैक्यं च साक्षादेव निदर्शितम् ॥ २३४ ॥

त्रितयं मनोऽनुमितिः, अभिधानाम, ज्ञानपदजन्यज्ञानं च । **न विस्मर** । विस्मृत्य ज्ञानव्यवहारयोः समानविषयकत्वनियमापलापं मा कार्षीः इति भावः । **साक्षादेव** अत्रैव तावच्छेदकत्वेन परम्परया ॥ २३४ ॥

वृथा वागर्थदम्पत्योर्नायोगाय मतिं कुरु ॥ २३५ ॥

वृथा बाधकं विनैव । क्रियायाः कर्मत्वे छिदायाश्छेद्यत्वापात इत्याद्यतिप्रसङ्गस्य 'प्रमाणसदसत्त्वाभ्यां व्यवस्था च भविष्यति' इति प्रागेव समाहितत्वात् । **वाक्** स्वप्रकाशशब्दः **अर्थः** स्वकर्मकप्रकाशरूपता ।

दंपत्योः नित्यसंबद्धयोः सीतारामयोरिव । **अयोगाय** विरुद्धार्थस्य स्वाप्रकाश्यत्वाख्यस्य वर्णनेन वियोजनाय । **न मतिं कुरु** रावणवत् दुःसाहसं मा कार्षीः ॥ २३५ ॥

अतस्स्वावेद्यता त्याज्या स्ववेद्योऽपि भवेत्प्रभुः ।
न चेत्स्वानन्दानुभवो मुक्तौ मुक्तस्य किंबलात् ॥ २३६ ॥

अतः भगवतः सार्वज्ञापलापपापहेतुत्वात् । **स्ववेद्यः** स्वेन साकल्येन वेद्यः । अपिशब्देन इतरैर्यथायोग्यज्ञेयत्वं समुच्चिनोति । अन्यथा मुक्तौ स्वरूपानन्दस्य स्वरूपेन्द्रियैरनुभवः **मुक्तस्य** । कर्तरि षष्ठी । मुक्तकर्तृकः **कस्य बलात्** । स्यादिति शेषः । तत्र बाह्योपाधेर्लयात्स्वरूपेणैव अवस्थितेरिति भावः । अत्र अनुभव इति क्रियायाः आनन्देति कर्मणः मुक्तस्येति कर्तृनिर्देशेन क्रियाकर्मकर्तॄणां तत्रैक्यानुपगमे मुक्तेः पुमर्थत्वभङ्गोऽनिष्ट आपादितो ध्येयः ॥ २३६ ॥

अतस्स्वविषयो यस्य प्रकाशो विद्यते सदा ।
स एव स्वप्रकाशाख्य इति सर्वं समञ्जसम् ॥ २३७ ॥

स्वप्रकाशशब्दं निर्वक्ति **स्वविषय इति** । **सर्वं** उदाहृतप्रमाणजातं **समंजसं** असङ्कोचेन भगवतः सार्वज्ञसिद्धिपर्यवसायि ॥ २३७ ॥

मुखेनातिप्रसन्नोऽपि हृदि हालाहली खलः ।
जल्पतस्स्वप्रकाशत्वं स्वावेद्यत्वं यतो हृदि ॥ २३८ ॥

मुखेन आपाततः **अतिप्रसन्नोऽपि** । अपिर्गर्हणे । तथा प्रतीयमानोऽपि **हृदि** तात्पर्येण । **हालाहली** परतत्वप्रद्वेषविषवान् । एतेन कण्ठोक्त्यैव, अवेद्यत्वं तात्पर्यतः स्वप्रकाशत्वं आपाततः ब्रुवाणोऽयं खलतर इति ज्ञापितं भवति ॥ २३८ ॥

अन्यानजानन्नप्यन्धो जानात्यहमिति स्फुटम् ।
स्वपरज्ञानशून्योऽसौ घटस्स्यादथवा पटः ॥ २३९ ॥

ज्ञानस्य सविषयकत्वं स्वभावः । स च परमते आत्मनः ज्ञाने न संभवति । तथा हि । तज्ज्ञानं स्वविषयं परविषयं वा । नाद्यः स्ववृत्तिविरोधेनानर्थाकारात् । न द्वितीयः मोक्षे पराभावात् । सविषयकत्वस्वभावहानौ ज्ञानस्वरूपहानिरेव । तथा च तस्य घटादितुल्यतेति वक्तुं ज्ञानस्य सविषयकत्वस्वभावं व्युत्पादयति **अन्यानिति** । रूपवत्पदार्थान् । **अजानन्** अपश्यन् । अहमितीत्युपलक्षणम् । चक्षुरितरप्रमाणकानित्यर्थः । तथा च तज्ज्ञाने सविषयकत्वमविकलमिति भावः । **असौ** परमात्मा नित्यमुक्तः । उक्तरीत्या **स्वपरज्ञानशून्यः** तज्ज्ञानाभिमतस्य स्वपरविषयकत्वशून्यत्वात् वस्तुतो ज्ञानमात्रशून्यः घटः स्यात् जडः स्यादिति यावत् । **अथवा पटः** सर्वथा न चेतन इति भावः । तदुक्तं भगवत्पादैः 'विषयवर्जितः प्रकाश एव न भवति घटवदि'ति ॥ २३९ ॥

किं स्वादुना गुडेनापि यद्रसो नानुभूयते ।
किं स्वरूपसुखेन स्याद्यदि तन्नानुभूयते ॥ २४० ॥

जडत्वापत्त्या निर्विशेषज्ञानस्य अपुमर्थत्वं समर्थ्याधुना अनुभवाविषयस्य निर्विशेषसुखस्यापि तत्समर्थयते **किमित्यादिना** स्वादुगुडात्मतैव न पुरुषार्थः किं तु तद्रसानुभव एव यथा तथा न सुखात्मतामात्रं पुरुषार्थः किं तु तदनुभव एव । यथोक्तं न्यायामृते निर्विशेषसुखस्य पुरुषार्थत्वभङ्गे 'सुखी स्यामितिवत् सुखं स्यामितीच्छाया अदर्शनादि'ति ॥ २४० ॥

चोरस्य चोरश्शिष्टोऽपि शिष्टश्शिष्टस्य केवलम् ।
स्वाज्ञं तत्किल सर्वज्ञं मुक्तं स्वानन्दभोक्तृ च ॥ २४१ ॥

चोरस्य अन्यस्य संबन्धि परमात्मत्वं स्वस्येति मन्यमानस्य मायावादिनः । मते इति शेषः । **शिष्टोऽपि** तत्ववाद्यपि **चोरः** स्वकीयब्रह्मात्म-

त्वाभिसंधित्यागवतो भेदज्ञानिनः स्तेनोपमत्वं इति तदाशयात् । **शिष्टस्य** प्रमाणसिद्धसंप्रत्ययावलम्बिनः मते **शिष्टः शिष्टः** तथात्वेन व्यवहारविषयः । 'सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी' इति गीतोक्तं तामसबुद्धेर्लक्षणं मायावादिबुद्धौ समन्वेतीत्याह **स्वाज्ञमिति** । यत् सर्वज्ञं ब्रह्म तत् **स्वाज्ञं** स्वविषयकज्ञानशून्यम् । यत् मुक्तं तत् तत्र परस्यैवाभावेन, स्वपरज्ञानशून्यम्, यत् आनन्दभोक्तृ तत् निर्विशेषतया आनन्दानुभवरहितं इत्यपि पूरणीयम् । ॥ २४१ ॥

यदि स्वरूपविज्ञानं नैव स्वाविषयं भवेत् ।
तदा स्वव्यवहारश्च कथं तस्मादुदीर्यताम् ॥ २४२ ॥

'अवेद्यत्वे सत्यपरोक्षव्यवहारयोग्यत्वं स्वप्रकाशत्वं इति चेन्न व्याहतत्वेन असंभवित्वात्' इति वादावल्युक्तं व्याघातं समर्थयमान आह **यदीति** । व्यवहारविषयत्वोक्त्या वेद्यत्वमुक्त्वा पुनस्तन्निषेधे व्याघात एवेति भावः । ॥ २४२ ॥

घटज्ञानं मनोरूपं न मनोव्यवहारकृत् ।
विषयस्य घटस्यैव व्यवहारकृदिष्यते ॥ २४३ ॥

'ज्ञानरूपत्वतः किं स्यात्तद्गोचरतां विना' इति प्रागुक्तं दोषान्तरोक्त्या द्रढयति **घटज्ञानमिति** । मनः स्वयं ज्ञानरूपमित्येवता न मनोव्यवहारकृत् स्वविषयकत्वाभावात् । किं तु घटविषयकत्वात् स्वविषयघटस्यैवेति भावः ॥ २४३ ॥

अतस्तद्विषयज्ञानमेव तद्व्यवहारकृत् ।
ज्ञानस्वरूपतामात्रं व्यवहारेऽप्रयोजकम् ॥ २४४ ॥

व्यवहारे अप्रयोजकमिति पदच्छेदः ॥ २४४ ॥

सुखरूपत्वमप्येवं मनसि व्यभिचारतः ।
न फलं किं तु निर्दुःखसुखस्यानुभवः फलम् ।। २४५ ।।

यथा सविषयकत्वं मुक्तज्ञानस्यापेक्षितं एवं तत्सुखस्य तदनुभवविषयत्वमपि अपेक्षितम । अन्यथा मुक्तेरफलत्वापत्तिरित्याह **एवमिति** । ननु निर्दुःखसुखात्मता एव फलमस्तु किं तदनुभवेन । यथाऽऽह नयकारिकायां 'तस्मादविद्यास्तमयो नित्यानन्दप्रतीतितः । निःशेषदुःखोच्छेदाच्च पुरुषार्थः परो मत' इति । तन्न । सुखविषयकत्वाभावे स्फुरणस्य, तादूप्यमात्रेण फलत्वानुपपत्तेरित्याह **नेति** । विमता मुक्तिः फलं सुखरूपत्वात् इत्यस्य वैषयिकसुखात्मके मनसि व्यभिचारः । तत्परिहाराय हेतौ सुखेऽनुभूयमानत्वविशेषणं निवेशनीयम् ।। २४५ ।।

तथैव सुखरूपत्वं ज्ञानरूपत्वमात्मनि ।
न फलं यन्मनो बाह्यज्ञानरूपं सुखात्मकम् ।। १४६ ।।

सुखरूपत्वे सति ज्ञानरूपत्वं हेतुश्चेदपि मनसो बाह्यज्ञानात्मकत्वस्यापि सत्त्वेन व्यभिचारस्तदवस्थ इत्याह **तथैवेति** ।। २४६ ।।

यथा मानससौख्यस्य साक्षिणाऽनुभवः फलम् ।
संसारे मुक्तिकाले च फलं वाच्यं तथैव हि ।। २४७ ।।

मौक्तः सुखानुभवः, फलं सुखानुभवत्वात् साक्षिकर्तृकसंसारिकालीनबाह्यसुखानुभववत् इति स्वपक्षे युक्तिमाह **यथेति** । मौक्तत्वस्याधिकस्य पक्षे निवेशनान्न पक्षतावच्छेदकहेत्वोरैक्यम् ।। २४७ ।।

न चेदपुरुषार्थत्वं मुक्तेस्स्यादुक्तवर्त्मना ।
तस्मात्स्वरूपानन्दस्य नानुभूतिः कथं तदा ।। २४८ ।।
स्वगोचरत्वमेवातो वक्तव्या स्वप्रकाशता ।
आनर्थक्यं न चेन्मुक्तेस्स्वप्रकाशपदस्य च ।। २४९ ।।

स्वस्य प्रकाशो यस्य स्यात्स्वप्रकाशं तदेव हि ।
गीतावाक्ये कर्मताया व्यक्तोक्तिश्च विरुध्यते ।
हार्दं हालाहलं तस्मात्स्वस्यैव क्लेशकारकम् ॥ २५० ॥

विपक्षे प्राग्युक्तादितमतिप्रसङ्गं स्मारयति **न चेदिति** ॥ मुक्तेर्निर्विशेषभावदूषणमुपसंहरति **तस्मादिति** । प्रकृतपरमप्रमेयमुपसंहरति **स्वेति** । तथा च भगवतः स्ववेद्यत्वेन सर्वज्ञत्वसिद्धिर्निष्प्रत्यूहेति फलितम् । तथाऽपि चेद् दुराग्रहः तर्हि स्वप्रकाशशब्दनिर्वचनविरोधः, मुक्तेरपुमर्थत्वं, गीताद्युदाहृतव्यक्तोक्तिविरोधः इत्यादिदोषा वज्रलेपायिता इत्याह **न चेदिति** । तदुक्तं सुमध्वविजये 'स्वानन्दविषये मोक्षे वेदोक्ते युक्तिसाधिते । द्वेषोऽयं वादिनां कस्मात्तद्विरुद्धेऽथवाऽऽग्रह' इति । **हालाहलं** भगवतो निर्विशेषत्वप्रतिपादनेन तस्य ज्ञानानंदादिगुणवत्त्वदूषणदुरुपक्रमः । **क्लेशकारकं** दुरन्तदुःखफलकम् । विस्तरोऽस्य न्यायामृते निर्विशेषसुखस्य पुरुषार्थत्वभङ्गे ॥ २४८ ॥ ॥ २४९ ॥ २५० ॥

नित्यशुद्धं तु यद्ब्रह्म परब्रह्म तदेव हि ।
नित्यशुद्धश्च भगवान्नित्यमुक्तो मम प्रभुः ।
बन्धमूलो यतो दोषो बन्धाभावे न कश्चन ॥ २५१ ॥

विष्णोरपरब्रह्मत्वं निराकर्तुमुत्तरः सौरभांशः । अत्राह । द्वे ब्रह्मणी । गुणपूर्णं जगज्जन्मादिकर्तृ विष्ण्वाख्यं अपरं ब्रह्म । एतच्च नित्यशुद्धबुद्धमुक्तस्वभावम् । अज्ञानाश्रयत्वविषयत्वभाजनं निर्विशेषं तु परं ब्रह्म । एतच्च निष्कलं निष्क्रियं पारमार्थिकं रूपमिति । तदेतदयुक्तम् । 'अतोऽशेषगुणोन्नद्धं निर्दोषं यावदेव हि । तावदेवेश्वरो नाम तत्र भेदोऽस्ति न क्वचित्' इत्युक्तलक्षणानुरोधेन 'निर्दोषं हि समं ब्रह्म' 'निरनिष्टो निरवद्य' इतिप्रभृतिप्रमाणैर्नित्यशुद्धतयाऽवगतः विष्णुरेक एव ब्रह्म । स एव परमात्मेत्युदाहृतः । न ब्रह्मणि परापरविभागोऽस्ति । येन विष्णोरपरब्रह्मत्वोक्तेरवकाश

इत्याह **नित्यशुद्धमिति** । तुना अज्ञानस्फोरकं पराभिमतं व्यवच्छिनत्ति । यद्ब्रह्म तदेव हि परब्रह्म इत्यनेन न तत्र परापरविभागोऽस्ति इति ज्ञापितम् । हिशब्दः 'ब्रह्मशब्दः परे विष्णौ नान्यत्र क्वचिदिष्यते' इत्यादिप्रमाणप्रसिद्धिमाह । अतादृशस्तु जीव एवेति भावः । विष्णुः परं ब्रह्म, नित्यशुद्धत्वात् व्यतिरेकेण जीववत् । परमिति उपरञ्जकं विशेषणम् । न चासिद्धिः । विष्णुः नित्यशुद्धः नित्यमुक्तत्वादिति तत्सिद्धेः । पूर्ववद्-दृष्टान्तः । न चात्राप्यसिद्धिः । 'नित्यतीर्णाशनायादिरेक एव हरिः स्वय-मि'ति मानतस्तत्सिद्धेः । नाप्यप्रयोजकता । यतः मुक्तत्वं बन्धाभावः । शुद्धत्वं दोषाभावः । बन्धश्च जरामरणादिदोषहेतुः । कारणाभावे च कार्याभावो नियतः । न चोभयत्र श्रौतत्त्वे व्यभिचारः । स्वतो नित्यशुद्धत्वमुक्तत्वयो-र्हेतुत्वेन विवक्षणात् । प्रभुरित्यनेन स्वधाम्ना दोषनिरसनसामर्थ्यमाह । ॥ २५१ ॥

तव ब्रह्म त्वविद्याऽऽख्यदोषेण कलिलं सदा ।
अनादिकालमारभ्य देहे देहे च संसरत् ॥ २५२ ॥

तव त्वदभिमतम् । **अविद्याऽऽख्यदोषेणेति** । अविद्याया दोषत्वं 'अविद्याक्षेत्रमुत्तरेषामि'ति **सूत्रसिद्ध**मिति भावः । **सदा कलिलम्** । अविद्या तच्चितोर्योगः षडस्माकमनादयः' इति त्वदङ्गीकारात् अनादि-भावस्याज्ञानस्य ब्रह्मवदनिवर्त्यत्वेन सदातनत्वं कलिलत्वस्य सेत्स्यतीति भावः । यद्वा एकजीववादे उपदेशकस्य गुरोरभावेनाज्ञानस्यानिवर्त्यत्वम् । तदुक्त तत्त्वोद्योते 'तस्य च तत्रैवाग्रहान्न कदाचिदपि भेदनिवृत्तिर्भवति' इति । बहुजीववादेऽपि दोषः समान इत्याह **देहे देह** इति । **प्रतिदेहमित्यर्थः** । अयं भावः । अद्वैतमते हि न केवलं मुक्तानां किं तु संसारिणामपि जीवानां ब्रह्मणैक्यं स्वीकृतम् । तथा च कतिपयेषां जीवानां मुक्तत्वेऽपि संसारिणां

सदा विद्यमानत्वेन तदैक्ये ब्रह्मणः सदा संसारकलिलत्वमेव । न कदाऽपि मुक्तत्वम् । बन्धसामान्याभावो हि मुक्तत्वं नाम । न च तद्यत्किञ्चिद्बन्धविशेषसद्भावेऽपि जाघटीतीति भावः ॥ २५२ ॥

भवपंकेन मलिनं कथं शुद्धं भवेद्वद ।
ब्रह्मत्वमाग्रहादेव जीवचैतन्यमेव तत् ॥ २५३ ॥

तथा च त्वद्ब्रह्मणः न कदाऽपि मुक्तत्वप्रत्याशेत्याह **भवेति** । कथं तर्हि तस्मिन् ब्रह्मत्वव्यवहार इत्यतः तव दुराग्रहमात्रादेवेत्यवेहीत्याह **ब्रह्मत्वेति** । वस्तुतस्तज्जीवचैतन्यमेवेत्याह **जीवेति** ॥ २५३ ॥

बन्धस्यावास्तवत्वेन बद्धं शुद्धं तदेव चेत् ।
तवाशेयं श्रुतिस्त्वाह सखायौ सयुजौ सदा ॥ १५४ ॥

यदुक्तं मदभिमतब्रह्मणः सदाऽविद्याख्यदोषसद्भावान्न शुद्धत्वमिति न तद्युक्तम् । अविद्यायास्तत्कार्यबंधस्य चावास्तवत्वात् । शुद्धत्वस्य पारमार्थिकत्वात् । न ह्यवास्तवेन बन्धेन पारमार्थिकं शुद्धत्वं व्याहन्यते इति शङ्कते **बन्धस्येति** । स्यादप्येवं यदि बन्धस्यावास्तवत्वमेव स्यात् । न च तदस्तीत्याह **तवेति आशेति** । विनान प्रमाणे प्रमेयसिद्धिर्दुराशेत्यर्थः । न केवलमेतावत् । श्रुतिपराहतश्च तव मनोरथ इत्याह **श्रुतिरिति** । इयं हि श्रुतिः संसारे मुक्तौ च भेदं जीवपरयोर्व्याचक्षाणा न बन्धमिथ्यात्वं सहते । द्विवचनेन सखित्वसायुज्यादिकथनेन च स्फुटं भेदावगमात् । पूर्णत्वलक्षणसुपर्णत्वस्य स्वादुमात्रभोक्तृत्वस्य मत्यैक्यस्थानैक्ययोश्च मुक्तजीवे एव मुख्यतः संभवात् । ॥ २५४ ॥

खगावश्नदनश्नन्तौ देहे देहे कृतास्पदौ ।
द्वा सुपर्णेत्यादिरूपा सा तवाशालतां दहेत् ॥ २५५ ॥

अश्नदनश्नन्तौ । दुःखानास्पृत्वात्, विषयान्विनाऽपि पूर्णत्वात्, स्ववशेनादनात्, अनश्नन् हरिः; अतादृशः अश्नन् जीवः इति द्वौ । **सा** उक्तप्रकारेण बद्धमुक्तयोर्भेदमभिदधाना । आशालतां तयोरैक्यं साधयेयमित्येवंरूपाम् ॥ २५५ ॥

बन्धमिथ्यात्वतो मुक्तमस्तु बद्धं कथं भवेत् ।
शुक्तौ रूप्यत्वमिथ्यात्वे शुक्तितैव न रूप्यता ॥ २५६ ॥

सामानाधिकरण्यं खलूभयोराधेयाभिमतयोस्सत्त्व एव । न तु पुनरन्यतरस्य मिथ्यात्वे । बद्धत्वस्य मिथ्यात्वे मुक्तत्वमेव भवेत् । न तु तस्यैव बद्धत्वमपि इत्याह **मिथ्यात्वत** इति । तत्र निदर्शनं **शुक्ताविति** । ॥ २५६ ॥

व्यावहारिकता या ते राजखड्गक्षतिर्हि सा ।
मरणे न विशेषोऽस्ति बद्धत्वं गतमेव ते ॥ २५७ ॥

बन्धस्य व्यावहारिकसत्त्वाङ्गीकारेऽपि नोक्तदोषनिस्तारः । त्रैकालिकनिषेधप्रतियोगित्वरूपबाधतादवस्थ्यात् । ब्रह्मज्ञानेन बाध इति तु वैषम्यमात्रम् । तत्र दृष्टान्तोक्तिः **राजेति** । क्षतिः केनापि वा भवतु मरणं समानमेवेति भावः । अत्र अभावमात्रे निदर्शनम् । न तु ध्वंसविवक्षेति ज्ञेयम् । **गतमेव** त्रैकालिकनिषेधप्रतियोगीत्यर्थः । तदुक्तं सुधायां 'बाधविलम्बस्त्वप्रयोजकः । अर्थतादवस्थ्यानिवृत्तेः' इति ॥ २५७ ॥

अतो बद्धोऽपरस्तस्मान्नित्यमुक्तोऽपि चापरः ।
इत्येव सर्वथा वाच्यमित्थं सूत्रकृदाह हि ॥ २५८ ॥

अतः बद्धमुक्तव्यवस्थानिर्वाहाय भेदस्यावश्यकत्वात् । नित्येति प्रकृतेश्वरापेक्षया । स्वोक्तस्य सूत्रारूढतामाचष्टे **इत्थमिति** । **आह** ॐस्थित्यदनाभ्यामिति सूत्रे इति शेषः ॥ २५८ ॥

आवयोश्च मतौ द्वौ स्थित्यदनाभ्यामितीरितौ ॥ २५९ ॥

द्वौ ईशजीवौ । यथोक्तं श्रीभाष्ये 'ईशजीवयोः स्थित्यदनोक्तिरि'ति ॥ २५९ ॥

गुहां प्रविष्टावात्मानौ हि तद्दर्शनतस्त्विति ।
सूत्रं व्याकुर्वतो जीवपरौ द्वौ हृदि ते मते ॥ २६० ॥

जीवेशपरत्वेन उभयसंप्रतिपन्नं सूत्रमुक्त्वा पराभ्युपगतं सूत्रमुदाहरति **गुहामिति । ते मते इति ॥** स्वमते तु नैवम् । यथोक्तं 'गुहां प्रविष्टौ पिबन्तौ विष्णुरूपे एवे'ति ॥ २६० ॥

सत्वं रजस्तम इति गुणा जीवस्य नैव मे ।
इति त्रिगुणशून्यत्वं स्वस्योक्त्वा हरिरंजसा ।
स्वाधीनगुणतो बन्धो जीवस्यैवेति शंसति ॥ २६१ ॥

यदि तर्हि बद्धमुक्तौ जीवेशौ भिन्नौ कथं भागवते श्रीकृष्णः 'बद्धो मुक्त इति व्याख्या गुणतो मे न वस्तुतः' इति स्वस्यैवैकस्य बद्ध इति मुक्त इति च आख्याद्वयमाहेति शङ्कां परिहरति सत्त्वमित्यादिना, न मिथ्यात्वमिति स्थितमित्यन्तेन (श्लो ३०९) अत्र गुणशब्देन बन्धकाः प्रकृतिगुणा एव विवक्षिताः पूर्वं तेषामेव प्रकृतत्वात्, 'गुणाः प्रकृतिसंभवाः । निबध्नन्ति महाबाहो देहे देहिनमव्ययमि'ति तेषामेव बन्धकत्वेन स्मृतौ प्रमितत्वाच्चेति भावेन पूर्वश्लोकमुदाहरति **सत्त्वमिति ॥ गुणाः** बन्धापादका इति शेषः । **जीवस्य** संसारिणः । **मे नैव** मम कदापि बन्धकतया न स्थिताः । उपयुक्तमुक्त्वा बद्धो मुक्त इति श्लोकस्य तदनुगुणमर्थमाह **स्वाधीनेति** । तेन मे इत्यत्र षष्ठी तदधीनत्वार्थक इति ज्ञापयति । 'सन्ति च एकशतं षष्ठ्यर्थाः । ते च स्वस्वामिभावादय' इति कैयटोक्तेः ॥ **अञ्जसेत्येवकारार्थः** । तेन 'नैव मे' इति बन्धात्यन्ताभावार्थः स्फोर्यते ॥ २६१ ॥

बद्धो मुक्त इति व्याख्या गुणतो मे न वस्तुतः ।
गुणस्य मायामूलत्वान्न मे (बन्धो न मोक्षणं)
मोक्षो न बन्धनम् ॥ २६२ ॥

मदधीनगुणाज्जीवे बद्धाख्या न स्वभावतः ।
इति पूर्वार्धवाक्यार्थो मे धनाज्जीवतीतिवत् ॥ २६३ ॥

न वस्तुतः न स्वभावतः । जीवस्यापि भगवदधीनप्रकृतिगुणासादितो बन्धः न स्वाभाविकः । येन तन्निवृत्त्यनुपपत्तिः । किं नाम प्रामादिकः । 'प्रमादं वै मृत्युमहं ब्रवीमि तथाऽप्रमादादमृतत्वं ब्रवीमि' इति भारतोक्तेः । बन्धध्वंसोऽपि आगन्तुकत्वान्न स्वभावः । स्वस्वामिभावार्थे षष्ठीप्रयोगं निदर्शयति **मे धनादिति** ॥ २६२ ॥ २६३ ॥

स्वस्यैव गुणतो बन्ध इत्यर्थस्तूक्तवाक्यतः ।
उत्तरार्धोत्तरश्लोकपर्यालोचनया च न ॥ २६४ ॥

परोक्तस्यार्थस्य कृष्णस्यैव बन्ध इत्यस्यान्तरङ्गविरोधानाह ॥ **उक्तवाक्यत इति** । 'नैव मे' इत्युक्तवाक्यात् । **उत्तरार्धेति** । 'गुणस्य मायामूलत्वादि'त्याद्युत्तरार्धेत्यर्थः । **उत्तरश्लोकेति** । 'एकस्यैवे'त्याद्युत्तरश्लोकेत्यर्थः । ॥ २६४ ॥

मायामूलगुणाभावान्न मे मोक्षो न बन्धनम् ।
इत्युत्तरार्धं यत्कृष्णस्स्वस्य बन्धं निषेधति ॥ २६५ ॥

उत्तरार्धविरोधं परस्य विविनक्ति । **मायेति** । 'मायां तु प्रकृतिं विद्यात्' इति श्रुत्या प्रकृतीत्यर्थः । तन्मूलत्वात् तदुपादानकत्वात् । **मे** प्रकृतिनियामकस्य प्रकृतिबन्धनिरसनसमर्थस्य मम । **बन्धः न** 'गुणेभ्यश्च परं वेत्ती'ति गीतोक्तेः । अत एव **न मोक्षः** न बन्धध्वंसः बन्धात्यन्ताभाववत्त्वात् ॥ २६५ ॥

सखायौ द्वौ सुपर्णौ च देहनीडकृतास्पदौ ।
खादत्येकः पिप्पलान्नं निरन्नोऽप्यन्य ईश्वरः ॥ २७० ॥

बलेन भूयान्स विभुर्नित्यमुक्तस्ततोऽपरः ।
जीवो बद्धोऽविद्ययान्धः पूर्वो विद्यामयः किल ॥ २७१ ॥

इति पूर्वोक्तमेवार्थं स्पष्टमाह पुनः प्रभुः ।
अतः पूर्वोक्तवाक्यार्थोऽप्यस्मदुक्तो न चापरः ॥ २७२ ॥

एतावता जीवस्यैव बन्धमोक्षौ । तौ च पारमार्थिकौ । हरिस्तु नित्यमुक्तोऽन्य एवेति समर्थितम् । न वस्तुत इत्यस्य न स्वभावत इत्यर्थः । मायामूलत्वादित्यस्य प्रकृत्युपादानकत्वादिति चार्थः सन्दर्भशुद्ध्या समर्थितः । एतेन यदुक्तं गौडपादकारिकायां 'न बद्धो न च साधकः ॥ न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता' इति बद्धत्वमुक्तयोरपारमार्थिकत्वं तदपहसितं वेदितव्यम् । अपारमार्थिकत्वे तस्य सर्वान्प्रत्यविशिष्टत्वेन 'एकस्यैव जीवस्य' इति 'मे नैवेति' च विभागेन कथनानुपपत्तेः । उभयोरपि मायिकत्वे 'बन्धोऽस्याविद्ययाऽनादिर्विद्यया च तथेतरः' इति तयोः विद्याऽविद्याहेतुकत्ववर्णनासङ्गतेः । बन्धस्य मिथ्यात्वे बद्ध इत्याख्याया एवासंभवाच्च । न हि शुक्तिरूप्यस्य रूप्यं आख्येति कोऽपि स्वस्थात्माऽभिदधीत । एवं अन्तरङ्गविरोधैरेवापास्तमपि परोक्तमर्थं बहिरङ्गविरोधैरपि प्रत्याख्यातुं, द्वासुपर्णेति श्रुत्युपबृंहणपरौ उत्तरौ भागवतश्लोकावर्थतोऽनुवदति द्वाभ्यां **सखायाविति** । 'सुपर्णावेतौ सयुजौ सखायौ यदृच्छया कृतनीडौ च वृक्षे । एकस्तयोः खादति पिप्पलान्नमन्यो निरन्योऽपि बलेन भूयान् ॥ आत्मानमन्यं च स वेदविद्वानपिप्पलादो न तु पिप्पलादः । योऽविद्ययान्धः स तु नित्यबद्धो विद्यामयो यः स तु नित्यमुक्तः' ॥ इति श्लोकावत्र व्याचिख्यासितौ । चराचरात्तुरन्नमयस्यापि निरन्नत्वं शुभैकात्तृत्वात् अदनात्प्राप्यप्रयोजनाभावात् अदने पारवश्याभावाच्चेति पूर्वमुक्तम् । मुक्तस्य

एकस्यैव ममांशस्य जीवस्यैवं महामते ।
बन्धोस्याऽविद्ययानादिर्विद्यया च तथेतरः ॥ २६६ ॥

स्वभिन्नांशस्य जीवाख्यखगस्यैकस्य केवलम् ।
बन्धश्च बन्धान्मोक्षश्च न स्वस्येत्याह स प्रभुः ॥ २६७ ॥

उत्तरश्लोकमुदाहृत्य तदर्थवर्णनपूर्वकं तद्विरोधं परस्य समर्थयते **एकस्येति** । अंशस्येत्यस्य भिन्नांशस्येत्यर्थः । 'ममैवांशो जीवलोके जीवभूतः सनातनः' इति गीतोक्तिः । तत्र परेणापि भिन्नांश इत्येव व्याख्यानात् । तथा भामत्यामपि 'ब्रह्मांश इव तन्त्रतया न त्वंश इति तात्पर्यार्थ' इति विवृतेः । स्वरूपांशस्येत्यर्थस्तु अशक्यशङ्कः । अत्रैव एवशब्देन जीव एवेत्यवधारणात् । तेन न पुनः स्वरूपांशस्य कृष्णस्येत्यर्थलाभात् । **जीवाख्य-खगस्येति** । तेन मूले जीवस्येति समुदायैकवचनं, अन्यतरसुपर्णत्वेनैकीकरणादिति भावः ज्ञाप्यते । इतर इत्यस्यार्थकथनं बन्धान्मोक्षः इति ॥ बन्धध्वंस इति हृदयम् ॥ २६६ ॥ २६७ ॥

एवमित्यनुवादेन यथा जीवस्य बद्धता ।
पूर्वश्लोकेऽपि भवति तथैवार्थं वदेद्बुधः ॥ २६८ ॥

मूले एवमित्यनेन बोधितमर्थं विशदयति **एवमितीति** । **पूर्वश्लोके** बद्धो मुक्त इति पूर्वश्लोके । **तथैव** जीवस्यैव बद्धमुक्ताख्ये यथा भवतस्तथैव । अत्रत्यजीवस्येति पदस्य तत्राप्याकर्षणेनेति भावः ॥ २६८ ॥

अतो जीवस्य बद्धत्वं मुक्तत्वं च परात्मनः ।
नित्यमुक्तत्वमेवेति पद्यद्वन्द्वेन सिद्ध्यति ॥ २६९ ॥

एकस्यैवेति श्लोके जीवस्येति स्पष्टं कथनात् गुणा **जीवस्य इति** **अभ्यासात् जीवस्य** बद्धत्वं, बन्धान्मुक्तत्वं च सिद्ध्यति । **एवं 'न मे मोक्षो न बन्धनं' 'नैव मे'** इति बन्धस्य सर्वथा निषेधे परमात्मनो **नित्यमुक्तत्वं** च सिद्ध्यति । एतदाह पद्यद्वन्द्वेनेति ॥ २६९ ॥

सुपर्णजीवस्य स्वरूपदेहनीडे स्थितत्वं विशेषबलेन । भोगार्थं कदाचिदचिद्देह-ग्रहणे तदास्पदत्वेन वा । संसारिणस्तु स्पष्टम् । ईश्वरः नित्यमुक्त इति योजना । अन्यः अन्यमिति च श्रुत्या विरुद्धधर्माधिकरणत्वोपपत्त्या च सतात्पर्यं भेदबोधकत्वात्स्पष्टमित्युक्तम् । **अपरः** गौडपादादिपरोक्तः ॥२७०॥ ॥ २७१ ॥ २७२ ॥

नित्यमुक्तो नित्यबद्ध एक एवेति मे मतिः ।
इत्थं बद्धस्य मुक्तस्य चैक्यशङ्काकृदुद्धवम् ॥ २७३ ॥
मुहुः प्रबोधयन्कृष्णः कथं वक्ति तदेकताम् ।
अतस्सिद्धान्तपद्येऽस्मिन्द्वितामेव वदेत्कृती ॥ २७४ ॥

आस्तां सूक्ष्मेक्षिकया विमर्शः । उद्धवकृतः 'एक एवे'ति पूर्वपक्ष एव भिन्नावेव जीवेशौ इति तद्व्यावर्तकं सिद्धान्तं गमयतीत्याह **नित्येति** । **द्वितां** भेदम् । **कृती** कुशलः । नहि पूर्वपक्षमेव सिद्धान्ततया कोऽपि कुशल आचष्ट इति भावः ॥ २७३ ॥ २७४ ॥

एतावित्यतिदेशेन पूर्वं च प्रस्तुतिर्द्वयोः ।
अबद्धबद्धयोर्वाच्या तच्छोच्या कृष्ण(बन्ध)बद्धवाक् ॥ २७५ ॥

एतौ इत्यादिश्लोकद्वये नित्यबद्धनित्यमुक्तावुच्येते इति तावद-विवादम् । 'योऽविद्ययान्धः स तु नित्यबद्धो विद्यामयो यः स तु नित्यमुक्त' इति विविच्य सुस्पष्टं तयोः कथनात् । एताविति च सर्वनामशब्दः प्रकृतपरामर्शकः । अतो द्वयोरपि पूर्वं प्रस्तुतिर्वाच्या । यदि परोक्तप्रकारेण कृष्णस्यैकस्यैव बद्धत्वं मुक्तत्वं चेत्यर्थो 'बद्धो मुक्त इति व्याख्या' इति पूर्व-त्रोक्तो भवेत् तर्हि तस्यैतयोरिति द्विवचनान्तेन पदेन परामर्शो न श्लिष्येत् । **तत्** तस्मात् । **कृष्णबद्धवाक्** कृष्णस्य बद्धत्ववर्णनपरा परापव्याख्या । **शोच्या** । तमोहेतुत्वेन तिरस्कार्या ॥ २७५ ॥

द्वयोरेकस्येति चार्थस्सुस्थोऽभूत्तत एव मे ।
भिन्नांशता च तद्भेदस्यान्ते(ते) स्वेनैव कीर्तनात् ॥ २७६ ॥

एतेनैव विरुद्धश्लोकद्वयेन प्रागुक्तं सर्वमपि प्रमेयजातं संवादेन दृढीकृतमित्याहाष्टभिः **द्वयोरित्यादिना** । **तत एवेति** ॥ 'सुपर्णावेतौ' इति द्वौ प्रकृत्य 'एकस्तयोरि'ति जीवस्योक्त्या प्रागेकस्यैव ममांशस्येत्युक्तोऽपि द्वयमध्ये एको जीव एवेत्यर्थः सुस्थोऽभूदित्यर्थः । **भिन्नांशता इति** चार्थः, सुस्थोऽभूदिति पूर्वेणान्वयः । **अन्ते** 'वैलक्षण्यं वदामि ते' 'अन्यो निरन्नोऽपि' इत्यत्र । **स्वेनैव कीर्तनात् इति** । तेन 'ममांशस्ये'ति प्रागुक्तांशपदं भिन्नांशपरमित्यत्र नास्माकमुपपादनक्लेश इति भावः ॥ २७६ ॥

अत्रोक्तो नित्यमुक्तश्च न मे मोक्षो न बन्धनम् ।
इत्याह यः पुरा युक्त्या स एव स्यान्न संशयः ॥ २७७ ॥

अत्र 'विद्यामयो यः स तु नित्यमुक्त' इत्यत्र । **यः** श्रीकृष्णः । **युक्त्या** गुणमूलमायाऽतीतत्वयुक्त्या । **इत्याह** बन्धतद्ध्वंसौ प्रतिषिध्य बन्धात्यन्ताभाववत्त्वं नित्यमुक्तत्वमाह । **स एव** । स इत्यावर्तते । यः आह **सः** श्रीकृष्णः एव । **सः** 'स तु नित्यमुक्त' इत्यत्रत्यतच्छब्दपरामर्शविषयः ॥ **न संशयः** अन्यथा स इति शब्दस्याप्रकृतपरामर्शकत्वापत्तेरित्याशयः ॥ २७७ ॥

बन्धस्य नित्यतोक्तिश्च तथा मुक्तेश्च नित्यता ।
पुरा परोक्तन्मिथ्याऽर्थत्वं युक्त्या न्यवारयत् ॥ २७८ ॥

नित्यतोक्तिः नित्यबद्ध इत्यनेन **नित्यता** नित्यमुक्त इत्यनेनोक्ता ॥ **तथे**त्युक्त्या यथेति लभ्यते । यथा मुक्तेर्नित्यताऽनुपचरिता तथा बन्धस्याप्यनुपचरिता नित्यतोक्तिरिति भावः । **पुरा** न वस्तुत इत्यत्र । परोक्तं तस्य बन्धस्य मिथ्यार्थत्वं मिथ्यात्वम् । **युक्त्या** । बन्धः त्रैकालिकनिषेधाप्रतियोगी,

अनादित्वे सति नित्यत्वात् ब्रह्मवत् इत्यनुमानेन । न विशेषणासिद्धिः बन्धोऽस्याविद्ययाऽनादिरिति पूर्ववाक्येन तत्सिद्धेः । यद्वा **तन्मिथ्यार्थत्वं** गौडपादोक्तं तयोर्बन्धमोक्षयोरुभयोर्मिथ्यात्वम् । **युक्त्या** बन्धमोक्षौ न मिथ्या नित्यत्वात् ब्रह्मवत् इति युक्त्या ॥ २७८ ॥

तत्रापि मुक्तेर्मिथ्यात्वं कथमर्थो भवेद्दृढ् ।
पदद्वयनिबद्धैकरज्ज्वा प्राप्तिर्द्वयोरपि ॥ २७९ ॥

किञ्च 'न वस्तुतः' इत्यस्य अपरमार्थत इत्यर्थः परेणापि नाश्रयितुमुचितः । तथा सति पूर्वोक्तबद्धमुक्ताख्ययोरुभयोरप्यपारमार्थिकत्वप्राप्तेः । बन्धवन्मोक्षस्यापि निवृत्त्युपगमे संसारस्य पुनरुत्थानप्रसङ्गेन शास्त्राणां निष्प्रयोजनत्वापत्तिः । न च वाच्यं 'न वस्तुतः' इति अपारमार्थिकत्वविधानं बद्ध इत्यनेनैव संबध्यते न मुक्त इत्यनेनेति । असंभवादित्याह **पदद्वयेति** । पूर्वमुभयोरुद्दिष्टत्वेन तयोरन्यतरपरित्यागस्यालौकिकत्वात् । निदर्शयति **निबद्धैकरज्ज्वेति** । आकर्षण इति शेषः । **द्वयोरपि** बद्धः मुक्त इति द्वयोरप्याख्ययोः । अन्यत्र पादयोः ॥ २७९ ॥

यादृच्छिकस्य पङ्कस्य क्षालनं च यदृच्छया ।
वस्तुस्वभावतो नेति मम त्वर्थो निराकुलः ॥ २८० ॥

ननु भवत्पक्षेऽपि समानो दोषः । 'न वस्तुत इत्यस्य अस्वाभाविक इत्यर्थः खलु भवदभिमतः । तस्य बन्धमात्रसंबन्धित्वसंभवेऽपि मोक्षसंबन्धासंभवात् । 'स्वरूपेण व्यवस्थितिः' इति मोक्षस्य स्वाभाविकत्वांगीकारात् इत्यत आह **यादृच्छिकस्येति** । सत्यमेवं । मोक्षे स्वरूपेणावस्थितिरिति । मोक्षस्तु बंधध्वंसरूपोऽयावदात्मभावित्वात् अस्वाभाविक इति । पङ्कसंबंधो यथा वस्त्रस्यास्वाभाविकस्तथा पङ्कक्षालनमपि कादाचित्कत्वादस्वाभाविकं इति **यथा** तथैवेत्याह **पङ्कस्येति** ॥ २८० ॥

यत्प्राङ्नैव म इत्याह तेन सोऽत्रास्तवं च तत् ।
स्वस्मिन्निषेधतीशाने स्वस्य जीवस्य चेत्यपि ॥ २८१ ॥

नेति ब्रवीति स्वानिष्टं जीवो मच्छक्तितोऽग्रहीत् ।
इति वक्तुं स पद्येस्मिन्प्राह मे गुणतस्त्विति ॥ २८२ ॥

'नैव मे' इति सावधारणनिषेधेन ईश्वरस्य स्वाभाविकोऽस्वाभाविको वा कोऽपि बन्धो नास्तीत्यवगम्यत इत्याह **यस्मादिति** । यत्किञ्चिद्विशेषसत्त्वेऽपि सामान्यनिषेधानुपपत्तेरिति भावः । ईशाने इति हेतुगर्भविशेषणम् । न हि बन्धस्य ईशः तद्वशश्चेति संभवति । व्याघातात् । यच्चोक्तं जीवबन्ध एवेशबन्धस्तयोरभेदादिति तदपि निराह **स्वस्य जीवस्य चेत्यपीति** । **नेति** ब्रवीतीत्युत्तरेणान्वयः । भेदस्यात्र सोपपत्तिकं व्यवस्थापनादिति ध्येयम् ॥ जीवः स्वानिष्टं प्रकृतिबन्धं मम परमचेतनस्य शक्तितः अग्रहीत् इति वाक्यान्तरं । तेन चेतनस्य स्वप्रकाशस्य सतो जीवस्यापि कथमचेतनात् स्वतःप्रवृत्तिविधुरात् प्रकृतिबन्धादनिष्टमिति चोद्यं निरस्तम् । मे गुणतः इत्यस्य मदधीनगुणत इत्यर्थत्वेन परमचेतनस्य स्वतन्त्रस्याचिन्त्यशक्त्योपोद्बलितशक्तिकत्वेन तदुपपत्तेः । तदुक्तं 'दैवी ह्येषा गुणमयी'ति ॥ 'स्वभावाज्ञानवादस्य निर्दोषत्वान्न तद्भवेत्' इति च ॥ २८१ ॥ २८२ ॥

तेनैव वक्ति स्वाधीनमनिष्टं स्वस्य नेत्यपि ।
मोहं चासुरजीवानां संमुग्धोक्त्याऽकरोत्प्रभुः ॥ २८३ ॥

तेनैव 'नैव मे' इत्युक्तबन्धात्यन्ताभावोऽपि स्वस्य प्राक् प्रतिज्ञातः समर्थित इत्याह **तेनैवेति** । **सम्मुग्धोक्त्या** मदधीनगुणतः इति स्पष्टोक्तिं विना मे इति संबन्धसामान्यवाचकषष्ठ्युक्त्या । उक्तेः संमुग्धत्वं नाम, षष्ठ्याः न स्वातन्त्र्यरूपसंबन्धोऽर्थः किं त्वाश्रितत्वमेवेत्येवंरूपमोहजनकत्वम् । ॥ २८३ ॥

स्वातन्त्र्यगुणतो बद्धाद्याख्यां व्याख्यान्ति मे बुधाः ।
बन्धादिवस्तुतस्तत्तन्नाम बन्धोज्झितस्य मे ।
नेति विद्वत्प्रसिद्धिं च सूचयन्शंसति प्रभुः ॥ २८४ ॥

एवं तर्हि सतामपि मोहः संपत्स्यते इति तत्राह **स्वातन्त्र्येति ॥ व्याख्यान्ति** बन्धोऽस्यास्तीति बद्धः इति हि तच्छब्दनिरुक्तिः । अस्य इत्यत्र षष्ठी गुणान्प्रति स्वातन्त्र्यमेव वक्ति न तु पुनस्तद्गतत्वं इत्येवमिति भावः । **बुधाः** 'स्वातन्त्र्यं तद्गतत्वं च शब्दवृत्तेर्हि कारणम् । स्वातन्त्र्यं तत्र मुख्यं स्यात्' इति वृत्तितारतम्यज्ञानिनः । **बन्धादिवस्तुत** इत्येकं पदम् । बन्धाद्याश्रयतयेत्यर्थः । आदिपदेन दुःखादिकं ग्राह्यम् । **तत्तन्नाम** बद्धः दुःखी इत्यादिनाम । विदुषां तदधीनत्वादर्थवदिति नय-तात्पर्यज्ञानां । **प्रसिद्धिं** 'सा योगादेव लभ्यते' इत्युक्तप्रयोगबाहुल्यम् । अनेन मूले 'गुणत' इत्यत्रत्यगुणपदं स्वातन्त्र्यगुणपरं इत्युक्तं भवति ॥ २८४ ॥

आख्यापदस्य चाख्यानमेवं सत्येव शोभते ।
मोक्षो बन्धनमित्येव नो चेदूचे कुतोऽन्ततः ॥ २८५ ॥

एवं सति स्वातन्त्र्यं निमित्तीकृत्य पदप्रवृत्तिवर्णने सति । **नो चेत्** एतदभिप्रायाभावे ॥ २८५ ॥

अस्वतन्त्रस्य जीवस्य बद्धाद्याख्या तु वस्तुतः ।
इति सूचयता चात्र मुक्तामुक्तद्वितोदिता ॥ २८६ ॥

सूचयता वस्तुतः आधारत्वनिमित्तेन मे नेति विशिष्य निषेधेन शेषविध्यनुज्ञापकन्यायेन अस्वतन्त्रस्य जीवस्य तेनैव निमित्तेन बद्धपद-प्रवृत्तिविषयत्वं इति ज्ञापयता । **मुक्तामुक्तद्विता** नित्यमुक्तस्येशस्य नित्य-बद्धस्य जीवस्य च भेदः ॥ **उदिता** ज्ञापिता ॥ २८६ ॥

मायाया अपि मूलं मे स्वातन्त्र्याख्यगुणो यतः ।
अतो मायामयो बन्धस्तद्ध्वंसो वा कथं मम ।
इति तत्रैव हेतुं च व्यनक्तीति मतिर्मम ॥ २८७ ॥

'गुणस्य मायामूलत्वात्' इत्येतत् बन्धकानां सत्वादिगुणानां प्रकृत्युपादानकत्वादित्यर्थतया पूर्वं व्याख्यातं । इदानीं मायाया मूलं इति तत्पुरुषाश्रयणेन रीत्यन्तरेण व्याख्याति । मम **स्वातन्त्र्यगुणस्य प्रकृति-**नियामकत्वात् तन्निमित्तको बन्धो नास्ति प्रतियोग्यभावात्तज्जन्यध्वंसोऽपि नास्तीति ॥ २८७ ॥

स्वस्यैव नित्यमुक्तत्वं वक्ष्यन्नादौ श्रुतीरिताम् ।
बद्धाद्याख्यामात्मनीत्थमन्वर्थामकरोद्ध्रुवम् ॥ २८८ ॥

नित्यमुक्तत्वमेवेति योजना । न तु कदाचिज्जीववद् **बद्धत्वमपि** । **येन** **'स बद्ध'** इति श्रुत्युक्तं परस्य **बद्धत्वं** तत्कालीनबन्धाश्रयत्वेन **शक्योपपादनं** स्यादित्यर्थः । कथं तर्हि श्रौततत्पदनिर्वाहो **इत्या**वित्यत आह **इत्थमिति** । स्वातन्त्र्येण निमित्तेनेत्यर्थः । एतेनोत्तरत्र वक्ष्यमाणनित्यमुक्तत्वे बाधक-परिहारोऽपि स्वातन्त्र्यगुणत इति व्याख्यानेन कृतोऽवधेयः ॥ २८८ ॥

भ्रान्तत्वे दोषमूलत्वं वदेन्न गुणमूलताम् ।
बद्धाख्यां गुणतश्शंसंस्तद्धियं तु गुणोद्भवाम् ।
अभिप्रैति न दोषोत्थां गुणजन्या च धीः प्रमा ॥ २८९ ॥

यद्वा मे श्रुत्युक्ता बद्ध इत्याख्या **गुणमूलत्वात्** दोषमूलत्वाभावादिति यावत् प्रमागम् । एवं तत एव तज्जन्या धीश्च प्रमा । यतः ज्ञानसाधनस्य प्रामाण्यं तज्जन्यज्ञानस्य प्रमात्वं न जातु व्यभिचरति । एतेन बन्धस्य बन्धनियामकत्वस्य च भ्रान्तिकल्पितत्वं परोक्तं परास्तम् । तथात्वे तज्ज्ञानस्य

भ्रमत्वं दोषजन्यत्वं च स्यात् न त्वेवात्रोक्त गुणमूलत्वमिति भावः । अत्र प्रमाया गुणजन्यत्वोक्तिस्ताकिंकरीत्या । गुणस्य क्वाचित्कस्यान्यथासिद्धस्य च न प्रमाजनकत्वमिति प्रागेवोपपादनात् ॥ २८९ ॥

इत्थं प्रमाया विषयः प्रमिनन्तीति च श्रुतौ ।
श्रुतो बन्धः कथं मिथ्या सत्त्वं हि ज्ञानदो गुणः ॥ २९० ॥
सात्विकाश्च सुरर्ष्याद्यास्तद्बन्धो न भ्रमोद्भवः ।
एवं च तद्वद्दुःखात्मा बन्धोऽन्यत्र कथं भ्रमः ॥ २९१ ॥

इत्थं प्रमायाः । नित्यनिर्दोषसाक्षिरूपायाः दुःखादिबन्धविषयिण्याः प्रमायाः विषयः । इत्थं **श्रुतौ** नित्यनिर्दोषायां श्रुतौ । इत्थं निरवकाशतया । **श्रुतः** प्रतिपादितः । **प्रमिनन्तीति** । अनेन 'विश्वं सत्यं मघवाना युवोरिदापश्चन प्रमिनन्ति व्रतं वां' इति श्रुतिं संगृह्णाति । **कथं मिथ्येति** । निर्दोषश्रुतिसाक्षिभ्यां प्रमितेरिति भावः । अबभिमानिदेवतोपलक्षित-सात्त्विकसुरर्ष्यादिज्ञानविषयत्वाद्बन्धः सत्य इत्युक्तम् । तदुपपादनपरतयाऽपि गुणत इति वाक्यं योजयति **सत्त्वमिति** । अत्र गुणशब्देन सत्त्वगुण एव ग्राह्यः । तस्यैव त्रिषु प्रधानत्वेन प्रथमोपस्थितेः । तदुक्तं भागवते 'तमसस्तु रजस्तस्मात्सत्त्वं यद्ब्रह्मदर्शनमि'ति ॥ सत्त्वगुणस्य यथार्थज्ञानजनकत्वं तु 'सत्त्वं यद्ब्रह्मदर्शनमि'त्युदाहृतप्रमाणेन सिद्धम् । सुरर्ष्यादिकाः सुरर्षाद्याः सत्त्वगुणप्रचुरा इति च सुप्रसिद्धम् । अतः बन्धः, न भ्रमोद्भवः, न भ्रान्तिविषय इति यावत् । सात्त्विकदेवताज्ञानविषयत्वात् ब्रह्मवत् इत्यनुमानेऽत्राभिप्रेते नासिद्धिर्नाप्यप्रयोजकतेति भावः ॥ ज्ञानानामुत्सर्गत एव प्रामाण्यम् । सात्त्विकदेवतासंबन्धिताविशेषणं तु अपवादाभाव-ज्ञापनायैव । तेनासुरसाक्षिविषयस्यापि दुःखादिबन्धज्ञानस्य धर्म्यंशे प्रमात्वं, अयाथार्थ्यं तु तदनिर्वचनीयत्वादिप्रकारांश एवेत्याह **एवं चेति** । तद्वत् उत्पत्तौ धर्म्यंशे दोषाभावात्, ज्ञप्तौ बाधकाभावादेव च ॥ २९० ॥ २९१ ॥

प्रमातारोऽपि बन्धस्य प्रमिन्वन्ति न ते हरिम् ।
अतो ह्यविद्यया बन्ध इत्युक्तं न मृषात्वतः ।
इत्थं भागवते प्रोक्तं कृष्णेनैवोद्धवं प्रति ॥ २९२ ॥

प्रमातारः अपि । बन्धरूपधर्म्यंशे यथार्थज्ञानवन्तोऽपि ते आसुर-साक्षिणः । **हरिं न प्रमिन्वन्ति** बन्धनियामकत्वादिना न जानन्ति । नञो विरोधोऽप्यर्थः । वैपरीत्येन नैर्गुण्येन जानन्ति । अतः तेषां स्वरूपज्ञान-स्यायाथार्थ्यनियमो न विरुध्यते । **अतो हीति ।** बन्धं प्रति अज्ञान-विपर्यययोर्निमित्तत्वादेवेत्यर्थः । **मृषात्वतः ।** अविद्योपादानकत्वरूप-मिथ्यात्वतः । कृष्णेनेति वक्तुः, उद्धवमिति श्रोतुः, प्रोक्तमित्यत्रत्यप्रेत्युपसर्गेण प्रसङ्गस्य चानुकूल्यान्युक्तानि । इत्थमित्यनेनास्य श्लोकस्य बहुतराभिप्रायान्तर-गर्भितत्वं द्योत्यते । तथा हि । निर्मायस्य मे उत्तमाधमजीवयोरिव प्रकृति-गुणतो वा मध्यमजीवस्येव वस्तुतः स्वभावगुणेन वा बन्धमोक्षौ न । यद्वा आनन्दादिगुणानाममायिकत्वान्मे न बन्धः । दुर्जनैरारोपितदुःखा-दिदुर्गुणानां मायामूलत्वात् भ्रान्तिमूलत्वात् न बन्धः । अथवा आनन्दादिगुणतः मुक्त इत्याख्या न, तेषां मत्स्वरूपत्वात् । यद्वा दुःखादिदुर्गुणतः मुक्तः तत्प्रध्वंसवान् इत्याख्या न । मम नित्य-मुक्तत्वात् । यद्वा दुःखादिदुर्गुणतो वा, गुणभूतादप्रधानात् वस्तुतः परमार्थात्प्रपञ्चाद्वा मुक्तः तेषु स्थितिरहित इत्याख्या न । सर्वव्यापित्वात् । तत्र स्थितावपि गुणतः सार्वज्ञसर्वशक्तिस्वातन्त्र्याख्यगुणतः बद्ध इत्याख्या लेपो नैव । आरोपितस्तु लेपादिदुर्गुणः परेषां मायामूलः भ्रान्ति-मूल इत्युक्तम् । गुणस्य अप्रधानस्य जीवस्य तु मायामूलत्वात् प्रकृति-बद्धत्वाद्बन्धमोक्षौ । अथवा ज्ञानानन्दादिगुणतः वैकुण्ठादिवस्तुतो वा तेषां मायाऽमूलत्वात् अप्राकृतत्वान्मम न बन्धः । प्रकृतेर्हि बन्धः । अहं तु 'पुरुषः प्रकृतेः परः' इति प्रकृतेरतिदूर इति भावः । गुणस्य अप्रधानस्य

सात्त्विकजीवस्य तु मायामूलत्वात् मूले आदौ प्रकृतिसंबन्धात् पश्चात्तद्ध्वंसाच्च बन्धमोक्षौ संभवतः। मुक्तस्याप्युत्तमजीवस्य यदा नित्यमुक्तेन मया नैक्यं किमु तदा मुक्त्ययोग्यमध्यमाधमजीवजातस्य तत्प्रत्याशेति हृदयम् ॥ २९२ ॥

अजोऽनुबद्धस्सगुणैर्न वेद त्वां गुणात्परम् ॥ २९३ ॥

अत्रैवार्थेऽक्रूरस्तुतिरूपश्लोकत्रयं भागवतदशमस्कन्धस्थं संगृह्णाति **अज इत्यादिना त्रिभिः**। **अजः** चतुर्मुखः। अत्र चतुर्मुखस्य गुणानुबद्धत्वोक्त्या कैमुत्येन सर्वजीवानां तथात्वं, कृष्णस्य गुणात्परत्वलक्षणनित्यमुक्तत्वं स्पष्टम् ॥ २९३ ॥

सत्त्वं रजस्तम इति भवन्ति प्रकृतेर्गुणाः।
एषु हि प्राकृताः प्रोक्ता आब्रह्मस्थावरादयः॥ २९४ ॥

भगवन् जीवलोकोऽयं मोहितस्तव मायया।
अहं ममेत्यसद्ग्राहो भ्राम्यते कर्मवर्त्मसु ॥ २९५ ॥

सत्त्वं इति श्लोके सर्वेषां जीवानां प्रकृतिबद्धत्वं भगवन्निति श्लोके तदभ्यासेन तत्तात्पर्यं चावगम्यते। अर्थात् स्तुतिबलेन समाख्यया च कृष्णस्य तदत्यंताभावश्च ॥ २९४ ॥ २९५ ॥

इत्यक्रूरेण निर्णीतः कृष्णो बन्धोज्झितः प्रभुः।
जीवान्सर्वान्गुणैर्बद्धान्मायाबद्धांश्च संमता ॥ २९६ ॥

निर्णीतः। सर्वजीवानां बन्धं प्रति कृष्णस्य स्वातंत्र्योक्त्या स्वयं गुणात्परत्वोक्त्या च। **मायाबद्धान्** भगवदिच्छया प्रकृत्या च बद्धान् ॥ २९६ ॥

मायामयोऽयं गुणसंप्रवाहस्ते न विद्यते ।
इति शक्रेण कथितं कृष्णं प्रत्येव सादरम् ॥ २९७ ॥

'मायामयोऽयं गुणसंप्रवाहो न विद्यते तेऽग्रहणानुबन्धः' इति श्लोकोत्र संगृहीतः । **गुणसंप्रवाहः** तन्निमित्तको लेपः । **अग्रहणानुबन्धः** भगवदपरोक्षाभावनिमित्तकः । 'एवंविदि पापं कर्म न श्लिष्यत' इति तदधिगमनये ज्ञानिनो लेपाभावोक्तेः । परमात्मा तु सर्वज्ञः स्वविषयकनित्यापरोक्षवान् इति कथं तस्य लेपसंभावनाऽपीति भावः । तदुक्तं भाष्ये 'सर्वज्ञाल्पज्ञताभेदादि'त्यादि ॥ २९७ ॥

प्रागुक्तवाक्यतोऽपि द्वौ मुक्तामुक्तौ प्रसाधितौ ॥ २९८ ॥

प्रागुक्तेति । सुपर्णावितावित्यादिवाक्येत्यर्थः । मुक्तामुक्तौ । नित्यमुक्त-नित्यबद्धौ । **प्रसाधितौ** सोपपत्तिकं समर्थितौ ॥ २९८ ॥

न च मां तानि कर्माणि निबध्नन्ति धनंजय ।
उदासीनवदासीनमसक्तं तेषु कर्मसु ॥ २९९ ॥

उक्तार्थे गीतावाक्यमपि प्रमाणयति **न चेति** । **तानि** 'वर्त एव च कर्मणि' इत्युक्तदिशा मया नित्यं क्रियमाणानि । **न निबध्नन्ति ।** न लिम्पन्ति । 'नानवाप्तमवाप्तव्यं' इत्युक्त्या स्वप्रयोजनसाधकानि न भवन्ति । क्रियासातत्ये लट् । तेन नित्यमुक्तत्वसिद्धिः ॥ २९९ ॥

सत्वं रजस्तम इति गुणाः प्रकृतिसंभवाः ।
निबध्नंति महाबाहो देहे देहिनमव्ययम् ॥ ३०० ॥

देहिनं स्वभिन्नप्राकृतदेहसम्बन्धवन्तम् । परमात्मा त्वतथाभूत इति न तस्य बन्धः ॥ ३०० ॥

इति कृष्णेन गीतायां कर्माबद्धत्वमात्मनः ।
जीवानां गुणबद्धत्वं चोक्तं वाक्यद्वयेन हि ॥ ३०१ ॥

फलितमाह **इतीति** ॥ ३०१ ॥

सोऽमृतस्याभयस्येशो मर्त्यमन्नं यदत्यगात् ।
परान्तकाले सर्वेऽपि विमुच्यंते परामृतात् ॥ ३०२ ॥

'स' इति भागवतवाक्यं 'उतामृतत्वस्येशानो यदन्नेनातिरोहती'ति श्रुतिविवरणपरं सोपपत्तिकं परमात्मनो मुक्ताधिपतित्वमाह । परमात्मा संसारबन्धमुक्तानामधिपतिः । संसारबन्धमोचकत्वात् । यो यद्बन्धविमोचकः स तद्बन्धविमुक्ताधिपतिः । यथा निगडबन्धविमोचको राजा निगडबन्धमुक्ताधिपतिः इति सामान्यव्याप्तिः । विपक्षे परमात्मनः प्रेक्षावत्त्वहानिरतिप्रसङ्गः । स्वाधीनबन्धाद्विमोचनं यदि स्वाधिपत्यप्रच्यावकं तर्हि प्रेक्षावान्न मोचयेदेवेति भावः । 'ते ब्रह्मलोके तु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे' इति श्रुत्यन्तरं परामृतपदेनैव नित्यमुक्तत्वं प्रतिपादयत्संगृह्णाति **परेति** ॥ ३०२ ॥

परामृतपदेनात्र नित्यमुक्तस्स्फुटोदितः ।
श्रुतयस्स्मृतयश्चैव मुक्तामुक्तद्वितां जगुः ॥ ३०३ ॥
तन्मुकुंदः परब्रह्म नित्यमुक्तत्वतः प्रभुः ।
मुक्ताश्च, नित्यमुक्ता न, नित्यमुक्तस्तदाऽपि राट् ॥ ३०४ ॥

द्वितामेव न तु परोक्तदिशा 'न वस्तुतः' इति श्लोके वाऽन्यत्र वा क्वाप्येकत्वमित्यर्थः ॥ ३०४ ॥

तत् तस्मात् । मुकुन्दाख्यो विष्णुरेव परब्रह्म नित्यमुक्तत्वात् व्यतिरेकेण बद्धवत् । न च मुक्तजीवे व्यभिचारः शङ्क्यः, तत्र हेतोरेवाभावात् इत्याह **मुक्ताश्चेति** ॥ ३०४ ॥

तदधीनत्वबंधेन भक्तिबंधेन वा हरेः ।
मुक्तोऽपि बद्धो यत्तस्मान्नित्यबद्धोऽप्यसौ भवेत् ॥ ३०५ ॥

यद्वा बन्धस्त्रिविधः । संसारः, पारतन्त्र्यं, भक्तिश्चेति । तत्राद्यस्य मुक्ताभिमतजीवे अभावेऽपि अन्त्ययोरविकलत्वात् अत्र च बन्धसामान्याभावस्यैव हेतुत्वेन विवक्षणात्. तस्य च यत्किञ्चिद्विशेषसत्त्वेऽपि दुर्वचत्वात्तत्र मुक्तत्वमेव नास्ति दूरे नित्यमुक्तत्वमित्याह **तदिति** । एतेन श्रीतत्त्वे व्यभिचारोऽपि परास्तो वेदितव्यः । तत्रापि अंत्ययोः बन्धयोः नित्यसद्भावेन नित्यबद्धत्वस्यैव प्राप्त्या हेतोरेवाभावादित्याशयात् । एतदप्याह **असौ अपीति** । अक्षरपुरुषोऽपीत्यर्थः । नन्वेवं बन्धशब्देन भक्तिबन्धस्य विवक्षणे कृष्णे हेतोरसिद्धिरापन्ना । तस्यापि सज्जनकृतभक्तिबन्धनवशत्वात् । तदुक्तं ग्रन्थकृतैवान्यत्र 'कर्मन्दीश्वरभक्तिबन्धनवश' इति । मैवम् । स्वकर्तृकभक्तेरेवात्र बन्धशब्दार्थतया विवक्षणात् । न हि कृष्णस्य सर्वोत्तमस्य सास्तीति तात्पर्यम् ॥ ३०५ ॥

नित्यसंसारिसद्भावोऽप्यनेनैव प्रसिद्ध्यते ।
तदा यथाश्रुतो वाक्यस्यार्थस्स्वरसो भविष्यति ॥ ३०६ ॥

यद्वा बन्धशब्दः यथाश्रुतसंसारबन्धपर एव । नित्यबद्धशब्द एवं नित्यसंसारिसद्भावसाधनेनार्थवान् । हेतुस्तु स्वतो बन्धात्यन्ताभावाधिकरणत्वमिति न मुक्तजीवे न वा श्रीतत्त्वे व्यभिचार इति न कोऽपि दोषः । अत्यन्ताभावपदेन स्वतःपदेन च क्रमेण तयोर्व्यभिचारवारणादित्याशयः ॥ ३०६ ॥

एवं च नित्यमुक्तस्य नित्यबद्धस्य चैकता ।
कदा स्यात्तौ यतो धर्मौ विरुद्धौ सार्वकालिकौ ॥ ३०७ ॥
अतो मिथ्यात्वकथनेऽप्याशा देशान्तरं गता ।
ब्रह्मवद्वा मोक्षवद्वा यन्नित्यं तत्कथं मृषा ॥ ३०८ ॥

नित्यमुक्तस्य 'विद्यामयो यस्स तु नित्यमुक्त' इत्युक्तस्य परस्य। **नित्यबद्धस्य** 'योऽविद्ययाऽन्यः स तु नित्यबद्ध' इत्युक्तजीवस्य। **एकता** 'एक एवेति मे मतिः' इत्युद्भवेन पूर्वपक्षिता। **कदा स्यात्** न कदाऽपि। विरुद्धधर्माधिकरणयोर्दहनतुहिनयोरिव तदसंभवादिति भावः। विरुद्ध-धर्मयोर्निवृत्तौ उत्तरत्रैक्यं भविष्यतीत्यतोऽत्र प्रष्टव्य किं निवृत्तिशब्देन नाशोऽभिप्रेयते बाधो वेति। नाद्य इत्याह **सार्वकालिकौ इति**। इदं चाभ्युपेत्योक्तम्। पूर्वं भिन्नयोरुत्तरत्रापि कथमपि अभेदासंभवादेव। न हि भिन्नमभिन्नतां यातीति हि नियमः। अत एव न द्वितीय इत्याह **अत इति**॥ नाश एव नास्ति मिथ्यात्वं तु दूरे इति भावः॥ **देशान्तरं** शशविषाणादिकम्। तथा च प्रयोगः बन्धो, न मृषा, नित्यत्वात् ब्रह्मवत् मोक्षवद्वा इति॥ न मोक्षः साधनविकलः संसारस्य पुनरुत्थानप्रसङ्गात्। न वा साध्यविकलः शास्त्राणामानर्थक्यप्रसङ्गात्॥ ३०८॥

अनादिगुणसंबंधात्तेनौपाधिकतैव हि।
अवास्तवत्वं प्रागुक्तं न मिथ्यात्वमिति स्थितम्॥ ३०९॥

अनादिगुणसंबन्धात् 'यदस्माकमनादय' इति त्वदङ्गीकृतादनादि-भावरूपत्वहेतोः। सिद्धेनेति शेषः। **तेन** नित्यबद्ध इति कथितेन च नित्यत्वेन। बन्धस्य **प्रागुक्तं** 'न वस्तुतः' इत्यत्र निरूपितं अवास्तवत्वं **अनौपाधिकतैव** अस्वाभाविकत्वमेव। एवकारव्यवच्छेद्यमाह **न मिथ्यात्व-मिति**। इति **स्थितमिति** सार्वकालिकस्य ब्रह्मवद्बाधासंभवादिति भावः॥ ३०९॥

स्वयं दुःखी परस्यापि दुःखमाकांक्षते खलः।
ब्रह्म संसरतीत्युक्तमन्यथा केन हेतुना॥ ३१०॥

लोकनीत्याऽपि खलस्वभावं मायावादिनि सङ्गमयति **स्वयमिति**।

आकांक्षते इति । न तु तावता परस्य दुःखसिद्धिरिति भावः । **संसरति** जीवभावमाप्येति शेषः । यदाऽपरस्य संसारिण एकस्यापि स्वमात्रवृत्ति-दुःखाकांक्षा खलत्वहेतुस्तदा किमु वाच्यं नित्यमुक्तस्य परात्मनो युगपत्सकल-संसारिगतदुःखानुसंधानाकांक्षा सकलसंसार्यैक्यं ब्रुवतो मायावादिन इति भावः । **केन हेतुना** । आसुरस्वभावं विना । तदुक्तं गीतायां 'तान्विद्ध्यासुरनिश्चयानि'ति ॥ ३१० ॥

बद्धस्तु बद्ध एव स्याद्राज्ञो बद्धत्वकीर्तनात् ।
यथा मुकुंदबंधोक्त्या बंधनिर्बन्धभुग्जनः ॥ ३११ ॥

यथा **मुकुंदस्य** मोक्षप्रदत्वान्नित्यमुक्तस्य परमात्मनः संसारिजीवैक्य-कथनेन दुःखादि**बन्धोक्त्या जनः** ईश्वरोऽहमिति ब्रुवाण आसुरजनः । **बन्धनिर्बन्धभुक्** इह पुनरासुरयोनिप्राप्तिः अन्ते तमोरूपाधमगति-प्राप्तिरित्येवं अनर्थभाग्भवति, तथा लोकेऽपि **बद्धस्तु** निगडबद्धश्चोरादिरपि । असूयया यदि राजानं प्रति त्वमपि चोरो बद्ध एवेति ब्रूयात्तर्हि स तादृशः खलः **राज्ञो** निन्दया **बद्ध एव भवति** । आमरणं पूर्वतोऽपि कठिणतरबंधभाजनमेव भवतीति भावः । अत्र लोकनीतिव्युत्पादनाय मायावादिन एव दृष्टान्तीकर-णेन तस्य तमःप्राप्तेः सुप्रसिद्धतां द्योतयति । तदुक्तं गीतायां 'आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि । मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम्' इति ॥ ३११ ॥

यद्यबद्धस्स वै बद्धो नित्यमुक्तत्वगीर्वृथा ।
बन्धमिथ्यात्वतस्मा चेद्बद्धः को नाम सिद्ध्यति ॥ ३१२ ॥

सर्वथा मायावादे बद्धमुक्तव्यवस्था न संभवतीत्याह **यदीति** । अत्र विचारणीयं, बन्धः सत्यो मिथ्या वेति । आद्ये आह **अबद्धः सः इति** । नित्यमुक्तत्वेन प्रसिद्धः परः **बद्धो वै** जीवगतबन्धस्य सत्यत्वेन तदैक्य-

निमित्तेन बद्ध एव न कदाऽपि तस्य मुक्तत्वप्रत्याशा संसारिणां सदा सद्भावादिति भावः । तथाच **नित्यमुक्तत्ववर्गाः** शास्त्रे 'विद्यामयो यः स तु नित्यमुक्त' इति वाक् **वृथा** अप्रमाणं । **सा चेत्** तद्घटनाय सा गीः बन्धमिथ्यात्वपरा अंगीक्रियते चेत् । **बद्धः को नाम** सर्वोऽपि मुक्त एवेति प्राप्त्या 'योऽविद्ययान्धः स तु नित्यबद्धः' इत्युक्तो बद्धो न कोऽपीति भावः । उभयथा बद्धमुक्तव्यवस्थाऽनुपपत्तिरेवेति भावः ॥ ३१२ ॥

अनुत्तीर्णस्स्वयं पंकात्किमन्योत्तारको भवेत् ।
यदि बद्धं परं ब्रह्म कस्याद्बन्धस्य मोचकः ॥ ३१३ ॥

स्वयं यो यद्बन्धवशगः न स तस्मात्तदन्योत्तारकः यथा स्वयं पङ्कनिमग्नः पङ्कादिति सामान्यव्याप्यवष्टम्भतर्कबलेनापि परमात्मनो **नित्यमुक्तत्वं** साधयति **अनुत्तीर्ण इति** । भवति च बन्धान्मोचकः अतो नित्यमुक्त इति पर्यवसातव्यम् ॥ ३१३ ॥

दरिद्रदर्शनेन स्यान्नैव दारिद्र्यनाशनम् ।
धनिनोऽघृणिनो दूरादाराद्वा दर्शनेन किं ॥ ३१४ ॥
तस्माच्छुद्धस्स भगवानशुद्धं योग्यचेतनम् ।
श्रवणादियुतं भक्तं प्रीतश्शुद्धीकरिष्यति ।
इति वाच्यमतश्शुद्धौ सोऽपि शुद्धान्तरं भवेत् ॥ ३१५ ॥

यस्य कस्यचिद्दर्शनेन न मुक्तिः किं तु स्वयं मुक्तस्यैवेत्यत्र लौकिकदृष्टान्तमाह **दरिद्रेति** । तद्दाने तद्वत्त्वं प्रयोजकमिति भावः । **दरिद्रस्य** धनवत्त्वाभावेन धनदानेन न परदारिद्र्यनाशकत्वम् । एवं **तर्हि अप्रसन्नस्य धनिनो दर्शनेन किं** दारिद्र्यनाशनं नेत्याह **अघृणिन इति** ॥ अप्रसन्नस्येत्यर्थः । **आरादिति** समीपादित्यर्थः । 'आराद्दूरसमीपयोरि'त्यभिधानेऽपि **दूरादित्यस्य**

पृथग्ग्रहणात् । गुरुत्वं सामर्थ्यं वा अप्रयोजकम् । प्रसन्नतैव प्रयोजिकेति भावः । प्रसन्नस्य प्रभोर्दर्शनमेव फलप्रदमिति व्युत्पादितं लोकन्यायं प्रकृते सङ्गमयति । **तस्मादिति । शुद्धः** स्वयं नित्यमुक्तः । **भगवान्** मोचनसमर्थः । **अशुद्धं** प्रागस्वाभाविकबन्धयुतम् । **योग्यचेतनं** स्वभावतः मुक्तियोग्यम् । **श्रवणादियुतं भक्तं** जिज्ञासोत्थज्ञानजन्यपरमभक्तिशालिनं । **प्रीतः** परमप्रसन्नः **शुद्धीकरिष्यति** मोचयति । तदुक्तं भगवत्पादैः 'यथा दृष्ट्वा प्रसन्नः सन् राजा बन्धापनोदकृत् । एवं दृष्टः स भगवान् कुर्याद् बन्धविभेदनं' इति । **अतः** संसारदशायां भगवतो भिन्नत्वात् । **शुद्धौ अपि** मुक्तिदशायां **अपि । सः** जीवः । **शुद्धान्तरं** नित्यशुद्धात्परात्मनः विलक्षणः **भवेत्** अवतिष्ठते ॥ 'प्रागवस्थायां येन भेदेन विशिष्टस्तेनैव मोक्षेऽपी'ति वादावल्युक्तेः **॥ ३१४ ॥ ३१५** ॥

यद्वन्य एव मलिनः पटो धौतपटांतरात् ।
स धावनेऽपि धौतोऽन्यः पटस्स्यात्क्वाभिदा तयोः ॥ ३१६ ॥

अत्रार्थे प्रत्यक्षं दृष्टान्तमाह **यद्वन्य इति** । अस्य पटस्य मालिन्यावस्थायां शुद्धपटान्तराद्व्रियमाणो भेदः शुद्धीकरणानन्तरमप्यनुवर्तत एव ॥ ३१६ ॥

अतस्साधर्म्यमेवाह मुक्तानां हरिरात्मना ।
पेटीस्थानेकपटवत्सायुज्यमपि युक्तता ॥ ३१७ ॥

निगमयति **अत इति । आह** गीतायाम् । 'मम साधर्म्यमागताः । सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति चे'ति जननमरणादिदुःखाभावमात्रेण सादृश्यमित्यर्थः । तथा हि श्रुतिः 'यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति ॥ एव । मुनेर्विजानत आत्मा भवति गौतमे'ति । सायुज्यमपि सदा संबन्धविशेष एवेत्यत्र निदर्शनं **पेटीस्थेति** ॥ ३१७ ॥

किं चेदं शबलत्वं ते किं मायाशबलत्वतः ।
उत मत्रेश्वरत्वादिसद्गुणाभोगविसंभ्रमात्   ॥ ३१८ ॥

मायादूरत्ववाक्यानि पूर्वं धिक्कुर्वते मतम् ।
नित्यमुक्तत्वसिद्ध्यर्थं प्रागुक्तवचनानि च   ॥ ३१९ ॥

अज्ञानं जीवगत्वस्यैवोक्तत्वाच्च न तन्मतम् ॥ ३२० ॥

इदानीं मायाशब्दः किं भ्रान्तिहेत्वज्ञानरूपदोषार्थकः उतोत्कर्षप्रयोजकधर्मार्थक इति विकल्प्याद्यं निराह **किञ्चेत्यादि त्रिभिः । वाक्यानि** मायां व्युदस्य चिन्छक्त्या' 'निरनिष्टो निरवद्य' इत्यादीनि । **वचनानि** 'न मे मोक्षो न बन्धनं' 'प्रकृतेः परः' इत्यादीनि ॥ **जीवगत्वस्यैव** जीवाश्रितत्वस्य न तु सर्वथा ब्रह्माश्रितत्वस्य । **उक्तत्वात्** सकलप्रमाणैः समर्थितत्वात् । **तत्** ब्रह्मणः अज्ञानशबलत्वम् । **न मतं** अप्रामाणिकं प्रमाणविरुद्धं च ॥ ३१८ ॥ ३१९ ॥ ३२० ॥

हरेरिच्छाऽपि मायाख्या मायाख्या प्रकृतिर्जडा ।
भ्रमहेतुश्च मायैका मायेयं त्रिविधा मता   ॥ ३२१ ॥

हरेश्शक्तिश्च तेजश्च तथा मायापदोदिते ।
महामायेत्यविद्येति नियतिर्मोहिनीति च ।
प्रकृतिर्वासनेत्येवं तवेच्छाऽनन्त कथ्यते   ॥ ३२२ ॥

इत्थं पुराणवचनं तथा भागवते ध्रुवः ।
मायाख्यया स्वशक्त्येति मायाख्यां शक्तिमाह हि ॥ ३२३ ॥

द्वितीये तु तत्संबन्धरूपं शबलत्वमनुमन्यत इति वक्तुं तदर्थान्सप्रमाणं वक्ति **हरेरि**त्यादिभिः । इच्छार्थकत्वे प्रमाणमाह **महामायेति** । संभवाम्यात्ममायया' 'मायामात्रमिदं द्वैतमि'त्यादौ इच्छायां मायाशब्दस्य

प्रयोगाच्च ॥ भगवच्छक्त्यर्थकत्वे प्रमाणमाह **मायाऽऽख्ययेति** । अत्राऽऽख्याशब्देन स्पष्टं शक्तिवाचकत्वमवगम्यते ॥ ३२३ ॥

अंतस्स्थस्सर्वभूतानामात्मा योगेश्वरो हरिः ।
स्वमाययाऽऽवृणोद्गर्भं वैराट्याः कुरुतंतवे ॥ ३२४ ॥

यद्यप्यस्त्रं ब्रह्मशिरस्त्वमोघं चाप्रतिक्रियं ।
वैष्णवं तेज आसाद्य समशाम्यद्भृगूद्वह ॥ ३२५ ॥

इति भागवते सूतो मायेत्युक्त्वा पुनश्च तां ।
वैष्णवं तेज इत्याह स्वमाया किल सा हरेः ॥ ३२६ ॥

तेजोवाचकत्वे भागवतसंमतिमाह **स्वमाययेति** । अत्र मायाशब्दस्य तेजोऽर्थकत्वं उत्तरश्लोके तत्पर्यायतया तेजःपदप्रयोगादिति विशदयति **इतीति** ॥ ३२४ ॥ ३२५ ॥ ३२६ ॥

इच्छादिरूपा या माया तया मायामयोऽस्त्वयं ।
स्वच्छंदवृत्तिता सर्वशक्तता च समर्थता ॥ ३२७ ॥

सिद्ध्येन्महात्मनस्तेन मालिन्यं न हि किंचन ।
प्राचुर्यार्थो मयट्शब्दो वक्ति तैः पूर्णतां किल ॥ ३२८ ॥

अनेकार्थपदस्यार्थो ग्राह्यः प्रकरणोचितः ।
न हि सैंधवशब्देन वक्त्यश्वं भुक्तिकामुकः ॥ ३२९ ॥

अत्रोदाहृतप्रमाणेषु आत्ममायया, स्वशक्त्या, स्वमायया इति मायायाः शक्तेश्च स्वशब्देन आत्मशब्देन च विशेषणात्सर्वत्र स्वरूपभूतानि इच्छाशक्तितेजांस्येव ग्राह्याणीति ज्ञायते । इच्छादीत्यत्रादिपदेन शक्तितेजसो-

ग्रहः । **अस्तु** । तच्छबलत्वे उत्कर्षस्यैव सिद्धेः । तत्कथमित्यतः क्रमानुरोधेनाह **स्वच्छन्देत्यादिभिः** । सिद्ध्येदिति प्रत्येकमन्वयः । **मालिन्यं** अपकर्षः । **न किञ्चनेति** । मायाशब्दस्याज्ञानार्थकत्वे मयटो विकारार्थत्वे वा स्यात्कथंचिदपकर्षसंभावना । तयोरर्थयोः प्रकरणविरुद्धतया तिरस्कारं सदृष्टान्तमाह **न हीति** । तथा च प्रकरणानुरोधेन मायाशब्दस्येच्छाद्यर्थकत्वे मयटः प्राचुर्यार्थकत्व एव चाश्रयणीये भगवतः सर्वोत्कर्ष एव संसिद्ध्यतीति भावः ॥ ३२७ ॥ ३२८ ॥ ३२९ ॥

मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरं ।
इति श्रुतौ तु या मायेत्युक्ता सा प्रकृतिर्जडा ॥ ३३० ॥
सर्गादौ मायया विश्वं सृजतीति वचोऽपि च ।
मायाख्यां प्रकृतिं प्राह याऽस्योपादानकारणम् ॥ ३३१ ॥

प्रकृतिरपि जडा क्वचिन्मायेति भण्यते । सा च जगदुपादानम् । भगवांस्तु तदध्यक्षः । अतो नियामकतया प्रकृतिरूपमायासंबन्धेऽपि हरौ नापकर्षशङ्काऽवकाशमासादयतीत्याह **माया त्वित्यादिभिः** ॥ ३३० ॥ ॥ ३३१ ॥

जगतो हेतुभूता तु माया सर्वगता शुभा ।
विकृताऽऽकारतोऽनित्या नित्या मूलस्वरूपतः ॥ ३३२ ॥

विकृताकारतः अनित्येति च्छेदः । तुशब्देन पराभिमतानिर्वचनीयाविद्याया हेतुतां व्यवच्छिनत्ति । तस्या लक्षणप्रमाणासंभवेन दुर्निरूपत्वात् । तदुक्तं वादावल्यां 'तस्मान्नाविद्यानिरूपणगोचरतामाचरतीति कुतस्तत्कार्यमि'ति ॥ ३३२ ॥

न सा भ्रांतिकरी शुद्धा मुक्तामुक्तप्रदेशगा ।
सूक्ष्मरेणुमयी सा च तंतुवायस्य तंतुवत् ॥ ३३३ ॥

वशगा यस्य देवस्य तया स शबलः कथम् ।
न हि स्वर्णकृता हस्तस्सौवर्णश्शबलोऽपि वा ॥ ३३४ ॥

नापि तंतुमयी तंतुवायमूर्तिरतः प्रभुः ।
अप्राकृतमहाकायो यद्रोम्णि प्राकृतं जगत् ॥ ३३५ ॥

शुभत्वमुक्तं विवृणोति **नेति** । सर्वगत्वं विवृणोति **मुक्तेति** । भ्रान्तिकरत्वेनाशुद्धत्वे मुक्तप्रदेशगत्वानुपपत्तेरिति भावः । 'यद्देशतोऽनन्तं तन्नित्यमेव प्रकृत्याद्यन्यदपि' इति गीताभाष्यात्प्रकृतेः सर्वगतत्वमवगन्तव्यम् । सा वशगेत्युत्तरेणान्वयः । **तन्तुवायस्येति** । वशगत्वमात्रे दृष्टान्तः । परमात्मन इव तस्य स्वभावनियामकत्वाभावात् **वशगा** न तु तद्देहोपादानभूता । **शबलः** प्राकृतदेहवत्स्वरूपदोषवान् । यथोक्तं भागवते 'ऋतेऽर्थं यत्प्रतीयेत न प्रतीयेत चात्मनि । तद्विद्यादात्मनो मायामि'ति । उपादानकारणं कर्तृशरीरसंबन्ध्यपि न तदुपादानकारणमित्यत्र दृष्टान्तावाह **न हीति** । स्वर्णकृत इति षष्ठी । **सौवर्णः** सुवर्णोपादानकः । **शबलः** सुवर्णवृत्तिपाकद्रुतत्वादिविकारवान् । **तन्तुवायमूर्तिः** कुविन्ददेहः । **तन्तुमयी** तन्तुविकृता । तन्निष्ठच्छेददाहादिविकारवान् वा । **अतः** प्रकृतिस्वभावनियन्तृत्वात् । **महाकायः** अपरिच्छिन्नाप्राकृताकृतिः । 'परो मात्रया तन्वा वृधाने'ति श्रुतेः । 'इहैकस्थं जगत्कृत्स्नं पश्याद्य सचराचरमि'ति स्मृतेश्च । **यद्रोम्णीति** । उक्तं च भागवततृतीयतात्पर्ये 'एकमण्डं बहुत्वेन प्रत्येकं रोमकूपगम् । ब्रह्माऽपश्यत्तथाऽऽत्मानं हरेस्तेषु पृथक् पृथक्' इति । न हि कायैकदेशरोममात्राधारतया वर्तमाना प्रकृतिः कायोपादानमिति संभवतीति भावः । न चैवं प्रकृतेर्देशत आनन्त्यस्य हानिः इति वाच्यम् । तदानन्त्यमभ्युपगम्यैव ततोऽप्यतिशयितानन्त्यस्य परमात्मनि स्वीकारात् । आनन्त्येऽपि तारतम्यसद्भावेन निरवधिकानन्त्यस्य परमात्मन्येव सद्भावात् । अत एव महतो महीयानिति तल्लक्षणस्य न क्वाप्यतिव्याप्तिरिति ॥ ३३५ ॥

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥ ३३६ ॥

मयाऽध्यक्षेण प्रकृतिस्सूयते सचराचरं ।
हेतुनाऽनेन कौन्तेय जगद्विपरिवर्तते ।
इति कृष्णस्स्वयं प्राह प्रकृत्यध्यक्षतां परं ॥ ३३७ ॥

न च प्रकृतेरुपादानत्वे परमात्मनस्तदध्यक्षत्वे च विवदितव्यं कृष्णेनैव स्वयं प्रोक्तत्वादिति तत्प्रतिपादकश्लोकद्वयं पठति **भूमिरित्यादिना** । आद्यश्लोकेन प्रकृतिस्वरूपं, 'मे प्रकृतिः' इति प्रकृतेस्तदधीनत्वं चोच्यते । द्वितीयेन तस्या जगदुपादानत्वं परमात्मनस्तदध्यक्षत्वरूपं तत्साक्षात्कारपूर्वकतत्प्रेरकत्वं तदाधिपत्यं चोच्यत इति विभावनीयम् । **हेतुना** उपादानेन निमित्तेन चेति हेतुद्वयेन । एतेन ब्रह्म न केवलं निमित्तकारणं किं तु उपादानं चेति वदन्तो मायिनो निरस्ता ध्येयाः । **परं** केवलम् ॥ ३३६ ॥ ॥ ३३७ ॥

निमित्तमात्रं तत्रात्मा निर्गुणः पुरुषर्षभः ।
व्यक्ताव्यक्तमिदं विश्वं यत्र भ्रमति लोहवत् ।
इति वाक्ये निमित्तत्वमात्रोक्तेश्च न तन्मयः ॥ ३३८ ॥

निमित्तमात्रं न तु परोक्तरीत्योपादानमपीत्याशयः । **तन्मयः** तद्विकारि । **वाक्ये** भागवतस्थे ॥ ३३८ ॥

निर्गुणत्वोक्तितश्चाभूत्सा दूरे त्रिगुणात्मिका ।
आहायस्कांतदृष्टांतोऽप्यसक्तस्य नियंतृताम् ॥ ३३९ ॥

सा प्रकृतिः ; तन्निमित्तकविकार इति यावत् । **दूरे** शङ्कायाः अप्यनर्हः । तत्र हेतुः **निर्गुणत्वोक्तितः इति** प्रकृत्यात्मकगुणत्रयनिमित्तक

विकाराभावोक्तित इत्यर्थः । प्रकृतेः लेपकारणताऽवच्छेदके रूपं गुणत्रयात्मकत्वम् । तस्यैवाभावे कुतस्तया लेपप्रसक्तिरिति भावः ॥ **अयस्कान्तदृष्टान्तः** 'यत्र भ्रमति लोहवत्' इत्यनेनार्थाल्लब्धः ॥ 'ग्राव्णे नमस्ते' इत्यन्यत्र कण्ठोक्तश्च । **असक्तस्य** तन्निमित्तकविक्रियाविधुरस्य । **नियंतृतां** भ्रामकताम् । चेष्टकत्वमात्रे दृष्टान्तः । ईश्वरस्यान्तःस्थित्वा स्वेच्छया स्वातन्त्र्येण प्रेरकत्वात् । अयस्कान्तस्य तथात्वाभावात् । तदुक्तं **'ईश्वरः** सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति । भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया' इति ॥ ३३९ ॥

तमसः पारगत्वं च श्रुत्या स्मृत्या च कीर्त्यते ।
अतो जगदुपादानमायाशबलता गता ॥ ३४० ॥

प्रलयकालीनं दुर्गामिमन्यमानं प्रकृत्यात्मकं यत्तमः तस्मादपि परत्वोक्त्या भगवतः प्रकृतिबद्धत्वाभावः सेत्स्यतीत्याह **तमस इति** । **श्रुत्या** 'आदित्यवर्णं तमसः परस्तात्' 'तम आसीत्' । 'आनीदवातं स्वधया तदेकं' इत्यादिकया । **स्मृत्या** 'तमस्तदासीद्गहनं गभीरं यस्तस्य पारेऽभिविराजते विभुः' 'ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते' इत्यादिकया । **अतः** प्रकृत्यभिमानिमहालक्ष्मीनियामकत्वात् ॥ ३४० ॥

विदितोऽसि भवान्साक्षात्पुरुषः प्रकृतेः परः ।
केवलानुभवानन्दस्वरूपस्सर्वबुद्धिदृक् ॥ ३४१ ॥

इति भागवते कृष्णः प्रकृतेः पर एव सन् ।
केवलानुभवानंदरूपस्स्पष्टं निरूपितः ॥ ३४२ ॥

स्वदृष्टमद्भुतं रूपं शिशोस्तस्य चतुर्भुजम् ।
इत्थमस्तौत्किल पिता दीप्तश्रीवत्सकौस्तुभम् ॥ ३४३ ॥

जातमात्रस्य कृष्णस्य ज्ञानानन्दतनुं दृष्ट्वाऽऽनकदुन्दुभिना कृतेन स्तोत्रेण तस्य प्रकृतेः परत्वं निर्णीयत इति तत्स्तुतिरूपं भागवतश्लोकं पठति **विदितोऽसीति** ॥ ३४१ ॥ ३४२ ॥ ३४३ ॥

अतोऽप्राकृत एवाभूद्दिव्याकारो हरेरसौ ।
जडामिश्रसुखज्ञानात्मकहस्तांघ्र्युरोमुखः ॥ ३४४ ॥

मूले केवलेत्यस्यार्थः जडामिश्र इति ॥ ३४४ ॥

भ्रमहेतुस्तु या माया जीवे जीवे च संगता ।
सा नैव श्रूयते देवे या जीवेऽपि न मुक्तिगे ॥ ३४५ ॥
किं पुनर्नित्यमुक्तेऽस्मिन्जडमायाऽनुपद्रवः ॥ ३४६ ॥

भ्रमहेतुरिति 'अथान्ये प्रकृती दुष्टे नृषु प्रातिस्विकं स्थिते' इति पूर्वोक्ता द्विविधा । **'जीवे जीवे'** नृषु प्रातिस्विकम् । **देवे जीवेऽपि नैव** । नृषु इति विशिष्याधमजीवेष्वेवावस्थित्युक्तेः । देवेषु तन्निषेधलाभात् । **न मुक्तिगे** एकां हत्वा अपरां व्याधुटय 'मोक्षपदवीं ददाति पुरुषोत्तम' इत्युक्तेः । स्वयं चेतनभूतमायाशब्दितदुष्टपिशाचनिरसनक्षमे **नित्यमुक्ते हरौ किं पुनः** तदनुपद्रवो वाच्यः । कुतस्तरां जडमायाऽनुपद्रवः । न हि स्वतःप्रवृत्तिरहितमचेतनं चेतनोत्तमं बध्नातुं प्रभवतीति भावः । ॥ ३४५ ॥ ३४६ ॥

विलज्जमानया यस्य स्थातुमीक्षापथेऽमुया ।
विमोहिता विकत्थंते ममाहमिति दुर्धियः ॥ ३४७ ॥

विलज्जमानयेति 'कटाक्षेणापि वीक्षितुं न क्षमन्ते विमतयः' इति न्यायसुधोक्तेः । 'ते वै विदंत्यतितरंति च देवमायां नैषां ममाहमिति धीः श्वसृगालभक्ष्ये' इति च भागवतोक्तेः ॥ ३४७ ॥

नमस्तुभ्यं भगवते ब्रह्मणे परमात्मने ।
न यत्र श्रूयते माया लोकदृष्टिविकल्पना ॥ ३४८ ॥

त्वमाद्यः पुरुषस्साक्षादीश्वरः प्रकृतेः परः ।
मायां व्युदस्य चिच्छक्त्या कैवल्ये स्थित आत्मनि ॥ ३४९ ॥

लोकदृष्टिविकल्पना जीवानां यथार्थज्ञानभ्रंशकरी ॥ ३४८ ॥ ॥ ३४९ ॥

स एव जीवलोकस्य मायामोहितचेतसः ।
विधित्सुस्स्वेन वीर्येण श्रेयो धर्मादिलक्षणम् ॥ ३५० ॥
इति भागवते प्रोक्तचतुर्मुखमुखोक्तितः ।
कृष्णस्य बन्धकीभूतमायादूरत्वनिर्णयात् ॥ ३५१ ॥

जीवलोकस्य मायामोहापनोदनेन श्रेयोविधाने वीर्यवतः कथं स्वयं मायामोह इति भावः ॥ ३५० ॥ ३५१ ॥

न यत्र मायेत्याद्युक्त्या यल्लोकोऽपि न मायिकः ।
कथं मायामयाकारस्तल्लोकेशो भवेद्वद ॥ ३५२ ॥

न यत्रेत्यनेन 'न यत्र माया किमुतापरे हरेरनुव्रता यत्र सुरासुरार्चिताः' इति वैकुण्ठलोकस्य अप्राकृतत्ववर्णनपरं भागवतश्लोकं संगृह्णाति । **तल्लोकेशः** लक्ष्म्यात्मकलोकाधिपतिः । 'श्रीरेव लोकरूपेण विष्णोस्तिष्ठति सर्वदा' इति गीतातात्पर्योक्तेः ॥ ३५२ ॥

माया जया कृतिश्शांतिरिति रूपचतुष्टयम् ।
श्रियोऽस्ति या हरेर्जाया वासुदेवादिरूपिणः ॥ ३५३ ॥

'स तु वासुदेवनामा बभूव निजमुक्तिप्रदाता । तस्याज्ञयैव नियताऽथ रमाऽपि रूपं बभ्रे द्वितीयमपि यत्प्रवदन्ति मायाम्' इति भगवत्पादीयोक्ति-

मनुरुध्याह **मायेति**। या हरेर्जाया तस्याः श्रियो रूपचतुष्टयमस्ति इति योजना। आदिपदेन क्रमेण संकर्षणप्रद्युम्नानिरुद्धाः जयाकृतिशान्तिपतयो ग्राह्याः ॥ ३५३ ॥

नामधेयानि कुर्वंति स्थानानि च नरा भुवि।
माया नारायणीशाना शारदेत्यंबिकेति च ॥ ३५४ ॥

दुर्गां प्रति श्रीविष्णोर्वचनं **नामधेयानीति**। **स्थानानि** देवालयान्। नारायणी ईशाना इति च्छेदः ॥ ३५४ ॥

इति प्रभाष्य तं देवी माया भगवती भुवि।
बहुनामनिकेतेषु बहुनामा बभूव ह।
इति भागवतोक्त्या च माया दुर्गात्मिका रमा ॥ ३५५ ॥

दुर्गाया विष्णुं प्रति वचनं परामृशति **इतीति**। श्लोकद्वयेन सिद्धमर्थमाह **मायेति** ॥ ३५५ ॥

या कैंकर्यकरी तस्य सर्वदा सहचारिणी।
तयैव मायी स जगन्निर्ममे मायया तया ॥ ३५६ ॥

एवकारेण अनिर्वचनीयाविद्याख्यावृत्तिः। एवं इति मायीत्यत्र मतुपा बोधितः संबन्धो नित्यसाहचर्यरूपः संपत्स्यत इत्याह **सदेति**। देशकालाभ्यां समव्याप्तेत्यर्थः। **निर्ममे इति**। 'मम योनिर्महद्ब्रह्मे'त्याद्युक्तेः ॥ ३५६ ॥

यो नः पिता विष्णुरसौ लोकमाता हि सेंदिरा।
तस्मात्स्वरूपमायेच्छा बाह्य श्रीप्रकृती वशे ॥ ३५७ ॥

'यो नः पिता जनिते'ति श्रुतिः। हिशब्देन 'इंदिरा लोकमाता मा' इत्यभिधानम्। तथा च, स्वरूपभूता माया ज्ञानेच्छातेजःशक्त्यात्मिका

एका, **बाह्ये** चिदचित्प्रकृती इति संभूय तिस्र एव मायाः इत्याह **तस्मादिति** ॥ ३५७ ॥

चतुर्थीं तु चतुर्थार्थी न स्मरेद्भ्रमदां हरौ ॥ ३५८ ॥

चतुर्थीं पराभिमतां अनिर्वचनीयां मायां **भ्रमदां** भ्रान्तत्वापादिकाम् । तुना तस्याः परैरपि प्रमाणदुर्घटत्वेन सर्वानुपपत्तिभाजनत्वाङ्गीकारं सूचयति । **चतुर्थार्थी** चतुर्थपुमर्थरूपमोक्षार्थी । **न स्मरेत्** दूरे कथायां तदुपन्यासः । 'किमन्यत्कामहैतुक' इति तदनुसन्धानस्य तमोहेतुत्वोक्तेः ॥ ३५८ ॥

विज्ञानास्त्रेण यो मायामहरद्बाणमन्त्रिणः ।
अन्यैरहन्यमानां च सा कथं सात्वतर्षभे ॥ ३५९ ॥

मयमाया हि सा सत्या मिथ्यार्थान्दर्शयेत्परम् ।
त्रिविधा देवमायेयं सत्या सत्यार्थकारिणी ॥ ३६० ॥

सर्वासां दोषरूपाणां कुहकमायानां निरसनमाहात्म्यं भगवत आह । **विज्ञानेति** । **मयो** बाणमन्त्री । **मिथ्येति** । अर्थस्य दर्शितस्य मिथ्यात्वेऽपि दर्शनं भ्रान्तिः सत्यैवेति तस्या अपि सत्यार्थक्रियाकारित्वमक्षुण्णमेवेति ध्येयम् । **त्रिविधा** पूर्वोक्ता । **सत्यार्थकारिणी** सत्यौ **अर्थौ**, वस्तु ज्ञानं, च तयोः हेतुः ॥ ३६० ॥

तव त्वनिर्वाच्यमाया न सुरे नापि चासुरे ॥ ३६१ ॥

तुशब्देन 'न चानिर्वचनीये किंचिन्मानमि'ति भगवत्पादोक्तिं सूचयति ॥ ३६१ ॥

मदांधे तु महादैत्ये गुरोरप्यवमंतरि ।
तत्रोपमा कथंचित्स्यान्मिथ्यात्वं नास्तिता यदि ॥ ३६२ ॥

गुरुं च गुरुणा दत्तां विद्यामुद्यतधीरसौ ।
यतो धिक्कुरुते वाचा स आचार्यो भवेत्तव ॥ ३६३ ॥

मदांधत्वमेव द्योतयति **गुरोरिति** । **अवमन्तरि** 'न च त्वं न चाहम् ।' इति तत्स्वरूपापलपितरि । मिथ्येत्यस्यासदर्थत्वांगीकारे गुरोस्तदुपदेशस्य चापलापः प्राप्त एवेति भावः ॥ ३६२ ॥ ३६३ ॥

अनिर्वाच्यत्वपक्षस्य त्वनिर्वाच्योऽपरो गुरुः ।
प्रच्छन्नबौद्धराद्धांतो यत्त्वं सदसतोर्बहिः ॥ ३६४ ॥

अपरः सदसद्विलक्षणः । **यत्** यस्मात् त्वं मायी **सदसतो बहिः** । 'न वेदाः । न वर्णाश्रमाचारधर्मा' इति वेदवैदिकस्वरूपप्रतिषेधात् सतः **बहिः**, आपाततः पाडंडिमतनिराकरणनटनेन असतः बहिरिति उभयेभ्यो बहिष्कृतः ॥ ३६४ ॥

पक्षोऽन्यस्तु सभामध्ये हास्याय स्यात्परं नृणां ॥ ३६५ ॥

अन्यः लोकवेदबाह्यः । '**पक्षः** शुद्धशुभगुणपरिपूर्णो मुकुन्दः अशुद्ध इति' शुद्धिमुखसद्गुणरहितस्तु शुद्ध इति च पक्षः । **नृणां** पामराणामपि । किं पुनः प्रेक्षावतामिति भावः ॥ ३६५ ॥

मलिनद्रव्यसंयोगे मालिन्यं वाससोऽपि हि ।
शुद्धवस्तुसमायोगे श्लाघ्यं स्यात्स्वर्गिणामपि ॥ ३६६ ॥

हास्यत्वमेव दृष्टान्तेन व्यनक्ति **मलिनेत्यादिना** । **संयोगेन** कादाचित्केन । अपीत्यनेन किं वाच्यं अनाद्यविद्यामलिनायास्तव चित इति ध्वन्यते । **स्यात्** वास इति विपरिणामेनानुकृष्यते । **अपिः** किमुत लक्ष्म्यात्मकपीताम्बरधारिण इति सूचकः ॥ ३६६ ॥

किं न कौसुंभकुसुमरक्तिमा वस्त्रभूषणम् ।
न किं कुंकुमसौगन्ध्यं गन्धसौगंध्यवर्धनम् ।। ३६७ ।।

रक्तिमा आगंतुकः सुन्दरवर्णः । **सौगन्ध्यं** आगन्तुकसुगन्धसंबन्धः । किमुताप्राकृतस्वरूपरक्तमवर्णोपेतः 'सहृदः सुखगन्धश्चे'ति श्रुतिसिद्धो मुकुन्द इति भावः ।। ३६७ ।।

शौक्ल्योत्तेजकयोगे स्याद्वस्त्रस्य द्युतिशुक्लता ।। ३६८ ।।

उत्तेजकः प्रतिबन्धकनिरासकः । किमुत नित्यनिरस्तदोष इति हृदयम् ।। ३६८ ।।

शक्तिसौंदर्यशौर्यादियोगाच्छ्लाघ्यतरो हरिः ।
ज्ञानेनाज्ञानादिदोषान्यद्दूरे द्रावयेत्प्रभुः ।। ३६९ ।।

दोषे तद्विरोधिगुणाभावः प्रयोजकः । हरिस्तु शक्तिमुखसकलसद्गुणनित्ययोगेन श्लाघ्यतरः । अतो न तत्राज्ञानादिदोषावकाशः । तदुक्तं 'प्रभाजालोल्लासोपहतसकलावद्यतमसे' इतीत्याह **शक्तीति** ।। ३६९ ।।

यदि स्वरूपज्ञानस्य नाज्ञानप्रतिकूलता ।
तदा मुक्तस्य चाज्ञानात्पुनस्संसारिताऽऽपतेत् ।। ३७० ।।

यदुक्तं अज्ञानस्य चिन्मात्राश्रयत्वं तत एव तयोरविरोधित्वं चेति तत्प्राग्दूषितत्वेऽपि दोषान्तरविवक्षया पुनराशङ्कते **यदि इति** । समाधत्ते **तदेति** । **मुक्तस्य** चिन्मात्रस्य । **अज्ञानात्** अज्ञानापातात् । संसारिता 'सा संसार उदाहृतः' इति अविद्याया एव त्वया संसाररूपत्वोपगमात् मुक्तेः संसारत्वं चापतेदित्यर्थः ।। ३७० ।।

भ्रांत्युत्थितस्य तत्रैव भूयो भूयो भ्रमोऽस्ति हि ।
नष्टाज्ञानस्य च भ्रांत्या कल्पनाऽपि पुनः पुनः ।। ३७१ ।।

'अविद्याऽस्तमयो मोक्षः' इति मदभ्युपगमात् कथं मोक्षे तदापादन-मिति चेत् स्यादियमाशङ्का यदि प्रागस्तमितायाः अविद्याया एव मोक्षे सद्भाव आपाद्येत । नैवं । किं त्वज्ञानान्तरस्यैवेति वक्तुं एकस्याज्ञानस्य नाशेऽपि तज्जातीयस्याज्ञानान्तरस्य पुनरुत्पत्तिं भ्रमदृष्टान्तेनोपपादयति । **भ्रांतीति** । **हि** अनुभवसिद्धम् । ननु भ्रान्तेः पुनर्बाधानंतरं कदाचिदुत्थानदर्शनेऽप्य-ज्ञानस्य किमायातमित्यतो भ्रान्तेरज्ञानकार्यत्वात्तदुत्थाने तदुत्थानस्याव-श्यकत्वादित्याह **भ्रान्त्येति** । कल्पनाऽपि इत्यस्य अस्ति हीत्यनेनानुवर्ति-तेनान्वयः ॥ ३७१ ॥

अज्ञानभ्रांतये दोषः कल्प्याऽज्ञानान्न चापरः ।
प्रातीतिकं च तेऽज्ञानं नापि स्वभ्रमकारणम् ॥ ३७२ ॥

ननु मुक्तौ नाज्ञानभ्रान्तिः संभवति । भ्रान्तिं प्रति दोषस्य कारणत्वात् मुक्तौ च दोषाभावादिति चेन्न । अज्ञानविषयकभ्रान्तिं प्रत्यज्ञानस्यैव दोषतया कारणत्वं वक्तव्यम् । इतरस्याज्ञानकार्यत्वेन तत्कारणत्वासंभवात् । मोक्षे च चिन्मात्राश्रिताज्ञानस्य त्वन्मते सम्भवेन तेन च भ्रान्त्युपपत्तिरिति नोक्तदोष-निस्तार इत्याह **अज्ञानेति** । वस्तुतोऽज्ञानभ्रमस्य प्रातीतिकस्य दोषापेक्षैव नेत्याह **प्रातीतिकमिति** । अज्ञानभ्रान्तेरेवाज्ञानत्वेन न स्वं प्रति स्यस्यैव कारणत्वम् । कारणस्य पूर्वभावित्वनियमात् इति भावः ॥ ३७२ ॥

अतो भ्रांत्येककल्प्यस्य कुत्र कुत्र न कल्पना ।
अनादि नास्ति चेत्किं नश्छिन्नं मायैव कल्प्यतां ॥ ३७३ ॥

अतः स्वकल्पनायै दोषानपेक्षत्वात् । **भ्रान्त्येककल्प्यस्य** भ्रान्ति-मात्रस्वरूपस्य प्रातीतिकस्य । **कुत्र कुत्रेति** । तथा च मुक्तावपि तत्कल्पनं सुल-भमेवेति सुस्थं मुक्तस्य संसारित्वापादनमिति भावः । नन्वेवं मुक्तावज्ञानां-तरोत्थानकल्पने तस्यानादित्वं न स्यादिति आक्षिपति **अनादीति** । परिहरति

साध्येवेति । तथा चेष्टापत्तिरिति भावः । तावताऽपि संसारित्वापत्तेरप-रिहारादित्याह **किं न इति** ॥ ३७३ ॥

अतस्स्वरूपज्ञानेन ज्वलज्ज्वालोज्ज्वलेन हि ।
अज्ञानोच्चाटनं वाच्यं यत्संगान्मनसोऽपि चित् ॥ ३७४ ॥

अतः अज्ञानाविरोधे मुक्तावप्यज्ञानापातात्, स्वरूपज्ञानस्य ज्ञान-त्वस्यैवाभावप्रसङ्गाच्च । **यत्संगात्** आत्मस्वरूपसंयोगसामर्थ्यादिव । **चित्** भावप्रधानो निर्देशः । **चित्त्वं** अर्थप्रकाशनेऽज्ञाननिवर्तने च शक्तत्वम् ॥ ३७४ ॥

मायां व्युदस्य चिच्छक्त्येत्युक्तं वाक्यमनुस्मर ।
दोषेण शबलो दूष्यो गुणेन तु मनःप्रियः ॥ ३७५ ॥

पूर्वोक्तस्मृतिसिद्धं चैतदित्याह **मायामिति** ॥ ३७५ ॥

गोश्शाबल्यं न किं लाल्यं श्वित्रिणश्चित्ररूपवत् ।
नित्यमुक्तत्वशुद्धत्ववचनात्कास्य दोषिता ॥ ३७६ ॥

शाबल्यमात्रं नदूषणमित्यत्र दृष्टान्तमाह **गोरिति** । तथा च विमतो नित्यमुक्तत्वादिगुणशबलो विष्णुः लाल्य एव गुणशाबल्यात् गोशाबल्यवत् व्यतिरेकेण श्वित्रिशाबल्यवदिति प्रयोगः सूचितः ॥ ३७६ ॥

क्रियाऽऽवेशप्रसंगेन कर्तृत्वं न चितो यदि ।
तर्हि ज्ञप्तिश्च चिन्नस्यात्सा धात्वर्थक्रिया यतः ॥ ३७७ ॥

ननु विष्णुर्दूष्यः दोषशबलत्वादिति सत्प्रतिपक्षता । न चासिद्धिः । तस्य जगज्जन्मादिकर्तृत्वांगीकारात् । कर्तृत्वस्य च क्रियावेशप्रसंगेन दोषत्वादित्याशंक्य समाधत्ते **यदीत्यादिना** । किं क्रिया धात्वर्थः परिस्पंदो वा । नाद्यः ज्ञप्तिस्वरूपत्वस्याप्यभावापातात् । ज्ञप्तेरपि धात्वर्थत्वादि-

त्याह **तर्हि ज्ञप्तिरिति** । इदं चोपलक्षणं । अस्त्यादिधात्वर्थसत्तादेरप्यभावापातादिति बोध्यम् ॥ ३७७ ॥

निष्क्रियं त्विति वेदस्य पक्षपातो न विद्यते ।
क्रियामात्रनिषेधित्वाद्द्वयं च प्रतिषेधति ॥ ३७८ ॥

तर्हि श्रुतिविरोधात्क्रियानिषेधोऽस्तु । 'निष्कलं निष्क्रियं' इति श्रुत्या क्रियानिषेधावगमादित्याक्षेपं परिहरति **निष्क्रियमिति** किमेषा श्रुतिः क्रियामात्रं प्रतिषेधति उत प्रमितेतरक्रियाम् । नाद्यः । ज्ञप्तित्वाभावरूपदोषतादवस्थ्यात् । कर्तृत्वमात्रं प्रतिषिध्य ज्ञप्तित्वाप्रतिषेधे कारणाभावात् । उभयोरपि धात्वर्थत्वाविशेषादिति भावः ॥ ३७८ ॥

पराऽस्येति श्रुतिः प्राह सह ज्ञानबलक्रियाः ।
अतः श्रौतमिदं त्यक्त्वा स्वगोत्रकलहाक्षमा ।
श्रुतिर्निषेधतीशे द्वे पुण्यपापाभिधे क्रिये ॥ ३७९ ॥

द्वितीयस्त्वनुमत इत्याह **परेति** । जगत्कर्तृत्वं विकारानापादकत्वाच्छ्रुतिप्रमितमेवेति न तन्निषेधः । अन्यथाऽन्यतरश्रुत्यप्रामाण्यापत्तेरित्याह **स्वेति** । तर्हि निष्क्रियत्वश्रुतेः किं नैरर्थक्यं, नेत्याह **निषेधति इति पुण्यपापे** तयोर्वृद्धिक्षयहेतुत्वात् । परिपूर्णे वृद्धिक्षययोरभावात् । 'न कर्मणा वर्धते नो कनीयानि'ति श्रुतिप्रतिषिद्धत्वादित्याशयः ॥ ३७९ ॥

दुश्शब्दस्पर्शरूपादीन्विषयान्जडविग्रहं ।
अशब्दत्वादिका वाणी निवारयति वैदिकी ॥ ३८० ॥

श्रुतीनां पूर्वोत्तराविरुद्धो यथायोग्य एवार्थो वर्णनीय इति व्युत्पादितं न्यायं 'अशब्दमस्पर्शमरूपमि'ति श्रुतावप्यतिदिशन् परकृततदपव्याख्यां **प्रत्याख्याति दुःशब्देत्यादिभिः** । अशब्दं इत्यत्र बहुव्रीहिणा शब्दाभाववत्त्व ताव-

द्भगवतः प्रतीयते । सर्वथा शब्दाप्रतिपाद्यत्वं अर्थोऽस्येति तु न संभवति । 'सर्वे वेदा यत्पदमामनन्ती'ति स्मृतेः । 'वेदा ह्येवैनं वेदयन्ती'ति श्रुतेश्च । सर्वोत्तमं ज्ञापयन्ति महातात्पर्यमत्र हि ॥ सर्वेषामपि वेदानामितिहास-पुराणयोरि'ति तत्वनिर्णयोदाहृतप्रमाणेन तस्य गुणोत्कर्षे एव सर्वागमान महातात्पर्योक्तिविरोधात् । अतो दुरागमाज्ञेयत्वमेव तच्छब्दार्थो वाच्यः । 'दुरागमास्तदन्ये ये तैर्न ज्ञेयो जनार्दनः' इति प्रमाणं चात्र मानम् । एवं अरूपं इत्यस्य सर्वथा रूपाभाववत्त्वं अर्थो नोपपद्यते । 'रुक्मवर्णं' 'श्यामाच्छबलं प्रपद्ये' इत्यादिश्रुतेः. 'नानावर्णाकृतीनि' इत्यादिस्मृतेश्च रूपप्रमितेः । अतः 'भूतेभ्योऽसौ परो यतः । अरूपवानिति प्रोक्तः' इति भाष्योदाहृत-स्मृत्यनुसारेण प्राकृतरूपराहित्यमेवार्थो वाच्यः । एवं अस्पर्शमित्यादीनि च प्राकृतस्पर्शादिरहिततया व्याख्येयानि । तथा ज्ञानानन्दात्मकविग्रहवत्त्वेन प्रमितेऽस्मिन् अशरीरत्वं श्रूयमाणं जडविग्रहराहित्यपरत्वेन नेयमित्यादि समर्थयितुं तावत्प्रतिजानीते **अशब्दत्वादिकेति** ॥ ३८० ॥

न चेन्निष्कलशब्देन न स्याज्ज्ञानकलाऽपि ते ।
कथंचित्तत्समाधाने सर्वत्रैवं मतिं कुरु ॥ ३८१ ॥

उक्तन्यायं उक्तातिप्रसङ्गं स्मारयन्परेणापि पुनरङ्गीकारयति **न चेदिति** । श्रुत्यन्तरप्रमितमपि श्रुत्यन्तरेण निषिध्यते चेदित्यर्थः । **निष्कल-शब्देन** 'निष्कलं निष्क्रियं शान्तं' इति श्रुत्या । **ते** त्वत्संमता । 'सत्यं ज्ञानमनन्तं' इति श्रुतिसिद्धा च । **कथञ्चित्** प्राकृतकलाराहित्येन । **सर्वत्र** अशब्दमित्यादावपि । एवं पूर्वोक्तगत्याविरुद्धप्रमाणान्तराविरुद्धार्थवर्णने ॥३८१॥

अशब्दश्रुतिलक्ष्यत्वे मुख्यार्थाशब्दता गता ।
अशब्दश्रुतिवाच्यत्वे मुख्यार्थाशब्दता गता ॥ ३८२ ॥

उपपादनाय विकल्पयति । **अशब्देति** । सर्वथा शब्दसंबन्धाभावमर्थं वदन् प्रष्टव्यः । किमशब्दशब्दस्य अयं लक्ष्यार्थः उत वाच्यः इति । आद्ये

आह **मुख्यार्थतेति** । त्वयैव वाच्यार्थरूपपक्षस्य परित्यागादिति भावः । **न द्वितीयः** । एतच्छब्दवाच्यत्वस्यैव सद्भावे सर्वथा शब्दसंबन्धाभावरूपो मुख्यार्थस्त्वदभिमतो गत इति भावः । यद्वा शक्तिर्लक्षणा वा भवतु संबन्धमात्रस्याङ्गीकृतत्वेन सर्वथा संबन्धाभावपक्षः गत इत्युभयत्रैक एव दोषः ॥ ३८२ ॥

अशब्दश्रुत्यबोध्यत्वे मुख्यार्थाशब्दता गता ॥ ३८३ ॥

अथैतद्दोषपरिहाराय बोध्यत्वमेव नाङ्गीक्रियते तर्हि प्रमाणाभावादेव मतं गतमित्याह **अशब्देति** ॥ ३८३ ॥

यद्यशब्दश्रुतेरर्थस्सर्वथाशब्ददूरता ।
तर्हीयं च श्रुतिस्तत्र मानं नेति जितं परैः ॥ ३८४ ॥

तदेव विवृणोति **यदीति** । **जितं** प्रतिप्रमाणाभावादेव ॥ ३८४ ॥

कथंचिच्छब्दयोगे तु श्रुतेर्मुख्यार्थता गता ।
यथायोग्यार्थकथने जितं त्वत्प्रतिवादिभिः ॥ ३८५ ॥

यथायोग्येति । दुरागमावेद्यत्वरूपेत्यर्थः । सङ्कोचस्यैवाश्रयणीयत्वेऽस्मदुक्तसङ्कोचस्य प्रमाणानुगुणस्य योग्यत्वात् ॥ ३८५ ॥

यद्यस्पर्शश्रुतेरर्थस्सर्वथा स्पर्शशून्यता ।
न स्पृशेत्तर्ह्यविद्याऽपि जितं त्वत्प्रतिवादिभिः ३८६

अविद्या प्रकृतिः । उपलक्षणमेतत् । तस्य पादस्पर्शेन विष्णुपद्याः पावित्र्यं न सिद्ध्येत् । व्यजनेन तद्वीजनाद्युपचारपूजा च निरर्थका स्यादित्यादिदूषणं द्रष्टव्यम् ॥ ३८६ ॥

कथंचित्स्पर्शितायां तु श्रुतेर्मुख्यार्थता गता ।
यथायोग्यार्थकथने जितं त्वत्प्रतिवादिभिः ॥ ३८७ ॥

द्भगवतः प्रतीयते । सर्वथा शब्दाप्रतिपाद्यत्वं अर्थोऽस्येति तु न संभवति । 'सर्वे वेदा यत्पदमामनन्ती'ति स्मृतेः । 'वेदा ह्येवैनं वेदयन्ती'ति श्रुतेश्च । सर्वोत्तमं ज्ञापयन्ति महातात्पर्यमत्र हि ॥ सर्वेषामपि वेदानामितिहासपुराणयोरि'ति तत्वनिर्णयोदाहृतप्रमाणेन तस्य गुणोत्कर्ष एव सर्वागमान महातात्पर्योक्तिविरोधात् । अतो दुरागमाज्ञेयत्वमेव तच्छब्दार्थो वाच्यः । 'दुरागमास्तदन्ये ये तैर्न ज्ञेयो जनार्दनः' इति प्रमाणं चात्र मानम् । एवं अरूपं इत्यस्य सर्वथा रूपाभाववत्त्वं अर्थो नोपपद्यते । 'रुक्मवर्णं' 'श्यामाच्छबलं प्रपद्ये' इत्यादिश्रुतेः, 'नानावर्णाकृतीनि' इत्यादिस्मृतेश्च रूपप्रमितेः । अतः 'भूतेभ्योऽसौ परो यतः । अरूपवानिति प्रोक्तः' इति भाष्योदाहृतस्मृत्यनुसारेण प्राकृतरूपराहित्यमेवार्थो वाच्यः । एवं अस्पर्शमित्यादीनि च प्राकृतस्पर्शादिरहिततया व्याख्येयानि । तथा ज्ञानानन्दात्मकविग्रहवत्त्वेन प्रमितेऽस्मिन् अशरीरत्वं श्रूयमाणं जडविग्रहराहित्यपरत्वेन नेयमित्यादि समर्थयितु तावत्प्रतिजानीते **अशब्दत्वादिकेति** ॥ ३८० ॥

न चेन्निष्कलशब्देन न स्याज्ज्ञानकलाऽपि ते ।
कथंचित्तत्समाधाने सर्वत्रैवं मतिं कुरु ॥ ३८१ ॥

उक्तन्यायं उक्तातिप्रसङ्गं स्मारयन्परेणापि पुनरङ्गीकारयति **न चेदिति** । श्रुत्यन्तरप्रमितमपि श्रुत्यन्तरेण निषिध्यते चेदित्यर्थः । **निष्कलशब्देन** 'निष्कलं निष्क्रियं शान्तं' इति श्रुत्या । **ते** त्वत्संमता । 'सत्यं ज्ञानमनन्तं' इति श्रुतिसिद्धा च । **कथश्चित्** प्राकृतकलाराहित्येन । **सर्वत्र** अशब्दमित्यादावपि । एवं पूर्वोक्तगत्यविरुद्धप्रमाणान्तराविरुद्धार्थवर्णने ॥३८१॥

अशब्दश्रुतिलक्ष्यत्वे मुख्यार्थाशब्दता गता ।
अशब्दश्रुतिवाच्यत्वे मुख्यार्थाशब्दता गता ॥ ३८२ ॥

उपपादनाय विकल्पयति । **अशब्देति** । सर्वथा शब्दसंबन्धाभावमर्थं वदन् प्रष्टव्यः । किमशब्दशब्दस्य अयं लक्ष्यार्थः उत वाच्यः इति । आद्ये

आह **मुख्यार्थतेति** । त्वय्येव वाच्यार्थरूपपक्षस्य परित्यागादिति भावः । **न द्वितीयः** । एतच्छब्दवाच्यत्वस्यैव सद्भावे सर्वथा शब्दसंबन्धाभावरूपो मुख्यार्थस्त्वदभिमतो गत इति भावः । यद्वा शक्तिर्लक्षणा वा भवतु संबन्धमात्रस्याङ्गीकृतत्वेन सर्वथा संबन्धाभावपक्षः गत इत्युभयत्रैक एव दोषः ॥ ३८२ ॥

अशब्दश्रुत्यबोध्यत्वे मुख्यार्थाशब्दता गता ॥ ३८३ ॥

अथैतद्दोषपरिहाराय बोध्यत्वमेव नाङ्गीक्रियते तर्हि प्रमाणाभावादेव मतं गतमित्याह **अशब्देति** ॥ ३८३ ॥

यद्यशब्दश्रुतेरर्थस्सर्वथाशब्ददूरता ।
तर्हीयं च श्रुतिस्तत्र मानं नेति जितं परैः ॥ ३८४ ॥

तदेव विवृणोति **यदीति** । **जितं** प्रतिप्रमाणाभावादेव ॥ ३८४ ॥

कथंचिच्छब्दयोगे तु श्रुतेर्मुख्यार्थता गता ।
यथायोग्यार्थकथने जितं त्वत्प्रतिवादिभिः ॥ ३८५ ॥

यथायोग्येति । दुरागमावेद्यत्वरूपेत्यर्थः । सङ्कोचस्यैवाश्रयणीयत्वेऽस्मदुक्तसङ्कोचस्य प्रमाणानुगुणस्य योग्यत्वात् ॥ ३८५ ॥

यद्यस्पर्शश्रुतेरर्थस्सर्वथा स्पर्शशून्यता ।
न स्पृशेत्तर्ह्यविद्याऽपि जितं त्वत्प्रतिवादिभिः ३८६

अविद्या प्रकृतिः । उपलक्षणमेतत् । तस्य पादस्पर्शेन विष्णुपद्याः पावित्र्यं न सिद्ध्येत् । व्यजनेन तद्वीजनाद्युपचारपूजा च निरर्थका स्यादित्यादिदूषणं द्रष्टव्यम् ॥ ३८६ ॥

कथंचित्स्पर्शितायां तु श्रुतेर्मुख्यार्थता गता ।
यथायोग्यार्थकथने जितं त्वत्प्रतिवादिभिः ॥ ३८७ ॥

कथञ्चित् व्यावहारिकस्पर्शमात्रेण । **मुख्यार्थता** स्पर्शसामान्याभावार्थत्वम् ॥ **यथायोग्येति** दाहशोषणक्लेदनादिविकारानापादकेत्यर्थः ॥ ३८७ ॥

यद्यस्ति मायिको देहश्श्रुतेर्मुख्यार्थता गता ।
सोऽपि नैवास्ति चेर्त्तर्हि माया वंध्याऽभवत्तव ॥ ३८८ ॥
यथायोग्यार्थकथने जितं त्वत्प्रतिवादिभिः ॥ ३८९ ॥

देहोऽपि किं अमायिको नास्ति मायिकस्त्वस्तीति, उत सर्वथा नास्त्येवेति आहोस्वित् प्रमितस्य सद्देहस्य ज्ञानानन्दात्मकस्य सद्भावेऽपि प्राकृतो बन्धहेतुर्नास्तीति विकल्प्य नाद्य इत्याह **श्रुतेरिति** । **मुख्यार्थता** त्वदभिमता सर्वथा देहाभावरूपार्थता । द्वितीय आह **मायेति** । **वन्ध्या** ईश्वरदेहजननरूपस्वकार्यशून्या ॥ तृतीयमङ्गीकारेण परिहरति **यथायोग्येति** ॥ ३८८ ॥ ३८९ ॥

सर्वथा रूपराहित्ये रुग्मवर्णश्रुतिर्गता ।
मायारूपेण रूपित्वे श्रुतेर्मुख्यार्थता गता ।
यथायोग्यार्थकथने जितं त्वत्प्रतिवादिभिः ॥ ३९० ॥

एवं अरूपमित्यत्रापि विकल्प्य सर्वथारूपराहित्यं श्रुतिविरोधेन परिहृत्य मायिकरूपवत्वं श्रुतेर्मुख्यार्थपरित्यागदण्डभयेन त्याजयित्वा परिशेषतः 'आनन्दरूपमजरमि' त्यादिश्रुतिसिद्धाप्राकृतरूपार्थकत्वं समर्थनीयमित्याह **सर्वथेति** ॥ ३९० ॥

मायिकोऽर्थो निषेधस्य वारको यदि नेष्यते ।
घटे सत्यपि किं भूमिरघटेति न कथ्यते ॥ ३९१ ॥

मायिकोऽर्थः मायाकल्पितः रूपस्पर्शदेहादिरूपः प्रागुक्तः ।

निषेधस्य अरूपमित्यादिसामान्यनिषेधस्य। **वारकः** विरोधी । **घटे** तन्मतेन मायिके । किं न कथ्यते इति आक्षेपः । तदपि कथ्येत । न तु तथाऽस्ति । अतः वारकत्वमङ्गीकरणीयमेवेति न पूर्वोक्तातिप्रसङ्गनिस्तार इति ॥ ३९१ ॥

किं तु प्रमाणासिद्धोऽर्थस्त्वतरतं च्यावयेद्बली ।
कन्यकाऽनुदरेत्यादौ यथा व्यवहृतौ सतां ॥ ३९२ ॥

यत्र क्वचित्सामान्यनिषेधस्य सङ्कोचः तत्र स **विशेषस्य** प्रमितत्वे एवेति दृष्टान्तमुखेन वक्ति **कन्यकेति** । तत्र तनूदरस्य प्रमितत्वेन उदर-सामान्यनिषेधः तदितरस्थूलोदरनिषेधपरत्वेन सङ्कोच्यते । न तु तथाऽत्र मायिकरूपादिः प्रमितो येनात्रापि सङ्कोच इति भावः ॥ ३९२ ॥

आदित्यवर्णं तमसः परस्तादिति वैदिकी ।
वागविद्यानिवृत्तौ च रूपमाह परात्मनः ॥ ३९३ ॥

श्रुतियुक्तिसिद्धमप्राकृतरूपादिकं नैव निषेधार्हमित्याह **आदित्य-वर्णमिति** । न चास्यापारमार्थिकत्वं शंक्यं अविद्यानिवृत्त्युत्तरकालीन-स्थितेः 'तमसः पारे' इति श्रुत्या वर्णितत्वात् । न ह्यपारमार्थिकस्या-विद्यकस्य तथात्वं संभवति ॥ ३९३ ॥

रूपं च स्पर्शतो व्याप्तं तौ साकाराश्रितौ सदा ।
ततश्चैतन्यमात्रेऽपि श्रुता साकारता मता ॥ ३९४ ॥

गुणसौरभे 'चितां साकारतां स्तुमः' इत्यादिना निराकारवस्त्वेव नास्तीत्युपपादनपूर्वकं चेतनमात्राणां करचरणाद्याकारः सम्मतः । परमचेतनस्य हरेरपि साकारत्वं 'सहस्रशीर्षा पुरुषः' 'सर्वतः पाणिपादं तत्' इत्यादिश्रुतिस्मृतिसिद्धं बाधकपरिहारपूर्वकं युक्तिभिः स्थापयति **रूपं चेत्यादिना** । विमतः आकारवान् स्पर्शवत्त्वात् घटवत् । न चासिद्धिः ।

स्पर्शवान् रूपवत्त्वात्तद्वदेव इति तत्सिद्धिः । न च तत्राप्यसिद्धिः । 'रुक्मवर्णं कर्तारं' 'पश्यन्त्यदोरूपमदभ्रचक्षुषः' इत्यादिश्रुतिस्मृतितः सिद्धेः । श्रुतिसिद्धमप्याकारं न्यायेनोपपादयितुमयं प्रयत्नः । एवं स्रष्टृत्वपालयितृत्ववेदोपदेष्टृत्वादियुक्तिभिरपि साकारत्वसिद्धिः न्यायामृतोक्तदिशा ज्ञातव्या । न चारोपिताकारसिद्ध्यार्थान्तरता । तमसः परत्वोक्तेः । हिरण्मयः पुरुषो दृश्यते' इति ज्ञानिनां वर्तमानतयाऽपरोक्षज्ञानविषयत्वोक्तेः । 'य एनं विदुरमृतास्ते भवन्ति' इति तज्ज्ञानस्य मोचकत्वोक्तेः ॥ ३९४ ॥

अतस्स विश्वतश्चक्षुर्विश्वतोमुख एव च ।
विश्वतोबाहुरीशोऽसौ विश्वतःपात्परः प्रभुः ॥ ३९५ ॥

साकारत्वे पुरुषसूक्तं प्रमाणयति विश्वत इति ॥ ३९५ ॥

मायाभावेऽपि यो देहो ज्ञानानंन्दात्मको ह्यसौ ।
सुखरूपं हि तद्ब्रह्म ज्ञानरूपं न मृण्मयम् ॥ ३९६ ॥

नचायं विग्रहो भौतिक इति शंक्यम् । 'तमसःपरमुच्यते' 'न सत्तन्नासदुच्यते' इति गीतायां अप्राकृतत्वस्य अभौतिकत्वस्य चोक्तेः । अतः ज्ञानानन्दात्मकमेवेत्याह **ज्ञानेति** । हिशब्देन 'आनन्दज्ञानशक्त्यादिदेहं विष्णुं तु ये जनाः । अदेहं भूतदेहं वा विदुस्ते चाध्वरं तमः' इत्यादितत्वप्रदीपोदाहृतश्रुतिप्रसिद्धिमाह । **मृण्मयं** भौतिकम् ॥ ३९६ ॥

सत्वादिमृण्मयांतोऽयं मायासंतान एव हि ।
मायामयमिदं विश्वं रोमकूपेऽप्यणुः किल ॥ ३९७ ॥

अप्राकृतत्वादेवाभौतिकत्वं च सिद्ध्यति भूतानां मायाऽऽस्यप्रकृतकार्यत्वादित्याह **सत्त्वादी**ति । **संतानः** उपादेयम् । अप्राकृतत्वं युक्त्या साधयति **मायामयमि**ति । न हि ततोऽणुः तदुपादानं चेति संभवति ॥ ३९७ ॥

महाकायस्य कायोऽसौ चिन्मयो न हि मृण्मयः ।
न यत्र श्रूयते माया सत्वादेस्तत्र का कथा ॥ ३९८ ॥

असौ अनन्तकोटिब्रह्माण्डाश्रयः । कैमुत्येनापि विग्रहस्याप्राकृतत्वं वक्ति **नेति** । तल्लोकोऽप्यप्राकृतो यदा किमु तल्लोकाधिपतिरिति भावः ॥ ३९८ ॥

स्वकार्यैस्सह माया यद्रोमकूपं न पूरयेत् ।
तस्य व्याप्तं शरीरं तच्चिद्रूपं न जडोद्भवम् ॥ ३९९ ॥

तस्य नारायणस्य । **व्याप्तं** प्रकृतितोऽपि अनन्तव्याप्तिमदनन्तम् ॥३९९॥

सुखज्ञानसुखस्पर्शस्सुखगन्धस्सुखाकृतिः ।
नखादिस्वशिखान्तं च सुखतेजोमयः प्रभुः ॥ ४०० ॥

सुखज्ञानेति । तथा हि तत्वप्रदीपोदाहृतपैंगिश्रुतिः 'तस्मादानन्दचिद्देहं चिदानन्दशिरोमुखम् । चिदानंदभुजं ज्ञानसुखैकपदसाङ्गुलिम् । आकेशादानखाग्रेभ्यः पूर्णचित्सुखशक्तिकमि'त्यादिः ॥ ४०० ॥

अलौकिकशरीरेषु विद्यते ह्यशरीरता ।
यथाऽदृश्यशरीरोत्था दैवी वागशरीरवाक् ॥ ४०१ ॥

अशरीरश्रुतेर्विरोधं तद्गतिं दृष्टान्तोक्त्या वर्णयन्परिहरति **अलौकिकेति** । यथोक्तं भगवत्पादैः अरूपाधिकरणभाष्ये 'विलक्षणरूपत्वात् । यथा चक्षुरादिप्रकाशे विद्यमाने वैलक्षण्यादप्रकाशादिव्यवहार' इति ॥ ४०१ ॥

विलक्षणशरीरत्वान्न तद्दुःखादिकारणम् ।
अजीर्णता मनुष्यान्नाद्देवान्नादजरोऽमरः ॥ ४०२ ॥

तत एव न दुःखादिप्रसक्तिरित्याह **विलक्षणेति** । **नेति** । प्रत्युत सुखप्रयोजकमेव । तदुक्तं न्यायामृते 'अप्राकृतानन्दमयविग्रहस्य दुःखाभावेनैव

व्याप्तेः ।' इत्यादि । विस्तरस्तत्रैव ब्रह्मणो निराकारत्वभङ्गे । **कारणवैलक्षण्ये** कार्येऽपि तन्नियतमित्यत्र दृष्टान्तः **अजीर्णतेति** ॥ ४०२ ॥

कर्तृता न चितश्चेत्स्यादकृतागमसंकटम् ।
कर्तृता मिलिते चेत्स्यादुभयोरपि कर्तृता ॥ ४०३ ॥

यच्चोच्यते मनःस्थं कर्तृत्वमात्मन्यध्यस्तं न तु तात्विकमिति तदिदानीं दूषयति **कर्तृतेति** । **अकृतागमसंकटं** उपलक्षणम् । कृतहानसंकटं चेति बोध्यम् । तदुक्तं न्यायामृते कर्तृत्वाध्यासभङ्गे 'मनसः श्रवणादिकर्तृत्वे तत्फलं मोक्षोऽपि तस्यैव स्यात् 'शास्त्रफलं प्रयोक्तरि' इति न्यायेन यस्मिन् साधनकृतिः तस्यैव फलभाक्त्वात् अन्यथा कृतहानाकृताभ्यागमप्रसंगादि'ति । अथैतद्दोषपरिहाराय यदि मनोविशिष्टे जीवे कर्तृतोच्यते तर्हि उभयोरपि कर्तृता-प्राप्त्या चितोऽकर्तृत्वं इति रिक्थं वच इत्याह **मिलिते इति** । विशिष्टे इत्यर्थः ॥ ४०३ ॥

विशिष्टस्य हि कर्तृत्वे विशेष्यस्यापि कर्तृता ।
वस्तुतः कर्तृता को वा वक्त्यनात्मनि युक्तिमान् ॥ ४०४ ॥

तत्कथमित्यत आह **विशिष्टस्येति** । इदं चोपेत्योक्तम् । **वस्तुत** आत्मन एव कर्तृत्वं नानात्मनः मनसः, युक्तिविरुद्धत्वादित्याह **को वेति** ॥ ४०४ ॥

मर्त्यैर्वर्त्ये यत्स्वतन्त्रः कर्तेत्याहुर्विपश्चितः ॥ ४०५ ॥

मर्त्यैः चेतनैः **वर्त्ये** प्रवर्त्यमाने कर्मणि । **विपश्चितः** वैयाकरणाः ॥ ४०५ ॥

यथा दंडमृदाद्यर्थैर्विशिष्टो लक्षितोऽपि वा ।
कुलाल एव घटकृत्ते सर्वे कारकान्तरम् ॥ ४०६ ॥

देहान्तःकरणाद्यैश्च विशिष्टो लक्षितोऽपि वा ।
जीव एव तथा कर्ता तत्सर्वं कारकान्तरम् ॥ ४०७ ॥

विवृणोति **यथेति** । कुलालः दण्डाद्यैः घटं करोति इति हि सार्वजनीनः प्रत्ययः । न तु पुनर्दण्डादिकं कुलालेन करोतीति । **कारकान्तरं** समुदायैकवचनं कर्मकरणादिकारकान्तराणि । **जीव एवेति** । तदुक्तं महाभारततात्पर्यनिर्णये 'प्रत्यक्षैषा कर्तृता जीवसंस्था' इति । सूत्रं च 'कर्ता शास्त्रार्थवत्त्वात्' इति । विशिष्टो वा लक्षितो वेत्यनास्था । सर्वथा जडस्य तस्य कर्तृत्वं न संभवत्येवेत्यत्र तात्पर्यम् ॥ ४०६ ॥ ४०७ ॥

मनो हि करणं तस्य देहोऽधिकरणं स्मृतम् ।
कर्तृत्वे कोऽस्ति दायादी मायाऽपि करणान्तरम् ॥ ४०८ ॥

कारकान्तरत्वं मनआदीनां विवृणोति **मन इति** । तदुक्तं गीताभाष्ये '**समश्चाभिमानो मनसि काष्ठादिवदि**'ति । **अधिकरणं** कर्तृद्वारा क्रियाश्रयः न तु साक्षात् । अधिकरणस्य तल्लक्षणत्वात् । **स्मृतमिति** तदुक्तं गीतायां '**अधिष्ठानं तथा कर्ता करणं च पृथग्विधं**' इति । अधिष्ठानं भूमिदेहादिः । कर्ता स्वतन्त्रो विष्णुः । पराधीनकर्ता जीवः । **दायादी** कर्तृत्वैकांशभाग् । **मायाऽपि प्रकृतिरपि** । 'पुरुषः प्रकृतिस्थो हि भुंक्ते प्रकृतिजान्गुणान्' इति गीतायां भोजनादिक्रियाकर्तुर्जीवस्य प्रकृतिस्थ इति विशेषणेन प्रकृतेरप्यधिष्ठानत्वस्य लाभात् ॥ ४०८ ॥

विशिष्टार्थविमर्शेऽभूद्यतश्चिन्मात्रकर्तृता ।
मुसलाच्च त्वचं कश्चिन्मोचयेत्तद्विचक्षणः ॥ ४०९ ॥

विशिष्टार्थः देहेन्द्रियादिविशिष्टचेतनः । तस्य **विमर्शे** प्राप्ताप्राप्तविवेकेन विचारे कृते सति । **चिन्मात्रकर्तृतेति** ज्ञानेच्छाप्रयत्नवत एव कुलालादेः कर्तृत्वदर्शनेन दंडादेरचेतनस्य विशेषणस्य तददर्शनेनेति भावः । एवं

जीवस्य मुक्तौ प्राकृतदेहेंद्रियाद्यभावेऽपि जक्षन् क्रीडन्नित्यादिश्रुतेः कर्तृत्वदर्शनात् संसारेऽपि जीवस्य देहादुत्क्रमणे देहादीनां कर्तृत्वादर्शनाच्चेत्यन्वयव्यतिरेकाभ्यामिति भावः । **विचक्षणः** विशिष्टस्य कर्तृत्वे प्राप्ते, सति च विशेषणे तद्बाधे, विशेष्यचेतनगतमेव तत्पर्यवस्यतीति निर्णये कुशलः ग्रन्थकार इति ध्वनिः ॥ ४०९ ॥

अतो विशिष्टकर्तृत्ववादं शिष्टा न मेनिरे ।
सहकार्येव तत्रापि जडं कर्ता तु चेतनः ॥ ४१० ॥

उपसंहरति **अत इति** ॥ ४१० ॥

द्वावुद्दिश्य कृते यागे देवतात्वं द्वयोरपि ।
द्विदैवत्यं हि तत्कर्म संकल्पो देवते इति ॥ ४११ ॥

अग्नीषोमीययागे देवतात्वस्य व्यासज्यवृत्तित्ववत् **कर्तृत्वस्य देहचेतनोभयवृत्तित्वशङ्कां** वैषम्यप्रदर्शनेन परिहरति **द्वाविति** । **युक्तं तस्य यागस्य द्विदैवत्यं** द्वयोरप्युद्देशेन कृतत्वात् संकल्पस्य च तथाविधत्वात् । **प्रकृते तु देहादीनां** जडत्वेन तेषु कर्तृत्वस्यासंभवेन कारकान्तरत्वस्यैवानुभवादित्याह **उद्दिश्येति** ॥ ४११ ॥

समूहालम्बनज्ञाने विषयत्वं यथा पृथक् ।
तथा विशिष्टविज्ञाने विषयत्वंपृथक्पृथक् ॥ ४१२ ॥
व्यासज्यवृत्तिधर्मोऽयं न हि द्वित्व पृथक्त्ववत् ॥ ४१३ ॥

विषयत्वमपि न व्यासज्यवृत्ति समूहालम्बनज्ञानस्थल इव **विशिष्ट**विषयकज्ञानस्थलेऽपि विषयत्वस्य विशेषणविशेष्यतत्संबन्धेषु **पृथक् पृथक्** प्रत्येकमेव विश्रान्तत्वादित्याह **समूहेति** । **अयं** विषयत्वरूपधर्मः **द्वित्ववत्** **पृथक्त्ववद्वा न हि** व्यासज्यवृत्तिधर्म इति योजना । **अयं भावः** । **परेण**

मिथ्यात्वे दृश्यत्वं हेतूकृतम् । विशिष्टं च मिथ्या । तत्र दृग्विषयत्वं विद्यमानं किं विशेष्ये चिन्मात्रे उत विशेषणे देहादिप्रपञ्चमात्रे इति विचारणीयम् । नाद्यः अनैकान्त्यात् प्रपंचस्य मिथ्यात्वासिद्ध्यापत्तेश्च । न द्वितीयः विशेष्यस्यात्मनोऽसिद्ध्यापत्तेः । ज्ञानं विना वस्तुनोऽसिद्धेः । त्वदभिमतस्वप्रकाशत्वस्य निराकरणात् । परेण चरमवृत्तिं प्रति अखण्डस्य चिन्मात्रस्य विषयत्वांगीकाराच्च । अतः विशिष्टज्ञाने प्रत्येकं उभयोर्विषयत्वमङ्गीकरणीयम् । व्यासज्यवृत्तित्वं तु तस्यानुभवपराहतम् । एवं कर्तृत्वस्यापीति । द्वित्वं इति स्वरीत्या । पृथक्त्वं च पररीत्या ॥ ४१३ ॥

केवलस्य ह्यकर्तृत्वे किं नश्छिन्नं हरिश्च नः ।
कालप्रकृतिकर्माद्यैस्सहैव कुरुते जगत् ॥ ४१४ ॥

अस्तु वा जडसहकारवतः एवात्मनः कर्तृत्वम् । तथाऽपि भगवतो जगत्कर्तृत्वं निष्प्रत्यूहमेव । स्वेच्छया तेन स्वाधीनकालप्रकृतिकर्मादिसहकारस्य स्वीकारात् इत्याह **केवलेति** । न चैवमीश्वरस्य न्यूनता । सहकारिणामपि तदधीनसत्तादिमत्त्वात् । एवंविधसाधनसंपत्तेरैश्वर्यद्योतकत्वात् । तदुक्तं भगवत्पादैः 'साधनानां साधनत्वं यदाऽऽत्माधीनमिष्यते । तदा साधनसंपत्तिरैश्वर्यद्योतिका भवेदि'ति ॥ ४१४ ॥

देहांतःकरणाद्येव कर्तृत्वे घटकं यदि ।
आनन्दमात्रकरणदेहादेरस्तु कर्तृता ॥ ४१५ ॥

ननु च न यादृशतादृशसहकारः कर्तृत्वघटकः । किं तु देहांतःकरणादिसहकार एवेति चेत् । एवमपि ईश्वरस्य जगत्कर्तृत्वं निराबाधं तस्य आनन्दमात्रदेहादिकरणसद्भावादित्याह **देहेति** ॥ ४१५ ॥

विदितोऽसि भवान्साक्षात्पुरुषः प्रकृतेः परः ।

केवलानुभवानन्दस्वरूपस्सर्वबुद्धिदृक् ।
इति भागवते प्रोक्तेः का नो हानिरतो वद ॥ ४१६ ॥

तत्सद्भावे भागवतोक्तिं स्मारयति **विदित इति** ॥ ४१६ ॥

यदि दृष्टं जडस्यैव सहायत्वं गृहे गृहे ।
तदा दरिद्रदेशस्थः स्वर्णकुंभजलं त्यजेत् ॥ ४१७ ॥

ननु च आनन्दमयस्य देहादेः सहायत्वं नाङ्गीक्रियते प्रतिगृहं जडस्यैव तस्य सहायत्वदर्शनादिति क्षुद्राशंकामनूद्य सोपहासं धिक्करोति **यदीति** । यज्जलं तन्मृद्घटस्थमिति दरिद्रगृहेषु सहचारदर्शनात्स्वर्णकुंभस्थं जलमेव नेति निश्चित्य दरिद्रस्तत्परित्यजेत् । अथ ब्रूयात् न सहचारदर्शनमात्रं व्याप्तिनिश्चायकं किं त्वव्यभिचारादिसंपत्तौ सत्यामिति तदा प्रकृतेऽपि दीयतां सैव दृष्टिरिति भावः । तदुक्तं भगवत्पादैः 'सहदर्शनमात्रेण न व्याप्तिरवसीयते' इति ॥ ४१७ ॥

सुवर्णगरुडस्थस्य यात्रा स्वस्था भवेत्किल ।
साक्षाद्गरुडकण्ठस्थश्चित्रं यात्राऽक्षमः किल ॥ ४१८ ॥

अचेतनस्यैव सहायत्वं न चेतनात्मकस्येति कुहकशङ्कां दृष्टान्तोक्त्या प्रत्याचष्टे **सुवर्णेति** । यात्रायामक्षमः इति विग्रहः ॥ ४१८ ॥

यदा हि रूपनिष्पत्तिर्मुक्तौ जीवस्य जायते ।
न हि तत्प्राकृतं रूपं स्वेनेत्यस्य विरोधतः ॥ ४१९ ॥

किं चैवं जडदेहादेरेव कर्तृत्वघटकत्वे मुक्तौ जक्षणक्रीडनादिकर्तृत्वमेव न सिध्येत् । तत्र प्राकृतदेहाभावात् । 'मुक्तिर्हित्वाऽन्यथारूपं स्वरूपेण व्यवस्थितिरि'ति हि मुक्तेर्लक्षणम् । हित्वाऽन्यथारूपं इति प्राकृतदेहप्रहाणस्य स्वेन रूपेण इति स्वात्मकचिद्रूपेणावस्थितेश्च अत्र स्पष्टं वर्णनादित्याह **यदेति** ॥ ४१९ ॥

मुक्तत्वव्याहतेश्चातश्चिद्रूपं रूपमुच्यते ॥ ४२० ॥

अतः मुक्तिकालीनदेहत्वात् । **रूपं** 'स्वरूपेण व्यवस्थितिरि'त्यत्र **कथितो** देहः ॥ ४२० ॥

येन पर्येति सस्त्रीको यानैर्गच्छति पश्यति ।
हसति क्रीडते रूपं देहोऽयं नात्र संशयः ॥ ४२१ ॥

किं चेदं हसनक्रीडनादिसाधनत्वाद्देह एव भवितुं युक्तं न तु त्वदभिमतं निरवयवं चैतन्यस्वरूपमात्रमिति शंसति **येनेति** । येन रूपेण पर्येति अयं देहः इति योजना । विधेयापेक्षया अयं इति पुल्लिंगः । 'शैत्यं हि यत्सा प्रकृतिर्जलस्ये'तिवत् । इयं च वर्णिता परममुक्तिरेव परंज्योतिरुपसंपत्त्युत्तरभावित्वादित्याह **न संशय** इति ॥ ४२१ ॥

फलाध्याये हि संपद्याविहायेति यमादरात् ।
अमूत्रयत्सूत्रकारस्स मोक्षः परमो ध्रुवः ॥ ४२२ ॥

किं च विमतः परममोक्षः फलाध्याये मुक्तपरत्वेन सूत्रितत्वात् संपत्त्यनन्तरत्वात् संपत्तिरूपत्वाच्च । न चासिद्धिः । 'मुक्तः प्रतिज्ञानात्' संपद्येति अविहायेति च सूत्रकृतैव सिद्धेरुक्तत्वात् । तदाह **फलेति** ॥ ४२२ ॥

यत्र त्वस्येति वाक्यं तु प्रवृत्तं तर्कमुद्रया ।
दृढीकरोतीममर्थं यत्तर्कोऽन्तविपर्ययः ॥ ४२३ ॥

उक्तप्रमाणानामनुग्राहकं श्रौतं तर्कमुदाहृत्य मुक्तौ स्वरूपेंद्रियसद्भावं स्थिरीकरोति **यत्रेति** । अनेन 'यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत्केन कं जिघ्रेदि'ति वाक्यं संगृह्णाति । अस्याः श्रुतेस्तर्कत्वसमर्थनं, अद्वैत्यभिमतनिर्विशेषात्मभावरूपमोक्षनिराकरणपूर्वकं चिद्रूपेंद्रियसद्भावसमर्थनपरत्वं च फलसौरभे 'यदा त्वात्मैक एवे'त्यादिना (श्लो. २९२) निपुणतरमुपपादितम-

नुसन्धेयम् । तर्कस्य प्रमाणानुग्राहकत्वं च 'सोऽयं क्वचित्प्रमाणानामनुग्राहको-ऽपि भवति' इति पद्धतिवाक्यादवसेयम् । **अन्तविपर्ययः अन्ते** अवसाने विपर्ययः यस्य । विपर्ययपर्यवसानरूपाङ्गोपेतः इति यावत् । तर्कस्वरूपं च तत्वनिर्णयटीकायामुक्तं तद्यथा:—

'यदि निर्विशेषचैतन्यमात्रमवशिष्यते न किमपि वस्त्विति मतं स्यात् तदा दर्शनघ्राणादिरूपभोगोऽस्य न स्यात् । तथा येनेश्वरेणेदं सर्वं जीवो विजानाति तज्ज्ञानाभावश्च प्रसज्येत । एवं विज्ञातुरात्मनोऽपि ज्ञानं न स्यात् । निर्विशेषत्वेन कर्तृकर्मभावविरोधात् । भवितव्यं च दर्शनादि-भोगेनेश्वरज्ञानेनात्मज्ञानेन च । अतो निर्विशेषचैतन्यमात्रावस्थानलक्षण-मोक्षोप्यनुपपन्न' इति ॥ ४२३ ॥

अव्ययोक्तेरनेकार्थे शासने त्वनुशासनात् ।
सामान्यवचनं ह्येतत्पूर्ववाक्तु विशेषवाक् ॥ ४२४ ॥

यत्रेत्यस्य यदि इत्यर्थः अनुशासनसिद्ध इत्याह **अव्ययेति** । **सामा-न्यवचनमिति** उपलक्षणं । एकं सावकाशं च । भोगप्रतिपादिकाः **पूर्वो-दाहृतास्तु** वाचः विशेषपरा बहवः निरवकाशाश्च । अतस्तदनुसारेणैवेदं व्याख्येयम् ॥ ४२४ ॥

जम्बुको मेषयुद्धार्थी वृद्ध्यर्थी पोषको जनः ॥ ४२५ ॥

न च भोगश्रुतयो व्यावहारिकभोगपरा इति युक्तं तथात्वे तासाम-**प्रामाण्यापत्तेः** । बाध्यार्थकत्वात् । विरोधेऽन्यतरश्रुतेरप्रामाण्योक्ति-**र्मायिगोमायोरेव** युक्ता न तु वैदिकस्येत्याह **जंबुक इति** । अत्र **जंबुकः** मायी । **युद्धं** विरोधव्युत्पादनं तेनान्यतरस्यातत्वावेदकत्वलक्षण-**मप्रामाण्यं** च । **पोषकः** श्रुतिरक्षकः सूत्रकारः मीमांसकः । **वृद्ध्यर्थी** **विरोधपरिहारेण** उभयोरपि प्रामाण्यरक्षकः ॥ ४२५ ॥

**न चेत्कामान्विता कामरूपिता गानकर्तृता ।
भोक्तृता सर्वकामानां कुप्यन्त्येते विमुक्तिगाः ॥ ४२६ ॥**

न चेत् अस्याः श्रुतेस्तर्कपरतामनङ्गीकृत्य निर्विशेषमोक्षपरता वर्ण्यते चेत् । **एते** कामान्विताऽऽदिचत्वारो धर्माः निरवकाशश्रुतिसिद्धाः **विमुक्तिगाः** परममुक्तावेवोपपद्यमानाः । **कुप्यंति** 'सानन्दत्रितये मोक्षे वेदोक्ते युक्तिसाधिते । द्वेषोऽयं वादिनां कस्मात्तद्विरुद्धेऽथवाऽऽग्रहः' इति सुमध्वविजयोक्तरीत्या निर्निमित्तं दुराग्रहेण वेदाप्रामाण्यवादिने वेदाभिमानिन्यो देवताः कुपिताः सन्तः तं तमसि पातयन्तीति यावत् ॥ ४२६ ॥

**तत्र त्वापातवाक्यार्थाच्छून्यतैवेत्यपार्थता ।
चित्रचिद्रूपदेहास्तज्जीवास्सर्वेऽपि सर्वदा ॥ ४२७ ॥**

एतद्वाक्यार्थत्वेन परोक्तो मोक्षस्तु शून्यभावापत्तिरूपतमस एव नामांतरमित्याह **तवेति** । ज्ञानभोगादिसकलविशेषरहितावस्थाया दुःखतरात्मकत्वस्य स्पष्टत्वात् । यथोक्तं 'मग्नस्य हि परेऽज्ञाने किं न दुःखतरं भवेदि'ति । भाषितः च परेणैव विष्णुसहस्रनामगतशून्यपदव्याख्यानावसरे निर्विशेषस्य शून्यभावः 'निर्विशेषत्वाच्छून्यवच्छून्यः' इति । **तत्** तस्मात् । **सर्वदा** संसारे मुक्तौ च । **सर्वेऽपि** त्रिविधाः । **चित्रचिद्रूपाः** त्रिविधचेतनात्मकदेहोपेताः । चित्रेत्यनेन मुक्तियोग्यानां ज्ञानानन्दात्मकत्वं मध्यमानां मिश्ररूपत्वं अधमानां दुःखात्मकत्वरूपं वैचित्र्यं स्वरूपदेहस्याभिप्रैति । यद्वा **सर्वेऽपि** चतुर्विधमुक्ताः **चित्रेति** मौक्तभोगसाधनस्त्रीपुरुषादिलोकविलक्षणेत्यर्थः ॥ ४२७ ॥

**चिद्रूपाकारहेतुत्वाल्लिङ्गदेहेऽपि तत्पदम् ।
बन्धे तु प्राकृतोऽप्यस्ति मुक्तौ चिन्मात्रकं वपुः ॥ ४२८ ॥**

चिद्रूपाकारः आव्रियमाणः, हेतुः स्वाकारस्य यस्य इति विग्रहः । इदं च गुणसौरभे यवनस्त्रीकञ्चुकदृष्टान्तोक्त्या विवृतमिति भावः । **तत् पदं** लिङ्गदेहपदम् । लीनं स्वरूपदेहाकारं गमयतीति व्युत्पत्त्येति भावः । आव्रियमाणस्वरूपदेहस्याकारज्ञापने स्वस्य लिङ्गत्वादित्याशयः ॥ **प्राकृतोऽपि** इत्यत्रापिपदेन चिन्मात्रस्य समुच्चयः । तदुक्तं भगवत्पादैः 'जीवोपाधिर्द्विधा प्रोक्तः स्वरूपो बाह्य एव च । बाह्योपाधिर्लयं याति मुक्तावन्यस्य तु स्थितिः' इति ॥ ४२८ ॥

हरेस्तु नित्यमुक्तस्य देहस्सर्वत्र सर्वदा ।
बलज्ञानप्रभासौख्यसौन्दर्यादिगुणात्मकः ॥ ४२९ ॥

तुना कदाचिन्मुक्तव्यवच्छेदः । **नित्यमुक्तस्येति सर्वत्र सर्वदा** बलज्ञानादिगुणात्मकत्वे हेतुः । **सर्वत्र** सर्वरूपेषु । तदुक्तं भगवत्पादैः 'आनन्दमात्रकरपादमुखोदरादिः । सर्वत्र च स्वगतभेदविवर्जितात्मा' इति ॥ ४२९ ॥

तस्यैष आत्मा विवृणुते तनूं स्वामिति श्रुतिः ।
भगवत्प्राप्तितः पश्चात्तनुं वक्ति विमुक्तिगाम् ॥ ४३० ॥

'यमेवैष वृणुते तेन लभ्यः' इति पूर्वभागः वाक्यस्यात्रानुसन्धेयः । इयं च निरवकाशा 'विवृणुते' इति श्रुतिः पूर्वोक्तं मुक्तस्वरूपदेहादिसद्भावरूपं' सर्वं प्रमेयजातं विवृणुते इति ध्वनिः । तदेव विवृणुते भगवदित्यादिना दशभिः । 'एव वृणुते' इति श्रुत्युक्तं वरणं भगवतः परमप्रसाद एव । 'तेन लभ्यः' इत्युक्तं लभ्यत्वं प्राप्तिः मुक्तिरूपैव । तत्रापि तनूं स्वामित्युक्तः स्वरूपदेहसद्भावः स्पष्ट एवेति भावः ॥ विवृणुते तनूमित्यत्र यतिभङ्गः शास्त्रत्वेन समाधेयः । एवमुत्तरत्रापि ॥ ४३० ॥

तदाऽपीशतनोस्साक्षात्कारं वा वक्ति वाग्घि सा ।
अर्थद्वयं यतो वाक्यस्यास्य श्लोक्यं बुधैस्सदा ॥ ४३१ ॥

अयं श्लोको मुक्तजीवस्येव नित्यमुक्तपरमात्मनोऽपि विग्रहसद्भावे प्रमाणमित्याह **तदाऽपीति** । भगवत्प्राप्तितः पश्चादपि । ईश्वरतनोरपीति वा योजना । न केवलं जीवतनोरित्यर्थः । स्वशब्दस्य समभिव्याहृतयोः तदेतच्छब्दार्थयोर्जीवपरयोरुभयोः परामर्शकत्वात् इत्याह **अर्थद्वयमिति** ॥ ४३१ ॥

तनुश्शरीरमेवेयं रूपमात्रं न वै तनुः ।
घटस्वरूपे किं कश्चिद्विपश्चित्प्राह देहताम् ॥ ४३२ ॥

तनुशब्दश्च शरीरवाच्येव न तु स्वरूपमात्रवाचीत्येतद्व्यतिरेकमुखेनाह **तनुरिति** ॥ ४३२ ॥

स्वामित्युक्त्या तनुस्सा च स्वरूपैवेति सिद्ध्यति ।
जडान्यदेहनिर्मोक्षात्स्वीयत्वार्थो ह्यपार्थकः ॥ ४३३ ॥

स्वशब्दस्य स्वकीयस्वात्मकेत्युभयार्थकत्वेऽपि अत्र स्वीयत्वार्थकत्वस्यापार्थकत्वात् स्वरूपार्थकत्वमेवेत्याह **स्वामिति** ॥ ४३३ ॥

इच्छामात्रं जडदेहस्य किं महाकरुणाफलम् ॥ ४३४ ॥

भगवदत्यर्थप्रसादजन्याविर्भावविषयत्वाच्च न जडदेहोऽत्रार्थ इत्याह **इच्छामात्रमिति** ॥ ४३४ ॥

अनादिनित्यता चा(स्या)स्य व्यक्तिमात्रप्रकीर्तनात् ।
सिद्धा तेन च संसिद्धा जडान्यैव तनूरियम् ॥ ४३५ ॥

आविर्भावोक्त्याऽनादित्वं क्रियासातत्यार्थकेन विवृणुत इत्यत्रत्यलटा नित्यत्वं च सुगममित्याह **अनादिनित्यता चेति** ॥ ४३५ ॥

अतश्श्रुत्यर्थतत्त्वज्ञास्तनुं मुक्तपरात्मनोः ।
चिदानन्दमयीं प्राहुर्न प्राहुर्जडदेहिताम् ॥ ४३६ ॥

श्रुत्यर्थतत्त्वज्ञाः स्वतनुशब्दयोरर्थविमर्शनेन तन्निश्चयवन्तः । **आनन्दमयीं** आनन्दात्मिकां तत्प्रचुरां च ॥ ४३६ ॥

सा च जन्मजरारोगह्रासनाशाद्यभावतः ।
न क्लेशदा तयोस्तस्मात्कथं दोषावहा वद ॥ ४३७ ॥

'नानिष्टभोगस्तेन स्यात्प्राकृतक्षेत्रसंभवः' इति सुमध्वविजयोक्तमाह **सा चेति** ॥ ४३७ ॥

किं तु सौंदर्यसौरभ्यप्रभामन्दस्मितेक्षितैः ।
आलिंगनैरालपनैश्चित्रमाल्यानुलेपनैः ॥ ४३८ ॥

परा(र्घ्य)र्घ्यभूषणैर्मौक्तनृत्तवादित्रकीर्तनैः ।
भोगैश्च विविधैर्नित्यं महोत्साहावहैव हि ॥ ४३९ ॥

न केवलं नानिष्टभोगः किन्तु संकल्पमात्रेणनतयथेष्टभोगश्चेत्याह द्वाभ्यां **किं त्विति** ॥ ४३८ ॥ ४३९ ॥

अतस्तया शबलता न विद्वज्जनसंमता ॥ ४४० ॥

अतः अनभीष्टाहेतुत्वात् अभीष्टप्रयोजकत्वाच्च । **तया** स्वरूपतन्वा । **शबलता** स्वसद्भावनिमित्तकदोषहेतुना ॥ ४४० ॥

ददती शं बलं च त्वच्छबलत्वं बहिः क्षिपेत् ।
बिंदुमात्राधिकत्वेऽपि प्रबलो दुर्बलं क्षिपेत् ॥ ४४१ ॥

ददती तनुरित्यनुकृष्यते । स्थापयन्ती । **त्वच्छबलत्वं** तत्संबन्धनिमित्तेन त्वयाऽऽरोप्यमाणं विकारित्वम् । **बहिः क्षिपेत्** निराकुर्यात् ।

उक्तार्थं साहित्यमुद्रया रञ्जयति । **बिन्दुमात्रेति** । शं इत्यत्र बिन्दोरधिकवादित्यर्थः ॥ ४४१ ॥

चित्रप्रकाशबलतश्शबलो वाऽस्तु नः प्रभुः ।
यतोऽस्य हासो धवलस्तनुर्नीलाऽधरोऽरुणः ॥ ४४२ ॥

'श्यामाच्छबलं प्रपद्ये' इति भाष्योदाहृतश्रुतिसिद्धं सौन्दर्यपोषकं अप्राकृतनानावर्णसमाहारात्मकं शबलत्वं परमात्मनि पुरस्क्रियत इत्याह **चित्रेति** । उपपादयति **हास इत्यादिना** अधर इत्युपलक्षणं लक्षणशास्त्रानुसारेण पादपाणितलादीन्यपि ग्राह्याणि । तदुक्तं सुमध्वविजये 'अरुणीभूतमिवारुणं स्वयं' इति । 'शबलप्रभादिविविधद्युतिमत्सुखबोधसौरभसुरूपगुणमि'ति च ॥ ४४२ ॥

नान्तं न मध्यं नैवादिं यस्यापश्यद्रणेऽर्जुनः ।
अनन्तबाहुजठरवक्त्रनेत्रभ्रमद्भ्रुवः ।
विश्वरूपाख्यरूपस्य दृष्टस्य ज्ञानचक्षुषा ॥ ४४३ ॥

अनन्तगन्धाभरणान्यनन्तकुसुमानि च ।
अतन्तान्यम्बराण्यस्य केन दत्तानि सर्वदा ॥ ४४४ ॥

उक्तार्थं स्पष्टां गीतोक्तिं प्रमाणयति । **नान्तमिति** अत्रोक्तं आदिमध्यान्तशून्यत्वं पूर्वप्रकृतदेहस्यैवेति स्पष्टम् । भ्रमद्भ्रुवः इति षष्ठ्यन्तं रूपस्येत्यनेन संबध्यते **केन दत्तानि** । न केनापि । दर्शनसमये संपादकाभावादसंभवाच्च । किं तु लक्ष्म्यात्मकानि नित्यान्येवेत्याह **सर्वदेति** ॥ ४४३ ॥ ४४४ ॥

सवित्री तस्य देहस्य नादितिर्नापि देवकी ।
यो दौत्यमाचरद्देहस्स एवैतादृशः किल ॥ ४४५ ॥

तस्य अर्जुनेन दृष्टस्य । **देहस्य** विश्वरूपस्य । **नेति** । कृत्स्नजगदाधारस्य परिच्छिन्नजननीदेहगर्भगतत्वासंभवादिति भावः । अवताररूपस्य अर्जुनसारथेरस्य विश्वरूपस्य चात्यन्ताभेदमाह **स एवेति** । सावधारणप्रत्यभिज्ञयाऽणुमात्रोऽपि भेदो नास्तीति ज्ञाप्यते ॥ ४४५ ॥

अनाद्यनन्तदेहेऽस्मिन्क्व निराकारता च ते ।
दिव्यदृष्ट्यैव दृष्टोऽयं कथं मायामयो भवेत् ॥ ४४६ ॥

क्व कस्मिन् काले । सार्वकालीने उपगमापगमयोरभावात् तदभावे च निराकारताशङ्काया गर्भस्रावेणैव निरासादिति भावः । मायामयत्वशङ्कामपाकरोति **दिव्येति** 'दिव्यं ददामि ते चक्षुरि'ति वचनात् ॥ ४४६ ॥

मायादूरत्ववाचा च नेदं मायामयं वपुः ॥ ४४७ ॥

'मायां व्युदस्य चिच्छक्त्ये'ति प्रागुक्तप्रमाणबाधितं च मायामयत्वमिति स्मारयति **मायेति** ॥ ४४७ ॥

अपरिच्छिन्नदेहोऽयं पार्थप्रत्यक्षगोचरः ।
परिच्छिन्नभवन्मायामयो नैवेति मे मतिः ॥ ४४८ ॥

देशतोऽपरिच्छिन्नस्य न परिच्छिन्नमायोपादानकत्वमित्याह **अपरिच्छिन्नेति** ॥ ४४८ ॥

तत एव स सत्योऽभून्नित्यश्च परमात्मवत् ।
ब्रह्मवच्चिन्मयोऽप्यासीत्स्वेच्छयानैव मद्बयात् ॥ ४४९ ॥

तत एवं देशतोऽपरिच्छिन्नत्वादेव । विमतो देहः सत्यः देशतः अपरिच्छिन्नत्वात् परमात्मवत् । नित्यश्च तत एव तद्वदेव इति प्रयोगौ ध्येयौ । 'अविनाशि तु तद्विद्धि येन सर्वमिदं ततम्' । इति गीतोक्तं व्याप्तिसमर्थनं अनुसंधेयम् । कालप्रकृत्यादिकोऽपि दृष्टान्त ऊह्यः ब्रह्मवत । एवं विमतः देहः शुद्धचिद्रूपः अपरिच्छिन्नत्वात् ब्रह्मवत् व्यतिरेकेण प्रपञ्चवदिति युक्त्यन्तरमप्याह **ब्रह्मवदिति** । परिच्छिन्नत्वं मिथ्यात्वे हेतूकुर्वता त्वयैवायं न्यायोऽभ्युपगत इति न व्यभिचारादिशङ्कावकाश इत्याह **त्वन्नयादेवेति** ॥ ४४९ ॥

क्वानन्तसूर्यसंकाशप्रकाशो मुक्तिदः प्रभुः ।
क्व ते तमोमयी माया यं प्रपन्नोऽपि यां तरेत् ॥ ४५० ॥

किं च मायाशब्दस्य अन्धकारः अर्थः अज्ञानं वा उभयथाऽपि न देहस्य मायामयत्वमित्याह **क्वेति क्व त, इति च** । विमतो देहः न अन्धकारमयः तद्विरोधिप्रकाशात्मकत्वात् । तच्च 'दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता' इति वचनात्सिद्धम् । न अज्ञानमयः अज्ञाननिरसनहेतुप्रपत्तिविषयत्वात् । तच्च 'नष्टो मोहः स्मृतिर्लब्धा' इत्यादिवचनात्सिद्धमिति भावः ॥ ४५० ॥

प्रायो दग्धपटप्राया या यज्ज्ञानोदये हृदि ।
मायानिस्तरणोपायस्सोऽयं मायामयः किल ॥ ४५१ ॥

मायानिश्शक्तीकरणहेतुज्ञानविषयत्वाच्च न मायामयत्वमित्याह **प्राय इति** । जीवन्मुक्तिदशायां किंचिदनुवर्तमानाऽपि दग्धपटवन्न कार्यकरी 'किं त्वन्यदेहाय गुणान्न वृंक्ते' इत्युक्तेरिति भावः ॥ ४५१ ॥

अस्त्यस्तितोक्तौ नास्तीति प्रतिवागतिवादिनि ।
सहस्रशीर्षा श्रौतो यो नैकशीर्षोऽप्यसौ किल ॥ ४५२ ॥

पुरुषसूक्तप्रतिपाद्यत्वाच्च विष्णुरेव परं ब्रह्मेति प्रतिपादयितुं सौरभशेषः । तत्र सूक्तेऽस्मिन् निरवयवस्य प्रतिपादनं ये मन्यन्ते तेषां मुखराणां प्रजल्पमपहसति **अस्तीति** । 'सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी' इति लक्षणं मायावादिनां ब्रह्मणो निराकरणं प्रजल्पतां बुद्धौ समन्वेति । तैः खलु सहस्रशीर्षा इत्यादिश्रुतिसिद्धं ब्रह्म निराकारतया प्रतिपाद्यते इत्याह **सहस्रेति** । तत्ववादिभिः **अस्तितोक्तौ** ब्रह्मणोऽनेककरचरणादिसद्भावोक्तौ सत्यां **अतिवादिनि** प्रमाणमतिक्रम्य तदुक्तवैपरीत्येन निराकारतावादिनि मायिनि **नास्तीतिप्रतिवाक्** सावयवत्वं नास्ति इति प्रतिवचनं **अस्ति** इति वाक्ययोजना ॥ ४५२ ॥

छली सूर्याच्छादनाय करं कोऽपि प्रसारयेत् ।
सप्रकारं हि यं विद्वान्मुच्येत स किलाल्पकः ॥ ४५३ ॥

याजुषपुरुषसूक्ते 'तमेवं विद्वानमृत इह भवति' इति श्रूयते । तत्र एवं इत्यनेन तत्सूत्रोक्तप्रकारेणेत्यर्थो लभ्यते । तथा च मोक्षहेतुज्ञानविषयः सूक्तोक्तो विष्णुरेवेति निश्चयो भवति । स्थितेऽप्येवं कुवादिनः विराट्पुरुषः अल्पक एव तत्सूक्तप्रतिपाद्य इति सङ्गिरन्ते । तेषां दुर्नीतिं दूषयति **छलीति** । प्रमाणप्रमितार्थापह्नवदुस्साहसी । सूर्यवत्स्पष्टप्रतिभासस्य सूक्तप्रतिपाद्यमहापुरुषरूपार्थस्य आच्छादनाय अपलापेच्छया । **करं** अल्पपुरुष एव तत्प्रतिपाद्य इति स्ववाक्यम् । **प्रसारयति** प्रयुंक्ते इत्यर्थः ॥ ४५३ ॥

अतः पुरुषसूक्तस्य विराट्पुरुषसूक्तताम् ।
वदन्तो वादिनः पूर्वोत्तरज्ञानविवर्जिताः ॥ ४५४ ॥

तेषां छलत्वं व्यनक्ति **अत इति** । **पूर्वोत्तरज्ञानविवर्जिताः पूर्वं** पुरुषसूक्तम् । **उत्तरं** तमेवं विद्वानिति वाक्यम् । तज्ज्ञानविवर्जिताः । यद्वा यजुर्वेदपुरुषसूक्तसमाख्याबलेन ऋग्वेदीयतत्सूक्तेऽपि महापुरुष एव प्रतिपाद्य इति ज्ञानविवर्जिताः ॥ ४५४ ॥

सहस्रशीर्षं देवं विश्वाक्षं विश्वशम्भुवम् ।
विश्वं नारायणं देवमक्षरं परमं पदम्   ॥ ४५५ ॥

इति नारायणस्यैव याजुषोपनिषज्जगौ ।
यतस्सहस्रशीर्षत्वं ततः पुंसूक्तगोऽप्यसौ   ॥ ४५६ ॥

याजुषोपनिषदि सुस्पष्टं नारायणपदेनैव विशेष्यं निर्दिश्य सहस्रशीर्षत्वादिविशेषणाभिधानात् पुरुषसूक्तेऽपि तद्विशेषणसमाख्यया नारायण एव विशेष्य इत्याह द्वाभ्यां **सहस्रेति** ॥ ४५५ ॥ ४५६ ॥

अग्निर्मुखन्त इत्याद्यैः पद्यैर्यं कृष्णमम्बुनि ।
अक्रूरोऽस्तौत्स एवार्थात्पुंसूक्तार्थो हि धीमताम् ॥ ४५७ ॥

अक्रूरेण यमुनायां अन्तर्जले श्रीकृष्णमवलोक्य अग्न्यादिदेवताजन्महेतुमुखाद्यवयववत्त्वेन श्रीकृष्णस्य स्तुतिः कृता । तत्समाख्ययाऽपि पुंसूक्तप्रतिपाद्यः कृष्ण एवेति सिध्यतीत्याह **अग्निरिति** ॥ अत्र अग्निर्मुखं इत्यैक्यव्यपदेशः 'यस्माद्यज्जायते चाङ्गाल्लोकवेदादिकं हरेः । तन्नामवाच्यमङ्गं तद्यथा ब्रह्मादिकं मुखं' इति वैश्वानरभाष्योदाहृतप्रमाणानुसारेण कार्यकारणभावपरो व्याख्येयः ॥ ४५७ ॥

तत्र गत्वा जगन्नाथं देवदेवं वृषाकपिम् ।
पुरुषं पुरुषसूक्तेन उपतस्थे समाहितः   ॥ ४५८ ॥

इति भागवते विष्णौ पुरुषाख्यामुदीरयन् ।
यतः पुरुषसूक्तं च तत्सूक्तं स्पष्टमुक्तवान् ।
अतोऽप्यकुशलास्ते वै वेदार्थकथनोद्यताः   ॥ ४५९ ॥

चतुर्मुखः क्षीरसागरं गत्वा पुरुषसूक्तेन पुरुषं विष्णुमुपतस्थे इति भागवते वर्ण्यते । तत्र उपतस्थे इति उपस्थानोक्त्या पुरुषसूक्तस्य विष्णुमन्त्रत्वं तत एव विष्णोः तत्सूक्तप्रतिपाद्यत्वं चावसीयते । न हि अन्यमन्त्रेण अन्योपस्थानं संभवतीत्याह **तत्रेति** । **ते** पुरुषसूक्तं न विष्णुपरं इति ब्रुवाणाः ॥ ४५८ ॥ ४५९ ॥

साक्षान्मोक्षाङ्गतोक्तेस्सा मूर्तिरप्राकृतैव हि ।
न हि प्राकृतविज्ञानादप्राकृतपदं भवेत् ॥ ४६० ॥

साक्षान्मोक्षः अमृत इह भवतीत्यत्रोक्तः परममोक्षः । यद्वा मोक्षं प्रति साक्षादङ्गत्वोक्तेः इति योजना । अधिकारिनिष्ठोपायेष्विति भावः । प्रसादस्तु भगवन्निष्ठः । **सा** पुरुषसूक्तोक्ता सहस्रशीर्षत्वाद्यवयवोपेता **मूर्तिः अप्राकृता** अप्राकृतमोक्षाख्यपदप्राप्त्युपायज्ञानविषयत्वात् व्यतिरेकेण संसारिदेहवत् इति प्रयोगो विवक्षितः । विपक्षे हेतूच्छित्ति बाधकमाह **न हीति** ॥ ४६० ॥

सहस्राक्षिशिरःपादैर्यतोऽत्यन्तविलक्षणः ।
पुरुषः पूर्ववाक्येन विश्वव्याप्तश्च कीर्त्यते ॥ ४६१ ॥

इदानीं 'पुरुष एवेदं सर्वं' इति वाक्यस्यैक्यपरत्वाभावं उपक्रमादिभिर्निर्धार्य स्वातन्त्र्यैक्यपरत्वं समर्थयते **सहस्राक्षीत्यादिना** । **अत्यन्तविलक्षणः** जडजीवेभ्यः । जडे शिरआद्यभावात् जीवे अनन्तशिरआद्यभावाच्चेति भावः । **विश्वव्याप्तः** इति 'स भूमिं विश्वतो वृत्वा' इति **पूर्ववाक्येन** कथ्यते ॥ ४६१ ॥

उतामृतत्वस्येशानो यदन्नेनातिरोहति ।
एतावानस्य महिमा ततो ज्यायांश्च पूरुषः ।
इत्युत्तरत्र चेशत्वपूर्वोऽस्य महिमोच्यते ॥ ४६२ ॥

ईशत्वपूर्वः मुक्तशत्वसंसार्यतिक्रांतत्वसर्वोत्तमत्वपूर्वः ॥ ४६२ ॥

अतः पुरुष एवेदं सर्वमित्यपि नैक्यवाक् ।
उपक्रमोपसंहारौ यद्वाक्यार्थनियामकौ ॥ ४६३ ॥

अतः उपक्रमोपसंहारयोः सोपपत्तिक सर्ववैलक्षण्यस्यैव वर्णनात् । **नैक्यवाक्** स्वरूपैक्यवाक् न भवति किंतु 'स्वातन्त्र्ये च विशिष्टत्वे स्थानम-त्यैक्ययोरपि । सादृश्ये चैक्यवाक् सम्यक् सावकाशा यथेष्टतः' इति भगवत्पादोक्तिमनुरुध्य स्वातन्त्र्याद्यैक्यपरा ॥ ४६३ ॥

यदधीना यस्य सत्ता तत्तदित्येव भण्यते ।
राजैव राष्ट्रमित्यादिप्रयोगस्तन्निदर्शनम् ॥ ४६४ ॥
अतः पुरुष एवेति पुंसस्स्वातन्त्र्यवागियम् ॥ ४६५ ॥

तत्र लोकन्यायं निदर्शनं चाह **यदिति** ॥ ४६५ ॥ ४६५ ॥

पूर्वोत्तरोक्तसुगुणरत्नमाला महामणिम् ।
मध्ये बिभर्ति न पुनः काचं वाचामगोचरम् ॥ ४६६ ॥

महामणिं स्वातंत्र्याख्यश्रेष्ठगुणं **मध्ये** 'पुरुष एवेदं सर्वं' इति वाक्ये । गुणेषु तारतम्याभावेऽपि स्वातंत्र्यस्य सर्वगुणानां दोषाभावानां च उपपादकत्वात् श्रेष्ठत्वं वैविक्षिकम् । उपपादनं च सर्वधर्मोपपत्तेश्चेति नये स्पष्टम् । **काचं** ऐक्यं गुणविरोधेन नैच्यापादकम् । **वाचामगोचरं** एकधाऽनुद्रष्टव्यमिति श्रुत्या ऐक्यस्य ब्रह्मस्वरूपमात्रत्वाङ्गीकारात् ब्रह्मणश्चा-वाच्यत्वोपगमात् ॥ ४६६ ॥

यत्स्वप्रकाशात्मरूपमैक्यं ते वाक्यदूरगम् ॥ ४६७ ॥

तदेवाह **यदिति स्वप्रकाशेति** इतरावेद्येत्यर्थः । किं चैक्यं संसर्गः । अखण्डार्थवादे वाचां तदविषयत्वेनेत्यपि बोध्यम् ॥ ४६७ ॥

विरुद्धधर्मास्त इमे साक्षान्मोक्षाङ्गताबलात् ।
अनिवर्त्याश्च सत्याश्च कदैक्यावसरो वद ॥ ४६८ ॥

मोक्षाङ्गताबलात् यत्र मोक्षाङ्गत्वं तत्रानिवर्त्यत्वं सत्यत्वं च यथा ब्रह्मणीति व्याप्तिबलात् ॥ ४६८ ॥

एवं विद्वानिति ज्ञानं श्रूयते सप्रकारकम् ।
निष्प्रकारकधीवेद्यं तेऽद्वैतं नात्र शोभते ॥ ४६९ ॥

अखण्डब्रह्मस्वरूपत्वेन त्वदङ्गीकृतं ऐक्यं 'एवं विद्वान्' इति सप्रकारकज्ञानजनकशास्त्रवेद्यं नेत्याह **एवमिति** ॥ ४६९ ॥

एतावानस्यमहिमा ततो ज्यायांश्च पूरुषः ।
इति पूर्वोक्तमहिमा ज्यायस्त्वे हेतुरुच्यते ॥ ४७० ॥

अतः पूर्वोदितोऽप्यर्थस्सर्वोऽपि महिमा भवेत् ।
न चेद्विरुद्धो हेतुस्स्यादनुवादोऽप्यनन्वितः ॥ ४७१ ॥

एतावानिति परामर्शः पूर्वोक्तस्य महिमत्वमाह । ऐक्यं च न महिमेति कथं तत्पूर्ववाक्यार्थः स्यादित्याह **एतावानिति** । ऐक्यस्य अत्रोक्तज्यायस्त्वे हेतुत्वाभावाच्च न तत् वाक्यार्थ इत्याह **इतीति** । **विरुद्धः** ऐक्यस्य ज्यायस्त्वाभावेनैव व्याप्तत्वादिति भावः । **अनन्वितः** ऐक्यस्योक्तत्वे तस्य महिमत्वाभावादिति भावः ॥ ४७० ॥ ४७१ ।

सोऽमृतस्याभयस्येशो मर्त्यमन्नं यदत्यगात् ।
इति स्मृत्यनुसारेण मर्त्यामृतपदोक्तयोः ॥ ४७२ ॥

मुक्तामुक्तचितोरीशो ह्युत्तरार्धे स कथ्यते ।
अतो जडपदार्थस्यापीशत्वं वक्ति पूर्ववाक् ॥ ४७३ ॥

सोऽमृतस्याभयस्येति भागवतश्लोकः उतामृतत्वस्येशानः यदन्नेनातिरोहति इति सूक्तखण्डव्याख्यानरूपः । तेन सूक्तस्थान्नशब्दः मर्त्यभूतसंसारिजीवपरो व्याख्यातः । तथा चैतेन सूक्तभागेन परमात्मनो मुक्तामुक्तनियामकत्वमुक्त्वा जडनियामकत्वं 'पुरुष एवेदं सर्वं' इति **पूर्ववाक्येन** वचनं सन्दर्भोचितमित्याह **मुक्तामुक्तेति** । तथाचासङ्कुचितसर्वोत्तमत्वमहिमसिद्धिरिति भावः ॥ ४७३ ॥

दृश्यमानमिदं सर्वं प्रायशो जडमेव हि ।
न चेदतिविरुद्धोक्तिरियं स्यात्सर्ववादिनाम् ।
मुक्तामुक्तचितोरीशः कथं सर्वजडात्मकः ॥ ४७४ ॥

इदंपदम् । दृश्यमानवाचि स्वरसतो जडमेव वक्ति । परजीवान् परमात्मानं च द्रष्टुं योगिनः प्रभवन्तीति प्रायश इत्युक्तम् । एवं इदंशब्दस्य जडपरत्वे स्थिते त्वदुक्तरीत्या ऐक्यपरतयाऽर्थकथनं अतिविरुद्धं आपद्यते इत्याह **न चेदिति** । स्वातन्त्र्यैक्यं नाङ्गीक्रियते चेत् इत्यर्थः ॥ ४७४ ॥

देहोऽप्यात्मा न चेत्सर्वं दृश्यमानमिदं जडम् ।
कथं पुरुष एव स्यादेवेत्यत्यन्तदुर्घटम् ॥ ४७५ ॥

यदा जडैकदेशदेहैक्यमपि आत्मनो दुर्घटं मम देह इति प्रमाबाधितत्वात् । तदा किमु वाच्यं सर्वजडैक्यस्यात्यन्तदुर्घटत्वमित्याह **देह इति** ॥ ४७५ ॥

विशिष्टैक्यं हि तस्यार्थो यज्जीवेऽपि न युज्यते ॥ ४७६ ॥

पुरुष एवेदं इत्यत्र एवकारो भागत्यागलक्षणां प्रतिरुन्धानः कृत्स्नेन विशिष्टेन पुरुषेणैवैक्यं विदधाति । विशिष्टैक्यं च त्वया जीवेनापि परस्य नाङ्गीकृतम् । दूरे जडेनेति भावः । येन तदेतद्वाक्यार्थः स्यादित्याह **विशिष्टेति** ॥ ४७६ ॥

नष्टानुत्पन्नजडतो भूतभव्यपदोदितात् ।
ऐक्यं त्वनादिनित्यस्य पुरुषस्येति को वदेत् ॥ ४७७ ॥

यत् भूतं भव्यं इति पदोदितं नष्टानुत्पन्नजडवस्तुजातं **तेनैक्यं** न अनादिनित्यस्य व्याहतेरित्याह **नष्टेति** ॥ ४७७ ॥

भावाभावविरोधश्च नास्ति किं सर्वसंमतः ।
घटोऽपि विद्यमानोऽयं न हि नष्टघटात्मकः ॥ ७८ ॥

व्याघातमेव निदर्शनोक्तिपूर्वकं उपपादयति **भावाभावेति** । प्रागभाव-प्रध्वंसप्रतियोगित्वं तत्प्रतियोगित्वाभावः इत्येतयोः कथमेकत्रावस्थानमिति भावः ॥ घटोऽपीत्यत्रापिपदेन किमु वाच्यं अनादिनित्यस्य सादिविनाश-जडैक्यं न संभवतीति इत्येवं विरोधातिशयं स्फोरयति ॥ ४७८ ॥

पूर्वोक्तमर्थं सर्वं च तच्छब्दोऽयं परामृशेत् ।
कथं विरुद्धयोरेकफलसाधनता वद ॥ ४७९ ॥

बाधकान्तरं चाह **पूर्वोक्तमिति** । **तच्छब्दः** तमेवं विद्वानित्यत्र श्रुतः । पूर्वं च ईशान इति निरवकाशपदेन भेद उक्तः । यदि पुनः **पुरुष एवेदं** इत्यस्य त्वद्रीत्या अभेदः अर्थः स्यात् तर्हि तच्छब्दः पूर्वोक्त-सर्वपरामर्शित्वात् भेदं अभेदं उभयं परामृशतीत्यापतति । न च तथा **संभवति** । यतः 'अमृत इह भवति' इति एकमेव मोक्षरूपं फलं तज्ज्ञानस्य **कथ्यते** । विरुद्धयोर्भेदाभेदज्ञानयोरेकफलसाधनत्वस्यालौकिकत्वात् । **विषपीयूषयोः** दहनतुहिनयोर्विरुद्धकार्यकारित्वस्यैव दर्शनादित्याह **कथ-मिति** ॥ ४७९ ॥

अनपेक्षितसंत्यागः स्वापेक्षितपरिग्रहः ।
कथं स्यात्सूक्तसूत्रेऽस्मिन्दृढबद्धार्थसन्मणौ ॥ ४८० ॥

ननु तच्छब्देन ऐक्यमात्रस्य परामर्शोऽङ्गीक्रियते । भेदस्तु श्रुत्युक्तोऽपि व्यावहारिक इति न तत्परामर्श इति वैयात्येन ब्रुवाणं पराचष्टे **अनपेक्षितेति । दृढबद्धार्थसन्मणौ दृढं** निरवकाशतया **बद्धाः** प्रतिपादिताः अर्थाः ज्यायस्त्वादयः ते एव सन्मणयः यस्मिन् तादृशे सूक्ते **अनपेक्षितसंत्यागः** त्वदनभिमतत्वमात्रेण भेदस्य व्यावहारिकत्वकल्पनेन **संत्यागः** तच्छब्देनापरामर्शः । न हीदं पुरुषसूक्तं दुरुक्तं येन त्वदुक्तं स्वप्रतिपादितार्थस्य मिथ्यात्वं सहेतेति भावः ॥ ४८० ॥

स्वेच्छानुसारिव्याख्या चेन्मीमांसा किन्निबन्धना ।
सूत्रच्छेदं विना मध्यमणेर्नैव हि संग्रहः ॥ ४८१ ॥

स्वेच्छानुसारिव्याख्या स्वसमयमात्रानुरोधेन विरोधिवाक्यानां अतत्त्वावेदकत्वलक्षणाप्रामाण्योक्तिरूपा । **मीमांसा** सर्वेषां वेदवाक्यानां प्रामाण्यपरिरक्षणाय अन्यतरस्य संभवदर्थान्तरदर्शनेन विरोधं परिहृत्य शास्त्रस्य एकवाक्यतासमर्थनरूपा । **सूत्रच्छेदं** भगवतः कल्याणगुणमणिग्रथितमालायाः आधारभूतैकसूत्रात्मकस्य **सूक्तस्य छेदं** अप्रामाण्यं विना । त्वदभिमतैक्यवाक्यस्य पूर्वोत्तरवाक्ययोरतत्त्वावेदकत्वकल्पनां विनेति यावत् । **मध्यमणेः** मध्यवाक्योक्तस्य ऐक्यस्य **नैव हि संग्रहः** तच्छब्दपरामर्शविषयताऽसिद्धिः । विरोधादेवेति भावः ॥ ४८१ ॥

छिन्ने सूत्रे त्वनालम्बः परामर्शोऽप्ययं पतेत् ।
अतो ज्ञानैकसाध्योऽर्थो न स्यात्ते स्यात्तमोऽन्ततः ॥ ४८२ ॥

छिन्ने सूत्रे तत्सिद्धये पूर्वोत्तरवाक्ययोरप्रामाण्याङ्गीकारे सति सूक्तोक्तत्वाविशेषात् ऐक्यवाक्यस्याप्यप्रामाण्यापत्तौ **अनालम्बः** पूर्वोक्तार्थानां सर्वेषां मिथ्यात्वेन विषयशून्यः । **अयं परामर्शः** तमेवं इतिरूपः । **पतेत्**

बाधितः स्यात् । किं ततः । इदं ततः । वेदाप्रामाण्यवादिनस्तव तदर्थज्ञानैकसाध्यो मोक्षरूपपुरुषार्थो न स्यात् । प्रत्युत 'तत्प्रमाणस्य निन्दा च' इति परिगणितपरतत्त्वद्वेषशीलस्य अन्ततः तम एव स्यात् ॥४८२॥

तस्मान्मीमांसकैरार्यैरुक्त एवार्थ इष्यते ।
अन्यो ह्यनर्थः श्रोतुर्वा वक्तुर्वा न मनोहरः ॥ ४८३ ॥

मीमांसकैः भगवत्पादैः **आर्यैः** श्रीमदाचार्यैः **उक्तः अर्थः** स्वातन्त्र्यैक्यादिरूपः । **अन्यः अर्थः** स्वरूपैक्यरूपः । **न मनोहरः** तमःफलकत्वादित्यर्थः ॥ ४८३ ॥

व्यत्यासश्च विभक्तीनां वेदव्यासस्य संमतः ।
अन्नेनेति तृतीयां यो द्वितीयार्थेऽन्वशिक्षत ॥ ४८४ ॥

व्यत्यासः आपातार्थे बाधिते विभक्तिविपरिणामेन योग्यार्थोक्तिः । अत्रैव सूक्ते तत्संमतिं निदर्शयति **अन्नेनेति** 'यदन्नेनातिरोहति' इति अतिरोहणार्थातिक्रमस्य कर्माकांक्षस्य करणार्थकान्नपदोत्तरतृतीययाऽन्वयानुपपत्तेः तत्सूक्तव्याख्यानरूपे भागवते द्वितीयस्कंधे विभक्तिविपरिणामेन द्वितीयाविभक्तिमाश्रित्य 'अन्नं यदत्यगात्' इत्येव तदर्थो व्याख्यातः । सुपां सुलुगित्यादिसूत्रप्रणेतुः पाणिनेरपि न्यायोऽयं संमत इत्यप्याशयः ॥ ४८४ ॥

अतः पुरुष एवेति प्रथमा पञ्चमी यदा ।
सदा सर्वनिमित्तत्वमहिमा पुंसि वर्ण्यते ॥ ४८५ ॥

विभक्तिव्यत्ययेन लब्धं भगवतो महिमाऽतिशयरूपमर्थं अनेकधाऽऽह **अत इति** । **सर्वनिमित्तत्वमहिमा** तस्माद्विराळजायत प्राणाद्वायुरजायत इत्येव अत्रैव सूक्त उक्तः इत्यर्थः ॥ ४८५ ॥

यदा तु सप्तमी सर्वाधारत्वं वर्णयेत्तदा ॥ ४८६ ॥

सप्तमी इयं न पुरुषे एवेति पदच्छेदेनापि लभ्यत इति तुशब्देनाह ॥ ४८६ ॥

सूक्तस्यैकार्थता चैवं मत्येव स्यान्न चान्यथा ।
यतस्सर्वजगत्कर्ता पुरुषस्सोऽत्र कीर्त्यते ॥ ४८७ ॥

एकार्थता विष्णोः सर्वोत्कर्षरूपैकार्थप्रतिपादकत्वम् ॥ ४८७ ॥

अपि भिक्षाऽटनं कृत्वा ज्ञातीन्रक्षितुमर्हति ।
यदियं भारती भीमसेनदर्शितपद्धतिः ॥ ४८८ ॥

भिक्षाटनं विभक्त्यन्तरार्थाश्रयणम् । **ज्ञातीन्** पूर्वोत्तरवाक्यानि **रक्षितुं** परापादिताप्रामाण्यादपोह्य तत्प्रामाण्यं स्थापयितुम् । **भारती** श्रुतिः । **भीमसेनः** भाष्यकारः तदपरावतारः । **तेन दर्शितपद्धतिः** तदुक्तदिशा अर्थवर्णनपरा । तदुक्तं वैश्वानरनयभाष्ये 'पुरुषविधमपि चैनमधीयते' इति सूत्रखण्डव्याख्यानावसरे 'यथैव पौरुषं सूक्तं नित्यं विष्णुपरायणमि'त्यादिब्राह्मपुराणवचनोदाहरणेन तथा 'यथा हि पौरुषं सूक्तं विष्णोरेवाभिधायकमि'त्यादिबृहत्संहितावाक्योदाहरणेन च विष्णोः सर्वोत्तमत्वे तात्पर्यमस्य सूक्तस्य ॥ ४८८ ॥

न चेत्कथमभेदार्था यतो वाक्यंभि नत्ति सा ।
संभवत्येकवाक्यत्वे वाक्यभेदो हि दूषणम् ॥ ४८९ ॥

अन्यथा वाक्यभेदो दोष इत्याह **न चेदिति** । तत्प्रकारश्च पूर्वमुक्त इत्याशयः । स्वयं इयं श्रुतिः वाक्यभेदं कुर्वती चेत्कथमभेदं साधयेदिति च ध्वनिः ॥ ४८९ ॥

जडात्मैक्यप्रसंगेन मुख्यार्थस्तु तत्रापि न ।
याञ्चायां तु प्रवृत्तेन सदन्नं किं न याच्यते ॥ ४९० ॥

तत्रापि न । जडस्य मिथ्यात्वेन तदैक्ये ब्रह्मणोऽपि मिथ्यात्वापत्तेः । **याश्रायां** सर्वशब्दस्य सङ्कोचेन जडमात्रार्थाश्रयणेन तथा पुरुषः इत्यस्य पुरुषे आरोपितमित्यर्थाश्रयणेन च अमुख्यार्थाश्रयणे । **सदन्नं पुरुषाधीनत्वरूपम्** । **किं न याच्यते** अमुख्यवृत्त्या किं नाश्रीयते । इदं चाभ्युपेत्योक्तम् । वस्तुतो मद्रीत्या मुख्यवृत्त्या सुपां सुलुगित्यनुशासनबलेन निमित्तत्वाधारत्वाद्यर्थसंभवस्योक्तत्वात् इति विभावनीयम् ।। ४९० ।।

किं च पौरुषसूक्तेऽस्मिन्सर्वस्य पुरुषात्मता ।
यद्यर्थस्तर्हि कार्यार्थं व्यर्थं तेन तदर्थनम् ।। ४९१ ।।

अस्य सूक्तस्य जीवेश्वरैक्यपरत्वेऽतिप्रसङ्गमाह **किं चेति** । **सर्वस्य** जीवजातस्य । **पुरुषात्मता** विष्ण्वभिन्नता । **कार्यार्थं** भूभारायितदैत्यसंहारार्थम् । **तेन** चतुर्मुखेन । **तदर्थनं** विष्णुप्रार्थनम् । **व्यर्थं** निरर्थकम् । चतुर्मुखादीनां भूदेव्याश्चापि विष्णुत्वेन स्वयं तैरेव भूभारहरणसंभवेन तदर्थमन्यप्रार्थनस्य निरर्थकत्वात् । अपार्थकं च । उपास्योपासकभावस्य भेदसापेक्षत्वेनाभेदे तदयोगादेव ।। ४९१ ।।

का भूः कुतो भरस्तस्याः कस्स्वयं कश्च पूरुषः ।
एतावदपि सूक्तार्थं ध्याता धाता न वेत्ति किं ।। ४९२ ।।

वैयर्थ्यमेव विशदयति **का भूरिति** । भूदेवी अपि पुरुष एवेति प्राप्तम् । **कुतो भरः** दैत्यानामपि पुरुषत्वेन पुरुषेभ्य एव भर इति निष्पन्नम् । **कः स्वयं** चतुर्मुखोऽपि पुरुषाभिन्न एवेत्यायातम् । **कश्च पुरुषः** । पुरुषसूक्तोक्तोऽपि विष्णुः पूर्वोक्तेभ्यः अभिन्न एव । **ध्याता** मन्त्रेणोपस्थाता ।। ४९२ ।।

पुरुषात्पुरुषस्यैव भये पुरुषपूजनम् ।
पुरुषः कुरुते कस्मात्तस्मादस्मन्मतं स्मर ।। ४९३ ।।

यदि नाम जानीयात् तर्हि उपस्थानेन आत्मानं अपहास्यं न विदधीत । कृतवांश्चोपस्थानम् । तेन सः पुरुषस्वरूपज्ञानहीन इत्यायातम् । न च तथा वक्तुं शक्यम् । 'वेदाहमेतं पुरुषं महान्तमि'ति तद्वचनविरोधात् । अतो नैक्यार्थकत्वं युक्तमित्याह **पुरुषादिति** ॥ ४९३ ॥

व्यावहारिकभेदाच्चेत्तर्हि कार्यानुरोधिनः ।
तस्यानुकूलमेवार्थं वक्ति सूक्तं न वैरिणम् ॥ ४९४ ॥

व्यावहारिकभेदसद्भावेन उपासनादिव्यवहारो घटते इत्याशंक्य निराह **व्यावहारिकेति** । **कार्यानुरोधिनः** अर्थक्रियानिर्वाहकस्य **तस्य** भेदस्य **अनुकूलं** सर्वनियामकस्रष्टृत्वादिरूपम् । **न वैरिणं** व्यवहारविरोधिनम् ऐक्यं न वक्तीति योज्यम् ॥ ४९४ ॥

अंततः परमार्थश्च स एव स्याद्धि कार्यकृत् ।
सर्वैक्यं सर्वकार्याणां भंजकं कस्य रंजकम् ॥ ४९५ ॥

व्यवहारनिर्वाहकता चेद्भेदस्याङ्गीकृता तस्य परमार्थत्वं प्राप्तमेवेत्याह **अन्ततः इति** नेतोन्यदधिकं परमार्थत्वं नामास्तीति भावः । ऐक्यं च सर्वव्यवहारभञ्जकत्वादपरमार्थमिति चैवं सिद्ध्यतीत्याह **सर्वेति** । तदुक्तं वादावल्यां 'यदि भेददर्शनं न स्यात्तर्हि सकलव्यवहारविधुरः परः प्रसज्येते'ति ॥ ॥ ४९५ ॥

बोध्यत्वं बोधकत्वं च साध्यसाधकतां तथा ।
गुरुं शिष्यं च यद्धन्ति तन्न हन्ति हि कः पुमान् ॥ ४९६ ॥

ऐक्यस्य सकलव्यवहारविलयहेतुत्वं व्यञ्जयंस्तद्भावनापरित्यागं विधत्ते **बोध्यत्वमिति** ॥ **तत्** ऐक्यम् । **पुमान्** बुभूषुः ॥ ४९६ ॥

वर्णाश्रमविभेदस्य शून्याशून्यव्यवस्थितेः ।
साधकः परमार्थोऽर्थो बाधकोऽर्थस्तु बाध्यते ॥ ४९७ ॥

स्रष्टृसृज्यभावरूपभेदाभावे मुखाद्ब्राह्मणः बाह्वोः क्षत्रियः इत्येवं व्यवस्थया वर्णसृष्टिः, आश्रमसृष्टिश्च न सिध्यति । एवं ब्रह्मणि भेदकानां सत्त्वादीनां धर्माणामभावे न तस्य शून्याद्भिन्नत्वं सिद्ध्यति । ततः **सर्वार्थ-** क्रियाकारी भेदः एव वाक्यार्थोऽङ्गीकारार्हः । **बाधकः** उक्तरीत्या व्यवस्था- घातकः । **अर्थः** ऐक्यरूपः । **बाध्यते** तिरस्क्रियते ॥ ४९७ ॥

यदि सर्वैक्यमर्थो न वाक्यं स्यात्तद्ध्यनर्थकम् ।
गौणार्थानुसृतौ विष्णोस्स्वातन्त्र्याख्यगुणं वदेत् ॥ ४९८ ॥

उक्तव्यवस्थापरिरक्षणाय सर्वैक्यरूपमुख्यार्थपरित्यागे च बाधक- माह **यदीति** । **अनर्थकं** अमुख्यार्थपरम् । पुरुषव्यतिरेकेण जडरूपं सर्वं नासीदिति पदद्वयलक्षणापत्तेः । अमुख्यार्थस्यैवाश्रयणीयत्वे सति अस्मदुक्तं, सर्वं पुरुषाधीनसत्ताकं इति राजा राष्ट्रमितिवत् स्वातन्त्र्याख्य- पुरुषगुणप्रतिपादकत्वाश्रयणमेव समुचितमित्याह **गौणेति** ॥ ४९८ ॥

संकोचेऽप्यल्पजडतः स्यादैक्यं न तु जीवतः ।
इदंपदार्थो हि जडो यत्त जीवोऽनिदंपदः ॥ ४९९ ॥

सर्वपदस्य सङ्कोचेऽपि न त्वदभिमतजीवब्रह्मैक्यसिद्धिः । इदं- पदसमभिव्याहारबलेन सर्वपदस्याल्पे जडे एव सङ्कोचस्य न्याय्यत्वात् । जडे एव दृश्यमानत्वार्थकेदंपदसंभवस्य प्रागुक्तत्वादित्याह **सङ्कोचेऽपीति** । **जीवः** अदृश्यमानत्वात् **अनिदंपदः** इदंपदवाच्यो न ॥ ४९९ ॥

तत्पूर्वस्वोत्तरार्थघ्नं स्वोपस्थात्रर्थघातकम् ।
अयुक्तं च जडाद्यैक्यमुक्तं चेत्सूक्ततैव न ॥ ५०० ॥

जडैक्यपरत्वपक्षखण्डनं प्रागुक्तदोषान्स्मारयन् उपसंहरति **तदिति** । **उपस्थातुः** चतुर्मुखस्य । अर्थस्य प्रयोजनस्य **घातकम्** । यद्येवमपि इदं

सूक्त ऐक्यं वदेत्तर्हि तस्य सूक्ततैव न स्यात् किं तु दुरुक्ततैव प्राप्नोति । दुरुक्तत्वं च वेददूषकत्वत्समयस्यैवोचितं नत्वेवापौरुषेयसूक्तस्येति भावः ॥ ५०० ॥

विशिष्टचिद्बि बाहुल्यात्सर्वं स्यान्न तदैक्यवत् ।
चिन्मात्रमबहुत्वात्ते न सर्वाख्यं यदैक्यवत् ॥ ५०१ ॥

अस्तु वा जीवपरं सर्वपदम् । तथाऽपि न ऐक्यवार्ताया अत्र प्रत्याशा । तथाहि जीवपदेन विशिष्टमभिमतं चिन्मात्रं वा । नाद्यः । तस्य बहुसंख्याकत्वेन सर्वपदोक्तबाहुल्यस्य कथञ्चिदुपपत्तावपि पुरुषाख्य-ब्रह्मणैक्यं न युज्यते । त्वयैवानङ्गीकारात् । प्रत्युत 'कथमेकत्वमनयोर्घटते विपरीतयोरि'ति त्वद्भाष्यकारेण विशिष्टैक्यपक्षस्य दूषितत्वात् । न द्वितीयः । तस्य कथञ्चिदैक्यसंभवेऽपि एकत्वेन सर्वपदोक्तबाहुल्यानुपपत्तेः । तथा च उभयथाऽपि ऐक्यायोग एवेत्याह **विशिष्टेति** । यत्सर्वं, न तदैक्यवत् , यदैक्यवत् न तत्सर्वाख्यं इति योजना ॥ ५०१ ॥

अथवैक्यपरं वाक्यमेतदस्तु न मे भयम् ।
तन्मुख्यार्थं च युक्तं च यथा स्यात्तां कथां शृणु ॥ ५०२ ॥

ऐक्यपरत्वेऽपि पूर्वप्रसक्तानामन्तर्यामिरूपाणां व्याप्तरूपेणैक्यपरत्वमस्तु तथा च मुख्यार्थस्यैवोपपत्तिरित्याह **अथेत्यादि नवभिः** ॥ ५०२ ॥

असंख्यदेहिदेहेषु सोऽत्यतिष्ठद्दशाङ्गुलम् ।
इति पूर्वश्रुतौ पुंसो रूपबाहुल्यमीरितम् ॥ ५०३ ॥

स्वगतभेदनिषेधाय पूर्वं भेदप्रसक्तिं स्थानभेदनिमित्तामाह **असंख्येति** ॥ ५०३ ॥

प्रादेशगात्रतोक्त्यैषां प्रोक्ता मध्यममानता ।
तत्तदंगुलिमानानां प्रोक्ता चाल्पाल्पमानता ॥ ५०१ ॥

परिमाणभेदनिमित्तां च तामाह **प्रादेशमात्रत इति** ॥ ५०२ ॥

स्थानभेदेन रूपानन्त्याच्चात्यल्पप्रमाणतः ।
पूर्वोक्तव्याप्तपुरुषाद्रूपाणां भेदशंकिनी ॥ ५०४ ॥

तथा च प्रकारद्वयेन भेदप्रसक्तिरविकलेत्याह **स्थानेति** ॥ ५०५ ॥

श्रुतिः पुरुष एवेदं सर्वं रूपकदम्बकम् ।
इत्यभिन्नत्वमाहैषां प्राक्स्वोक्तव्याप्तपूरुषात् ॥ ५०६ ॥

इदं सर्वं इत्यनुवादः **रूपकदंबकं** इति तदर्थः । तथा चैकवचनोपपत्तिः ॥ ५०६ ॥

भेदाभेदादिशङ्काया वारणायावधारणम् ॥ ५०७
आविर्भावात्तिरोभावाद्भूतं भव्यं भवच्च तत् ।

एवकारव्यवच्छेद्यं दर्शयति **भेदाभेदेति** ॥ ५०७ ॥

भूतभव्यभवद्देहे यद्रूपं परमात्मनः ॥ ५०८ ॥

नन्वेवं भूतं भव्यं इत्यनुपपत्तिः । **भगवद्रूपाणामनादिनित्यत्वादित्यतः** जन्ममरणाभावेऽपि आविर्भावतिरोभावविवक्षया तदुपपत्तिर्भवेदेवेत्याह **आविर्भावेति** ॥ ५०८ ॥

विशेषशक्त्या सर्वं च निर्वोढुं शक्यते किल ।
पूर्वोत्तराविरुद्धोऽर्थश्श्रुतेरेवं भवेन्मम ॥ ५०९ ॥

सर्वं आविर्भावतिरोभावौ अल्पानल्पपरिमाणत्वे इत्यादि समस्तम् । **किल** स्थानभेदाधिकरणभाष्योक्तप्रमाणैरेतत्प्रसिद्धम् । यथोक्तं तत्त्वप्रदीपे 'अभेदमपि तद्ब्रह्म बहुरूपं विशेषतः इति प्रत्यये' इति । एवं व्याख्याने, न केवलं मुख्यार्थलाभः किं तु पूर्वोत्तरानुगुण्यं चेत्याह **पूर्वोत्तरेति** ॥ ५०९ ॥

पूर्वोत्तरविरुद्धार्थस्त्वतश्च व्याहतस्तव ॥ ५१० ॥

व्याहतः इदमनिदंपदार्थाभेदरूपत्वात् ॥ ५१० ॥

स्थानस्यानित्यकथनाज्ज्यायस्त्वेशत्वकीर्तनात् ।
जडार्थस्यापि सर्वत्वात्कथमैक्यार्थता वद ॥ ५११ ॥

पूर्वविरोधं परार्थे प्रतिज्ञातं अभिनीय दर्शयति **स्थानेति** । उत्तरविरोधं दर्शयति **ज्यायस्त्वेति** । व्याहतेः स्थलमाह **जडेति** ॥ ५११ ॥

भेदसौरभसर्वस्वे स्यादस्यार्थस्य विस्तृतिः ।
शुद्ध्युद्धारे तदुद्धारस्त्वन्योन्यमतिमिश्रणात् ॥ ५१२ ॥

भेदस्य शुद्धिसौरभेऽपि संक्षेपेण समर्थनं सङ्गतमेवेत्याह **भेदेति** । तदुक्तं भगवत्पादैः 'विद्यापृथक्त्वात्तु संक्षेपेणात्र सूचितं' इति । अत्रापि **विस्तरेण** सङ्कीर्तन एव सौरभाणां सङ्कीर्णताशङ्काऽवकाश इति भावः ॥ **संक्षेपेणापि वाऽत्र वर्णने हेतुमाह अतिमिश्रणात् इति** ॥ गुणानां अभेदादित्यर्थः । भेदस्यान्तरङ्गत्वात् फलाध्याये साधनस्यैवात्र कथनं नानुपपन्नमिति **हृदयम्** ॥ ५१२ ॥

अतो विचारवातोऽयं सौरभे सौरभान्तरम् ।
संयोजयति त(द्गंध)द्ग्रंथस्सोऽयं जनमनोहरः ॥ ५१३ ॥

अतो गुणानामैक्यात् । **वातः** गन्धान्तरे गन्धस्य संयोजनहेतुः वायुः । संयोजनफलमाह **जनमनोहर इति** ॥ ५१३ ॥

तथाऽपि तत्तदर्थस्य तत्र तत्र विशेषतः ।
विचारणात्सौरभाणां सर्वस्वं भाति पञ्चधा ॥ ५१४ ॥

सौरभभेदे निमित्तमाह **तथापीति** ॥ 'वैशेष्यात्तु तद्वाद' इति **सूत्रोक्तन्यायेनेति** भावः ॥ ५१४ ॥

अग्रतो जातपुरुषं रुद्रं पशुपतिं पुरा ।
देवास्सर्वेऽपि यजनयोग्यत्वाद्यज्ञनामकम् ।
प्रौक्षन्बर्हिषि यूपे तमबध्नन्पुरुषं पशुम् ॥ ५१५ ॥

'अबध्नन् पुरुषं पशुं' इति सूक्तशेषे निर्दिष्टः पुरुषस्तु न सहस्रशीर्षत्वादिमहिमा विष्णुः किं तु रुद्र एव । तस्य पशुत्व-बद्धत्व-प्रोक्षणकर्मत्वादीनां कथनात् । ईशानत्व-ज्यायस्त्वादिधर्मोपेते विष्णौ तेषामसंभवात् । पशुपतौ रुद्रे तत्संभवादित्याह चतुर्भिः **अग्रत इत्यादिना** । **अग्रतः** इन्द्रादिभ्यः पूर्वम् । 'तस्माद्विराळजायत विराजोऽधिपूरुषः' इत्यत्रैव तस्य विराट्पुरुषपुत्रत्वकथनात् । 'अहं ब्रह्मा आद्य ईशः प्रजानां तस्माज्जातस्त्वं च मत्तः प्रसूतः' इति भारते ब्रह्मणा रुद्रं प्रतिवचनात् । **पशुपतिं** प्राथमिकपशुम् । तस्मिन्यज्ञशब्दं सङ्क्रमयति **यजनयोग्यत्वादिति** । करणे व्युत्पत्त्या इत्यर्थः ॥५१५॥

देवाः पुरुषमेधेन तेन यज्ञेन सर्वशः ।
अयजन्यज्ञपुरुषं पूज्यत्वाद्यज्ञनामकम् ॥ ५१६ ॥

'यज्ञेन यज्ञमयजन्त देवाः' इत्यस्यार्थमाह **देवाः इति** । पुरुषमेधेनेति यज्ञस्याख्या । यज्ञमित्यस्यार्थः **यज्ञपुरुषमिति** । कर्मव्युत्पत्त्या यज्ञनाम तस्मिन्निर्वक्ति इज्यत्वात् **पूज्यत्वाद्यज्ञनामकमिति** ॥ ५१६ ॥

तमित्युक्तिर्हविःपुंसो यो बध्यो वक्ष्यते पशुः ।
स हि प्रोक्ष्यस्तेन तस्मादित्यादिश्चात्र पुंस्तुतिः ॥ ५१७ ॥

'तं यज्ञं बर्हिषि प्रौक्षन्' इत्यत्र तच्छब्देन 'अबध्नन्पुरुषं पशुम्' इति अग्रे वक्ष्यमाणपुरुषपशोरेव परामर्शः । प्रोक्षणबन्धनयोरेकाधिकरणत्वनियमादित्याह **तमिति** ॥ **हविःपुंसः** । कर्मधारयः हविरूपपुंस इत्यर्थः । **तेन** इत्यनेन तेन देवा अयजन्तेति वाक्यं, तस्मात् इत्यनेन तस्माद्यज्ञादित्यादिकं च संगृह्यते ॥ **अत्र** उभयत्र **पुंस्तुतिः** महापुरुषस्तुतिः न तु पशुपुरुषस्य तत्रार्थतया प्रसक्तिः ॥ ५१७ ॥

ज्यायस्त्वं महिमा व्याप्तिरमृतत्वेशतादिकम् ।
न हि बध्यपशोर्देवस्त्रष्टृंगत्वं तदिज्यता   ॥ ५१८ ॥

कुत एवं विभज्यार्थाश्रयणं एकस्मिन्नेव प्रकरणे पठितस्य पुरुषपदस्येत्यतो योग्यतावशादित्याह **ज्यायस्त्वमित्यादिना । न हीति** । बध्यपशौ सर्वथाऽसंभाव्यमानानि ज्यायस्त्वादीनि महापुरुष एव योग्यतया संबध्यन्ते इति भावः । यथा 'अन्नात्पुरुषः' इति 'स वा एव पुरुषोन्नरसमयः' इति एकत्र पठितयोरपि पुरुषशब्दयोः उत्तरस्य सारवाचिरसशब्देन विशेषणात्परमात्मपरत्वमङ्गीक्रियते तथेति भावः । देवानां स्रष्टृण्यंगानि यस्य सः तस्य भावः इति विग्रहः ॥ ५१८ ॥

अकेन सर्वथाशून्यं निर्दुःखं मोक्षमेव हि ।
नाकाभिधं प्रापुरन्ते नाकिप्राप्यस्स एव हि ।
नाकोऽन्यस्य तु नाकस्य सिद्धत्वात्पूर्वमप्यलम् ॥ ५१९ ॥

'ते ह नाकं महिमानः सचन्त' इत्यत्र नाकशब्दः मोक्षपरः न प्रसिद्धस्वर्गपरः इति द्वाभ्यां साधयति **अकेनेत्यादिना । अकेन** कशब्दवाच्यसुखविरुद्धेन दुःखेन **सर्वथा शून्यं** न विद्यते अकं दुःखं यस्मिन्निति व्युत्पत्त्येति भावः । **नाकाभिधं** योगवृत्त्या नाकशब्दाभिधेयम् । पूर्वमेव प्राप्तप्रसिद्धनाकाख्यस्वर्गैर्देवैः प्राप्यत्वकथनाच्चात्र अयं नाकशब्दो रूढिमपहाय योगेन मोक्षपर एव वाच्य इत्याह **अन्ते इति** । न हि प्राप्तस्य स्वर्गस्य पुनः प्राप्तिर्युज्यते इति भावः ॥ ५१९ ॥

पूर्वं मुक्ता यत्र संति देवाः किल सहस्रशः ।
तैस्सहैव स्थितिर्मोक्षे देवानां नापरत्र हि ॥ ५२० ॥

इतश्चैवमित्याह **पूर्वमिति** । अयं भावः । अत्र हि पदस्थानां देवानां पूर्वं तत्पदस्थैरेव देवैः सहैव स्थितिः 'यत्र पूर्वे साध्याः सन्ति देवाः'

इत्युच्यते । न चैतत्प्रसिद्धस्वर्गे संभवति । पूर्वेषां इदानींतनानां न देवानां स्वर्गे सहावस्थानायोगात् । अतोऽप्ययं नाकशब्दो मोक्षपर एवेति ॥५२०॥

यं धाताऽप्याह वेदाहं महान्तं पुरुषं त्विति ।
आदित्यवर्णस्स किल तमसः पार एव हि ।
सदा तिष्ठति तेनासौ नित्यमुक्तः परः प्रभुः ॥ ५२१ ॥

मुकुन्दस्यैव परब्रह्मत्वे युक्त्यन्तराणि कथयति **यं धातेत्यादिना** । ब्रह्मणा सर्वोत्तमत्वेन ज्ञातत्वं 'वेदाहमि'त्यनेन वर्णितम् । 'आदित्यवर्णं तमसः परस्तादि'त्यनेन अप्राकृतरूपं ततश्च नित्यमुक्तत्वं द्योत्यते ॥ ५२१ ॥

यस्स्वावयवतो देवानिन्द्राग्निप्राणपूर्वकान् ।
असृजत्सर्ववेदांश्च प्रोक्तवान्स्वहृदि स्थितान् ॥ ५२२ ॥

स्वावयवत इति । 'मुखादिन्द्रश्चाग्निश्चे'त्यादिना देवस्रष्टृत्वम् । **सर्ववेदानिति** 'ऋचः सामानि जज्ञिरे' इत्यादिना वेदोपदेष्टृत्वम् । **स्वहृदि स्थितान्** न तु बुद्धिपूर्वकं प्रणीतान् । तेन वेदानामपौरुषेयत्वलाभः ॥ ५२२ ॥

यो गुरुस्सर्वदेवानां पिता च प्रभुरेव च ।
चराचरजगत्कर्ता देवाराध्यपदांबुजः ॥ ५२३ ॥

देवानामपि कैवल्यदाता धातुश्च यो महान् ।
नित्यमुक्तश्च भगवान्परं ब्रह्म स एव हि ॥ ५२४ ॥

यो गुरुरिति पूर्वोक्तार्थानां तात्पर्यतोऽनुवादः । **चराचरजगत्कर्तेति** 'तस्मादश्वा अजायन्ते'त्यादेस्तात्पर्यम् । **देवाराध्यपदाम्बुज** इति **देवानामपि कैवल्यदातेति** च 'यज्ञेन यज्ञमयजन्त' 'ते ह नाकं महिमानः सचन्त' इत्यादितात्पर्यम् । **धातुश्च यो महानिति** ॥ अहं एनं मदपेक्षया महान्तं

वेद इति धातुर्वचनतात्पर्योक्तिः । **स एवेति** परब्रह्मणो जगज्जन्मादि-कर्तृत्वलक्षणस्य तस्मिन्नेव कथनात् पुरुषसूक्तोक्तो महापुरुष एव 'तमेवं विद्वानि'त्यत्रोक्तं मोक्षप्रदायकं परं ब्रह्म । एवशब्देन **पराभिमतस्याल्पस्य** विराट्पुरुषस्य पुंसूक्तप्रतिपाद्यत्वव्यवच्छेदः ॥ ५२३ ॥ ५२४ ॥

श्रीश्च लक्ष्मीश्च यत्पत्न्यौ सूक्तान्ते तस्य कीर्तिते ।
अतः पुरुषसूक्तोक्तस्साक्षान्नारायणः प्रभुः ।
स्पष्टं भागवते चोक्ता पुंसूक्ते विष्णुसूक्तता ॥ ५२५ ॥

अतिप्रबलामन्तरङ्गां युक्तिमाह **श्रीरिति** । श्रीलक्ष्मीपतित्वलिङ्गस्य निरवकाशत्वं च प्राणाधिकरणभाष्येण 'अत एव श्रीश्च ते लक्ष्मीश्च पत्न्यौ अहोरात्रे पार्श्वे इत्यादितल्लिङ्गादेव' इत्यत्र सिद्धमिति भावः । पुरुषसूक्तव्याख्यानरूप-भागवतद्वितीयस्कन्धभागेनापि अत्रत्यो विष्णुरेवेति सिद्धमित्याह **स्पष्टमिति** ॥ ५२५ ॥

तस्मादजायत विराडिति यः पुंसुतो विराट् ।
सहस्रशीर्षाऽपि पुमानसावेव किलाद्भुतम् ॥ ५२६ ॥

पुरुषाज्जातत्वेन श्रूयमाणो विराडेव पुरुषसूक्तप्रतिपाद्यः पुरुष **इति** परव्याख्यामपहसति **तस्मादिति** । स्वस्यैव स्वजनकत्वाङ्गीकारः आत्माश्रयपराहतः अद्भुतः इत्याह **अद्भुतमिति** ॥ ५२६ ॥

इत्थं सूक्तोक्तमहिमा यस्य सर्वेश्वरस्य हि ।
परं ब्रह्म स एवैको नारायण इति स्थितम् ॥ ५२७ ॥

उपसंहरति **इत्थमिति** । यद्यपि वैश्वानरनये भाष्योदाहृतेन स्पष्टेन 'सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपादि'त्येव ह्येवाचिन्त्यः परः परमो हरिरादिरनादिरनन्तोऽनन्तशीर्षोऽनन्ताक्षोऽनन्तबाहुरनन्तगुणोऽनन्तरूपः इति

चतुर्वेदशिखाप्रमाणेनैव हरिरेव पुरुषसूक्तप्रतिपाद्यो न विराट्पुरुषो न वा निर्गुण इति सिध्यति तथापि न्यायेन तस्यैवोपपादनार्थं अयं प्रयत्नो ग्रन्थकारस्येति ज्ञातव्यम् ॥ ५२७ ॥

तमुक्तविधया विद्वान्मुक्तस्स्यान्नान्यथा किल ।
अतो मुमुक्षुभिर्ज्ञेयमिदं ब्रह्म न चापरम् ॥ ५२८ ॥

'तमेवं विद्वान्' इत्यस्यार्थः **तमुक्तविधया जानन्निति** । 'नान्यः पन्था' इत्यस्यार्थः **नान्यथा किलेति** । **इदं ब्रह्म** पुरुषसूक्तोक्तः मुकुन्द एव ॥ ५२८ ॥

मुक्तावनुपयोग्यन्यद्ब्रह्म यद्यस्ति तत्तव ।
तमो जिगमिषोर्मुक्तियोग्यानामिदमेव नः ॥ ५२९ ॥

मुक्तावनुपयोगि प्रत्युत तथा भावनया तमःसिद्धिनिदानं । तदुक्तं सुमध्वविजये 'यदि चेदृगुपास्यतेऽस्य रूपं तिमिरत्वेन विभाति पारिशेष्यात् । फलमप्यथ मुक्तिरीदृशी स्यादि'ति । **यद्ब्रह्म** निर्गुणम् । **यदि तव अस्ति** एवमपि दुराग्रहात्त्वमङ्गीकरोषि चेदित्यर्थः । **तमो जिगमिषोः** आसन्नतमोगमनस्य । **तव** तवैव तथा स्वीकारोऽस्तु । **नः** अस्माकं मुक्तियोग्यानां पुनः **इदं एव** मुकुन्दाभिधमेव ब्रह्मतया अङ्गीकारार्हं इति भावः । तदुक्तं भागवते 'अन्यतमो मुकुन्दात्को नाम लोके भगवत्पदार्थः' इति ॥ ५२९ ॥

साकारसगुणश्रीशसेवै(वः)काऽमृतपद्धतिः ।
नान्यस्य सेवा मोक्षस्य पंथा इत्याह हि श्रुतिः ॥ ५३० ॥

तमेवं विद्वानिति श्रुत्यर्थं निर्धारयति । **एवं** साकारसगुणत्वेन **तं** श्रीशं नारायणं **विद्वान्** श्रवणादिरूपसेवया आराध्य तदपरोक्षज्ञानवान् **अमृत इह भवति** इत्यस्य तात्पर्यं **सेवैका अमृतपद्धतिरि**'ति । जिज्ञासैव ज्ञानजन्य-

प्रसादद्वारा मोक्षसाधनमिति भावः । **नान्यः पन्था अयनाय विद्यते** इत्यस्यार्थः नान्यस्य सेवा मोक्षस्य पन्था इति ॥ ५३० ॥

अतो मुकुन्दादितरद्ब्रह्म वेदविनिन्दितम् ।
मोक्षेऽन्तरङ्गहेतुत्वान्मुख्यं ब्रह्म स एव हि ॥ ५३१ ॥

सौरभोक्तं परमप्रमेयं तात्पर्यतोऽनूद्य उपसंहरति **अत इति** । **अतो** मुकुन्दादिति सामानाधिकरण्यम् । पुरुषसूक्तेन, अत एव तद्व्याख्येयसर्ववेदैः, प्राधान्येन प्रतिपाद्य इति सौरभोक्तयुक्तिभिरुपपादितात् मुकुन्दादित्यर्थः । **इतरत्** मुकुन्दधर्मिकभेदप्रतियोगि निर्विशेषं अत एव असत् । निःस्वरूपे तस्मिन्भेदधर्मित्वस्यायोगादिति ध्येयम् । इतरदित्यावर्तते । तथा च इतरद्ब्रह्मेत्यस्य इतरैर्मायावादिभिर्ब्रह्मत्वेन सङ्केतितमात्रं इत्यर्थः । सर्वथा अवाच्यत्वेनाङ्गीकृते तस्मिन् कयाऽपि वृत्त्या ब्रह्मशब्दबोध्यत्वासंभवात् । **वेदविनिन्दितं** 'असन्नेव स भवति असद्ब्रह्मेति वेद चेदि'ति तज्ज्ञानस्य दुःखहेतुत्वेन विनिन्दितमित्यर्थः । निःस्वरूपस्य अर्थक्रियाविधुरस्य दुःखहेतुत्वायोगात् । तज्ज्ञानस्यैव तद्धेतुत्वमिति हृदयम् । तथा **वेदविनिन्दितं** पञ्चमवेदेन भारतेन । 'वैगुण्यमेव पश्यन्ति न गुणानि नियुञ्जते । तेषां तमःशरीराणां तम एव परायणम्' इति निर्गुणस्य ब्रह्मत्वभावनायाः तमःसाधनत्वोक्त्या विनिन्दितम् । यद्वा **ब्रह्म** निर्विशेषब्रह्मभावरूपत्वं मोक्षस्य । **वेदविनिन्दितं** 'यत्र त्वस्य सर्वमात्मैवाभूत्' इति वेदेन **विनिन्दितं** तर्कमुखेन तस्यापुमर्थत्वसमर्थनेन तिरस्कृतम् । यद्वा **अत** इति हेत्वर्थकः । तस्य परमतेऽज्ञानासंभवस्य उपपादितत्वादित्यर्थः । **इतरत् ब्रह्म** अविद्याशबलं ब्रह्म । **वेदविनिन्दितं** 'अन्धन्तमः प्रविशन्ति येऽविद्यामुपासते' इति वेदेन निराकृतम् । यद्वा **अतः** परमात्मनो नित्यमुक्तत्वेन जीवस्य नित्यबद्धत्वेन तयोर्वैलक्षण्यस्य 'योऽविद्ययाऽन्धः स तु नित्यबद्धः विद्यामयो यः स तु नित्यमुक्त' इति प्रमाणोदाहरणेन समर्थितत्वात् । **इतरत् ब्रह्म** इतरस्य

रुद्रादेर्जीवस्य ब्रह्मत्वम् इति यावत् । **वेदविनिन्दितम्** 'तमेवैकं जानथात्मानमन्या वाचो विमुंचथे'ति वेदेन दूषितमित्यर्थः । यद्वा **अतः मुकुन्दात्** पुरुषसूक्ते मुक्तामुक्तनियामकतया वर्णितात् महापुरुषात् **इतरत् ब्रह्म** विराट्पुरुषाख्यम् मायावादिभिः कथ्यमानम् । **वेदविनिंदितं** 'तस्माद्विराळजायत' इति जन्मोक्त्या 'ततो ज्यायांश्च पुरुषः' इति तदपेक्षया महापुरुषस्य ज्यायस्त्योक्तिबलात्, तस्य महापुरुषादवमोक्त्या च विनिन्दितम् । यद्वा **इतरत्** भूः, दैत्याः चतुर्मुखः इत्यादिकं सर्वं ब्रह्मेत्येतत् **विनिन्दितं** तथा सति 'पुरुषात्पुरुषस्यैव भये पुरुषपूजनम् । पुरुषः कुरुते कस्मादि'ति असङ्गतिप्रदर्शनेन विनिन्दितम् । **यद्वा** पुरुष एवेदं सर्वं इत्यस्य आपातार्थं परिगृह्य मायिभिः कथ्यमानं सर्वस्य ब्रह्माभिन्नत्वं जडस्यापि ब्रह्मत्वापत्त्या. विशिष्टानां जीवानां ऐक्यस्य प्रमाणविरुद्धत्वेन, चिता चित एवाभेदस्य सिद्धत्वेन शास्त्रवैयर्थ्यापत्त्या, भेदप्रमाणानां अतत्वावेदकत्वाश्रयणेन विरोधपरिहारे मीमांसाया उन्मूलनप्रसङ्गादित्यादिदोषेण विनिन्दितम् ।

इतरेषां ब्रह्मत्वस्य वेदविनिन्दितत्वोक्त्या परिशेषाल्लब्धं परमप्रमेयं निरूपयन्नुपसंहरति **मोक्ष इति** । हिर्हेत्वर्थः । 'तदेव ब्रह्म परमं कवीनां' 'आत्मब्रह्मादयः शब्दास्तमृते विष्णुमव्ययम् । न संभवन्ति यस्मात्तैर्नैवाप्ता गुणपूर्णता' इत्यादिभाष्योदाहृतप्रमाणप्रसिद्धिद्योतको वा । **स एव** मुकुन्द एव । तथा च, मुकुन्द एव, मुख्यं ब्रह्म मोक्षेऽन्तरङ्गहेतुत्वात् व्यतिरेकेण जीववत् इति प्रयोगः वर्णितः । मोक्षप्रदात्रर्थकमुकुन्दशब्दग्रहणं हेतोः पक्षधर्मतास्फुटीकरणाय । साध्ये मुख्येति स्वरूपकथनम् । निरुपपदब्रह्मशब्देनापि मुख्यत्वलाभात् । हेतौ अन्तरङ्गपदं साक्षादित्यर्थकम् । तेन न ज्ञाने व्यभिचारः । तस्य प्रसादद्वारैव मोक्षहेतुत्वात् । तदुक्तं 'ज्ञानजन्यप्रसादादेव मुच्यते' इति । यद्वा अन्तरङ्गपदस्य स्वातन्त्र्येणेत्यर्थः । तेन

लक्ष्म्यां वायौ च न व्यभिचारः । तयोस्तदनुज्ञयैव मोक्षहेतुत्वात् । इदानीं साक्षादित्यर्थो नापेक्षितः । ज्ञानस्वभावस्यापि भगवदधीनत्वादेव । अनेनानुमानेन ब्रह्मशब्दार्थगुणपूर्णत्वरूपप्रधानलक्षणस्य मोक्षहेतुत्वरूपसंभावकयुक्तिरभिहिता ध्येया । सा च 'सृष्टिस्थितिश्च संहारो नियतिर्ज्ञानमावृतिः । बन्धमोक्षौ च पुरुषाद्यस्मात्स हरिरेकराडि'ति भाष्योदाहृतप्रमाणेन सिद्धा । जन्माद्यष्टके मोक्षहेतुत्वमात्रस्य हेतूकरणेन अष्टानां हेतुत्वानां प्रत्येकं भगवल्लक्षणतां ज्ञापयति ।

तदनेन सौरभेण 'गम्यं वन्दे मुकुन्दाभिधममलमलं ब्रह्म वेदान्तवेद्यमि'ति टीका विवृता ध्येया । 'उतामृतत्वस्येशान' इत्यादिग्रन्थसन्दर्भेण गम्यत्वस्य विवरणम् । 'तव ब्रह्मत्वविद्याख्यदोषेण कलिलं सदा' इत्यादिना अमलत्वस्य विवृतिः । 'सहस्रशीर्षा श्रौतो यः' इत्यादिना पुरुषसूक्तवेद्यत्वसमर्थनेन तद्व्याख्यानभूतसर्ववेदान्तवेद्यत्वस्य स्पष्टनं इत्यादि तत्र तत्र ज्ञेयम् ॥ ५३१ ॥

वादिराजाख्ययतिना साधिता युक्तिमल्लिका ।
शुद्धिसौरभसर्वस्वमद्धा विष्णोर्न्यवेदयत् ॥ ५३२ ॥

श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्वादिराजपूज्यचरणविरचितायां युक्तिमल्लिकायां शुद्धिसौरभं सम्पूर्णम् ॥

साधिता प्रसन्नीकृता । **युक्तिमल्लिका** तदभिमानिनी भारती । **शुद्धिसौरभसर्वस्वं** शुद्धेः पारतन्त्र्याद्यशेषदोषराहित्यलक्षणायाः **सौरभं** तत्प्रतिपादकप्रमाणोदाहरणात्मकैतत्परिच्छेदप्रतिपाद्यसर्वप्रमेयजातं तच्च तत् **सर्वस्वं** 'निर्दोषशेषसद्गुणमि'ति भगवत्पादोक्तनिर्दोषत्वाख्यं सर्वं स्वरूपलक्षणजातम् । निर्दोषत्वंच श्रीनिवासतीर्थपरिष्कृतरीत्या दोषारोपपूर्वकप्रतीतिविषयाभाववत्त्वं

स्वसंसृष्टदोषात्यन्ताभाववत्त्वं वेत्यवधेयम् । सिद्धान्ते प्रामाणिकप्रतियोगिकात्य-त्यन्ताभावानुपगमात् । विस्तरस्तु अस्मत्कृते 'भगवतो निर्दोषत्वलक्षणम्' इति ग्रन्थे द्रष्टव्यः । **अद्धा** अञ्जसा स्वप्राणनाथमातरिश्वद्वारा । **विष्णोः** चरणयो-रिति शेषः । **न्यवेदयत्** समर्पयाम्बभूव इदमेव निवेदनस्याञ्जस्यं यत्पतिद्वारा तदनुष्ठानमिति हृदयम् ॥ शिष्टं पूर्वसौरभपद्यवदेव योज्यम् ॥ ५३२ ॥

यत्कारुण्यबलादेव लब्धजन्मा कृतिर्मम ॥
श्रीशे समर्पयत्वेनां सदभिज्ञगुरूत्तमः ॥

इति श्रीमत्सत्याभिज्ञतीर्थश्रीचरणचरणाराधक
श्रीमत्सत्यप्रमोदतीर्थकृता शुद्धिसौरभविवृतिः
समाप्ता ॥

॥ श्रीरामवेदव्यासार्पणमस्तु ॥

शुद्धिपत्रिका

पत्रसंख्या	पंक्तिः	अशुद्धं	शुद्धं
प्रास्ताविकम्	९	दो	दोषा
अनुग्रहाशंसनम्	१०	ठु	ट्टु
३	१९	मूलरूपी जात	मूलरूपी जातः
५	२२	श्रुते	तेः
१२	२१	निखिल	निखिलं
१३	२२	च्छेतुः	च्छेत्तुः
१४	१९	छदस्य	छेदस्य
३७	१४	शक्ति	शक्ति
३९	१२	च्छिन्ना	च्छिन्नाज्ञा
४०	१७	तद्ज्ञान	अवच्छिन्नज्ञान
७२	२१	रस्मि	रश्मि
८५	२०	भावादुत	भावान्न उत
८६	८	उन	उत
८६	१५	संयोगादिः	संयोगादि
९६	१७	ताव	नाव
१०३	१५	विनान प्रमाणे	विना प्रमाणेन
१०३	१५	सिद्धिर्दु	सिद्धिदु
१०४	१३	न्वघस्य	वन्धस्य
१२२	१७	मामप्यैव	मामप्राप्यैव
१३०	१	वच्छंदके	वच्छेदकं
१३९	२२	भाववत्त्व	भाववत्त्वं
१४४	१६	चाध्वरं	चाधरं
१४४	२०	प्रकृत	प्रकृति
१५३	८	सन्तः	सत्यः
१७३	२२	गात्र	मात्र